देवब्राह्मणभक्तश्च वैष्णवद्विजभक्तिमान्॥२०१९॥
वीरवैष्णववान् पापी शिवनिन्दापरो भवेत्।
तस्य पापवशादन्ते दन्तहानि विनिर्दिशेत्॥२०२०॥

2019 - 2020. This native born in the first half of the said Nadiamsa will be devoted to gods and Brahmins. He will be particularly fond of Brahmins belonging to Vaishnava order. He will be a staunch Vaishnavite, (but) be a sinner, and be ever against Lord Siva because of which sin he will in the end lose his teeth.

Notes: These two slokas should actually belong to effects of birth in second half of the subject Nadiamsa.

मध्यखण्डे प्रजातश्च हरिशङ्करभक्तिमान्।
कालान्तरे देहसौख्यं मध्ये क्लेशेन कर्शितः॥२०२१॥
बाल्ये सौख्यमवाप्नोति पितृमूलात् सुखी भवेत्।
कुटिलांशे पूर्वभागे मध्यखण्डसमुद्भवः॥२०२२॥
देवतागुरुभक्तश्च कृषिपश्वादिभाग्यवान्।
वाहनद्वयवान् रागी ह्युष्णदेहसमन्वितः॥२०२३॥
वातप्रकृतिमान् किंचिन्मध्ये वातप्रपीडितः।
बाल्ये सौख्यप्रपन्नश्च मध्ये क्लेशेन कर्शितः॥२०२४॥
परेङ्गितज्ञश्चतुरः स्वबन्धुजनपोषकः।
चिरजीवी प्रसन्नात्मा छन्नपापी रतिप्रियः॥२०२५॥
वैष्णवस्नेहवान्नित्यं वेश्यास्त्रीगृहवासवान्।
पिशुनश्चपलो भीरुः पापकर्मा निरामयः॥२०२६॥
कालान्तरे वातरोगी मध्यखण्डसमुद्भवः।

2021 - 2026½. The native of first half of Kutila Nadiamsa will be devoted to Lords Vishnu and Siva, be troubled by grief in the middle of his life, and will after some time enjoy physical felicity. He will be healthy (or happy) during childhood and will enjoy paternal happiness. He will be devoted to gods and preceptors and will be fortunate in terms of agriculture and quadrupeds. He will have two conveyances, be passionate and will have a body with warm and windy temperament. In between he will be troubled by windy disorders. He will have a happy childhood, The middle part of his life will cause grief. (This is a repetition.) He will understand the minds of others, be skilful (in general), will patronise his kinsfolk, be long-lived, be a satisfied person, will secretly indulge in sins, be fond of sexual union, will befriend persons

following Vaishnavite order, will live in the dens of prostitutes, be miserly, fickle-minded, timid, sinful, free from diseases but will at the end incur windy disorders.

पितामहाधिपे जीवे शन्यङ्गारकवीक्षिते ॥२०२७ ॥
पितामहश्च दीर्घायुर्भ्रातृभ्रात्रीसमन्वितः।
कृषिजीवनवान्नित्यं कुग्रामे वासवान् भवेत् ॥२०२८ ॥
वार्धके पुत्रमूलेन सौख्यंच मनुरब्रवीत्।
पितामहश्चिरायुष्मान् पुत्रक्लेशेन कर्शितः ॥२०२९ ॥

2027 - 2029. Paternal Grand-father: Jupiter owning the house of paternal grand-father (owning the 5th which is 9th from 9th) and being in aspect to Saturn and Mars denotes the following. The said relative would enjoy a long lease of life, be endowed with brothers and sisters, would live through agriculture, would live in a remote village and would be happy through his sons in his old age. He would be emaciated through filial grief. (These apply to first half of Kutila Nadiamsa, Leo ascendant.)

कुटिलांशे पूर्वभागे मध्यखण्डोद्भवस्य च।
सुतेशे शनिसंदृष्टे दरिद्रश्च पितामहः ॥२०३० ॥
पुत्रमूलात् सुसन्तोषी वार्धके श्रीयुतः सुखी।

2030 - 2030½. Jupiter Related only to Saturn: If the said Jupiter is aspected by Saturn (instead of jointly by Saturn and Mars), the said relative would incur abject poverty in his childhood. But he would be happy on account of his children and would acquire wealth in his old age.

पितृस्थानाधिपे भौमे स्वक्षेत्रे शनिसंयुते ॥२०३१ ॥
स्वपिता नीलवर्णश्च प्रमाणोन्नतदेहवान्।
भ्रातृक्लेशप्रदो मानी बाल्ये दारिद्र्यकर्शितः ॥२०३२ ॥
कुटिलांशे पूर्वभागे जातस्य मध्यखण्के।
देवालयाधिपत्येन पश्चात् प्राबल्यवान् पिता ॥२०३३ ॥
कुटिलांशजस्य पिता विष्णवंशे राजपूजितः।
बाल्ये दारिद्र्यमापन्नः प्रेष्यजीवनवान् सुखी ॥२०३४ ॥
पुत्रोत्सवात् परं भाग्यं वनस्थलनृपप्रियः।
देवालयाधिकारी च राज्यस्थानाधिपत्यवान् ॥२०३५ ॥
पश्चाद्राजप्रसादेन ह्यमात्यप्रियवान् सुखी।
वनान्तरप्रभुद्वारे प्रबलोद्योगभाग्यवान् ॥२०३६ ॥
राजलक्षणसंयुक्तो द्रव्यार्जनसमर्थकः।
राजद्वारे सुकीर्तिश्च ह्यन्यायार्जितवित्तवान् ॥२०३७ ॥
सात्त्विकप्रियवान् रागी शिवकैङ्कर्यधर्मवान्।
पतितान्यजनस्नेही तन्मूलाद्धनलाभवान् ॥२०३८ ॥
महानदीशिवक्षेत्रे तटाकोद्यानधर्मकृत्।
भिन्नालयप्रतिष्ठाता देवब्राह्मणपोषकः ॥२०३९ ॥
पापद्रव्यवशाद्धर्मं पिता तस्य करोति च।

2031 - 2039½. Father: Mars ruling the 9th, placed in own sign (Aries or Scorpio), and being conjunct Saturn would cause a physique to father which will be bluish and humpbacked (or back resembling that of bull). Further, father would be a cause of difficulties to his (father's) brothers, be honourable and would be poor during childhood. He would prosper following his headship of a temple and would be honoured by a king. During his childhood he would be poor, endangered and would live by servitude. After the birth of a son, his prosperity would commence. He would be liked by a king ruling a forest-surrounded region and would have headship of a place under the king. He would also earn the favours of a minister through the good offices of the king. He would have a prosperous calling under a king ruling a forest-surrounded region, would be endowed with royal attributes, be skilful in amassing wealth, would earn fame in royal assembly and would have wealth acquired by questionable means. He would be fond of the virtuous, be passionate, will befriend fallen people and others and will thereby make financial gains. He would take interest in deeds prescribed for men of Lord Siva's sect. He would construct tanks and gardens for a Siva temple near Mahanadi (or great river), would install a temple and worship gods and Brahmins. His charities would be through ill-acquired wealth.

मेषे कुजयुते मन्दे गुरुणा च निरीक्षिते ॥२०४० ॥
स्वपिता छत्रपापी स्याद्वार्धके धर्मवान् सुधीः।
रहस्यधर्मवान् दाता कुटिलांशे प्रजायते ॥२०४१ ॥
मध्यखण्डे फलं सत्यं सोदरभ्रातृशोकवान्।
पञ्चमाब्दात् परं सौख्यं वसुवर्षात् परं श्रियम् ॥२०४२ ॥
कुटिलांशे सिंहलग्ने दशवर्षात् परं पिता।
अतीव सौख्यमाप्नोति सम्पदाये सुवाहनम् ॥२०४३ ॥
योगं द्वादशवर्षाणि ह्यतीव श्रीयुतः पिता।

2040 - 2043½. Saturn - Mars in Aries: Should Saturn be with Mars in Aries in aspect to Jupiter, the following effects will accrue in respect of the father of the subject belonging to Kutila Nadiamsa, first half, in Leo ascendant. He would be secretively sinful, would turn religious (i.e. be sinless) in old age, would be munificent but without the knowledge of others, be religious in old age and be happy. He would be grieved on account of loss of brothers. After the native's 5th year of age, the father would be happy, after the 8th year he would be wealthy, after the 10th year he would acquire much wealth and in the native's 2nd dasa he would acquire a conveyance. After the 12th year he would achieve prosperity and wealth.

लग्नाधिपदशाकाले द्वाविंशाब्दात् परं यदि ॥२०४४॥
पितामहस्य निर्याणं पञ्चविंशतिमध्यमे।
जन्मदाये वृषे मन्दे यवनप्रभुनाशनम् ॥२०४५॥
काञ्चीपिनाकिनी मध्यदेशे राजान्तरं भवेत्।
वायव्यां दिशमाश्रित्य कलहः समुपैष्यति ॥२०४६॥
तद्देशाधिपतेः सौख्यं राजभ्रमणमादिशेत्।
पाण्डचदेशे ह्यरिष्टं स्याद्राज्याधिपतिविस्मृतिः ॥२०४७॥
तद्भ्राता प्रबलं चैति राज्यभ्रंशमतः परम्।
पश्चिमां दिशमाश्रित्य कलहः पाड्यदेशके ॥२०४८॥
अराजकं च भवति म्लेच्छः प्राबल्यमश्नुते।
पश्चात् पूर्वनृपतिस्तु नष्टराज्यार्थलाभवान् ॥२०४९॥
चोलपाण्ड्यपुराधीशौ भीत्या च नाशसंयुतौ।
पित्रा सेवितनृपतिर्गजाश्वाम्बरलाभवान् ॥२०५०॥
राजयोगाभिवृद्धिः स्यात् स्वपितुः सौख्यमादिशेत्।
दशवर्षात् परं चैव चोत्तरे राज्यविप्लवः ॥२०५१॥
अमात्यब्राह्मणक्लेशं म्लेच्छमूलादुपद्रवम।
रिपुक्षोभवशाच्चैव लोके दुर्भिक्षमादिशेत् ॥२०५२॥

2044 - 2052. (a) Between the 22nd and 25th years of the native's life, (or) in his ascendant lord's dasa, his paternal grand-father will pass away.

(b) Irrelevant: During the native's first dasa, with Saturn moving in Taurus, destruction of a Yavana king will occur. In the region between Kanchi and Pinakini, there will be a change of king. There will be quarrels in the north-western direction. The king of the said region will be happy. In the Pandya region, the king will quit the world; his brother will become stronger. In the west of Pandya quarrels and anarchy will be marked; Mlecchas will take over after which the original king will recover his lost kingdom and wealth. The rulers of Chola and Pandya will be in the grip of fear and destruction.

(c) The native's father will gain elephants, horses and robes through the king. His Raja yoga effects will be on the increase and he will acquire happiness after the 10th year of the native.

(d) Irrelevant: Ministers and Brahmins will be in grief through the evil influences of Mleccha kings. There will be strife and drought (poverty) caused by enemies.

मेषे शनिस्थिते जातो द्वादशाब्दात् परं यदि।
लोके दुर्भिक्षमप्नोति प्रजाक्षोभं विनिर्दिशेत् ॥२०५३॥
मीनान्ते वृश्चिकान्ते च युग्मे सिंहे च मध्यमे।
यावत् स्थितौ मन्दजीवौ तावद्दुर्भिक्षमादिशेत् ॥२०५४॥
लग्नाद्भाग्यं गते मन्दे भूसुतेन समन्विते।
स्वप्रभोश्च महाक्रोधस्तृतीयांशे प्रकीर्तितः ॥२०५५॥
जन्मदाये स्वनृपति राज्ये कलहमादिशेत्।
पश्चाच्छाग्यति कलहो राजासन्तानमश्नुते ॥२०५६॥
तत्काले पितृसौख्यं स्यात् पश्चात् प्राबल्ययोगवान्।
द्वादशाब्दात् परं लोके धान्यनाशस्त्रिवत्सरम् ॥२०५७॥
प्रजाक्षोभश्च भवति देशे राजान्तरं भवेत्।
सम्पतारदशाकाले जनकस्य महत् सुखम् ॥२०५८॥
राजयोगं च लभते राजामात्यप्रसादवान्।
एवंभूतोऽस्य जनकः सप्तविंशात् परं मृतिम् ॥२०५९॥
यदि जीवति पुण्येन द्वात्रिंशे पितृनाशनम्।
ततः पूर्वममात्यस्य नाशेन स्वपितृव्यथा ॥२०६०॥
पश्चाद्भाग्यसमायुक्तो राजपुत्रवशाद्भवेत्।
पितृभावफलाध्याये फलं विस्तारमादिशेत् ॥२०६१॥

2053 - 2061. (a) Irrelevant: With Saturn moving in Aries, the country will reel under drought and strife. The extent of drought will correspond to placements of Jupiter and Saturn in the end of Pisces/Scorpio, or in Gemini or in the middle of Leo.

(b) Saturn in the 9th from the ascendant in the company of Mars denotes that the subject will show anger against his king (i.e. will misbehave with the employer).

(c) **Irrelevant:** The first dasa will cause strife in kingdom. After strife, peace will be restored and the king will have birth of a son.

(d) During the above phase, the native's father will attain happiness and increased prosperity.

(e) Irrelevant: After the twelfth year, destruction of food grains will exist for a period of three years. The populace will be in the grip of strife and change of king will occur.

(f) The second dasa of the native will cause great happiness to the native's father who will obtain Raja yoga effects and favour from the king. The native will lose his father in his 27th year of age. Even if he escapes death, 32nd year will surely cause his end. Prior to this, the father will be mental distress due to the destruction of royal minister, after which he will prosper through the prince of the state.

सूर्ये यावत्फलानि स्युस्तावत्सङ्ख्या पितृव्यकाः।
पितुःसहोदराणां च विस्तारेण फलं स्मृतम् ॥२०६२ ॥
कुटिलांशे पूर्वभागे जातस्य मध्यखण्डके।
विलम्बसोदरोत्पत्तिर्बृहद्बीजश्च सोदरः ॥२०६३ ॥
ज्येष्ठभ्रातृप्रियो नित्यमेकभ्रातृसमन्वितः।
भ्रातृभावगते मन्दे भूसुतेन समन्विते ॥२०६४ ॥
सुराचार्योण संदृष्टे भ्रातृभाग्ययुतो भवेत्।
सोदराः पञ्चसङ्ख्याश्च ह्यथवा त्रयमेव च ॥२०६५ ॥
कुटिलांशे पूर्वभागे मध्यखण्डैकभ्रातृमान्।
एका स्वसा सौख्यमेति भूषिता कनकप्रभा ॥२०६६ ॥
भाग्यवंशे विवाहश्च भर्तुपुत्रवती भवेत्।
भावुकाधिपतौ भौमे स्वक्षेत्रे शनिसंयुते ॥२०६७ ॥
भर्तृवैरमवाप्नोति भावुकश्च न संशयः।
भावुकांशाधिपे भौमे नीचग्रह समन्विते ॥२०६८ ॥
भावुकज्येष्ठभ्राता च भ्रातृद्वेषयुतो भवेत्।
कुटिलांशे भावुकस्य ज्येष्ठभ्राता सदानृतः ॥२०६९ ॥
भर्तृद्रोहवशाद्भाग्यं नाशं च मनुरब्रवीत।
भर्ता चैव ततः पश्चात् क्षेमदाये सुभाग्यवान् ॥२०७० ॥
भ्रातृशोकं विपद्दाये संधिकाले न संशयः।
दशामार्गोषु विस्तरि भावुकस्य फलं वदेत् ॥२०७१ ॥

2062 - 2071. (a) Paternal Uncles: The number of paternal uncles will correspond to the number of Bindus in the Ashtaka Varga of the Sun.

(b) Co-born: The subject of Kutila Nadiamsa, first half, in Leo ascendant will have delayed obtainment of after-born. One of them will have large testicles. The native will have one older brother whom he will be fond of.

(c) Saturn in the 3rd house in the company of Mars and in aspect to Jupiter will cause happiness through co-born. There will be three or five of them.

(d) (Without reference to Saturn & C) the native will have one brother and one sister. The said sister will be endowed with golden ornaments, will marry into a prosperous family and will be endowed with (long-living) husband and sons.

(e) Mars ruling the house of sister's husband (i.e. the 9th house which is the 7th from the 3rd) should be in own sign in association with Saturn. Then the sister of the native will be involved in quarrels with her husband.

(e) The said Mars joining a debilitated planet will denote that the sister's older brother-in-law (i.e. husband's brother) will have enmity with her husband.

(f) An ever truthful older brother-in-law is denoted for the sister of the native of Kutila Nadiamsa, Leo ascendant.

(g) He will gain fortunes by betraying his employer and will also incur destruction. In the native's 4th dasa fortunes will revive.

(h) In the 3rd dasa, or in the junctions of 2nd and 3rd dasas, the native will incur grief on account of a co-born. Results about brother-in-law should be told in detail with the help of operating dasa periods.

लग्नाच्चतुर्थगे चन्द्रे सिंहलग्ने प्रजायते।
सुतेशे शनिसंदृष्टे सन्तानप्रतिबन्धवान् ॥२०७२ ॥

2072. Progeny: The native of Leo ascendant having the Moon in the 4th, while the 5th lord Jupiter is aspected by Saturn, will have difficulties in obtaining progeny.

मीनांशगे तुलाजीवे शन्यङ्गारकवीक्षते।
कुटिलांशे प्रजातस्तु पुरा ब्राह्मणशपवान् ॥२०७३ ॥
तत्पापपरिहार्थं सेतुस्नानं त्रिवारकम्।
अथवा त्वेकवारेण कुटुम्बसहितः शुचिः ॥२०७४ ॥
मासत्रयं वर्षमेंक स्नानं च विधिवत् क्रमात्।

सूर्योदयात् परं चैव शुद्रश्चेत् स्नान माचरेत् ॥२०७५ ॥
कुर्यादर्धोदये विप्रस्त्रिमासं स्नानमुत्तमम् ।
काम्यार्थमेव कर्तव्यमधश्शय्या विधिक्रमात् ॥२०७६ ॥
मोक्षार्थी प्रियवस्तूनि भोजनेषु विवर्जयेत् ।
पुत्रार्थी प्रत्संह कुर्याद्हरिवंशस्य पाठनम् ॥२०७७ ॥
शूद्रस्य श्रवंण प्रोक्तं ब्राह्माणस्य मुखेन च ।
मासान्ते काम्यमुद्दिश्यव्यासपूजां विधिक्रमात् ॥२०७८ ॥
मासत्रयं प्रदोषेषु निराहारो शिवार्चनम् ।
इन्दुवारे विशेषण कल्पोक्तविधिमार्गतः ॥२०७९ ॥
पश्चात् सन्तानमाप्नोति कुटिलांश समुद्भवः ।
मृतप्रजाथवा भार्या ज्येष्ठभार्या च पुत्रिणी ।२०८० ॥
पूर्वोक्तशान्तिकार्येण ह्याल्पपुत्रवती भवेत् ।
तदभावे ज्येष्ठभार्या पुत्रं न लभते ध्रुवम् ॥२०८१ ॥
दारान्तरे सुतप्राप्ति श्चत्वारिंशात् परं भवेत् ।
शन्यङ्गरकोदोषार्थं पृथ्वीलिङ्गं द्विमण्डलम् ॥२०८२ ॥
शतधिकसहस्रैश्च ब्राह्माणैस्तु प्रपूजयेत् ।
नमोऽन्तेन च मन्त्रेण शूद्रश्चेद्विधिवत्क्रमात् ॥२०८३ ॥
वेदोक्तं निष्फलं चैव न शास्त्रीयमिति स्मृतम् ।

2073- 2083½. Curse of Previous Birth: Jupiter in Libra in aspect to Saturn and Mars, and begetting Pisces Navamsa would denote one with the curse of a Brahmin in the previous birth (and consequent delay in obtainment of progeny in the current birth). To overcome this blemish, one should take sacred dips in the Setu for a period of 3 weeks. Or else, it should be done with purity in the company of family members for a period of one week, 3 months, or one year. A Soodra should take dips after sun-rise. For a Brahmin dips for three months are considered the best. To attain final emancipation, things that are dear to the native should be abandoned in the meal. To obtain a son, recitation of "Hari Vamsa Kavya" should be done. A Soodra should listen to this account through a Brahmin. At the end of the month, Vyasa should be worshipped as per rules. For 3 months, on Pradosha days, Lord Siva should be worshipped, particularly on Mondays as stated in Kalpa. After these rituals, the native of Kutila Nadiamsa will obtain progeny. Or else, he will obtain dead children. His first wife will give birth to (only) female children. Due to the performance of these remedies, she will, obtain limited number of sons. In the absence of these remedies, his first wife will never obtain sons. He will however beget sons through second wife after the age of 40. Because of the blemish of Saturn - Mars relationship as stated earlier, the sacred Linga should be worshipped for 96 days and Brahmins should be honoured with gifts of over a hundred coins.

दाराधिपे कुजयुते कुटिलांश समुद्भवः ॥२०८४ ॥
कलत्रद्वयमाप्नोति क्षेमदाये न संशयः ।
जन्मादाये जीवभुक्तौ सम्पद्दाये स्वभुक्तिषु ॥२०८५ ॥
अथवा शुक्रभुक्तौ तु प्रथमोद्वहमादिशेत् ।
कुटिलांशे पूर्वभागे मध्य खण्डे च जायते ॥२०८६ ॥
वसन्तकाले चोद्वाहं शुक्ल पक्षे न संशयः ।
उत्तरांशे सिंहमासे त्वथवा मिथुनेऽपि च ॥२०८७ ॥
विवाहोत्सवमाप्नोति सम्पद्दाये न संशयः ।
पूर्वभागे त्वादिखण्डे मिथुने च विवाहवान् ॥२०८८ ॥
ग्रथान्तरे युग्ममासे मध्यखण्डे विवाहवान् ।

2084 - 2088½. Marriage: (a) The 7th lord Saturn in the company of Mars denotes acquisition of two wives, the second one being in the 4th dasa. The first marriage will occur in the first dasa, in the sub period of Jupiter, or in the 2nd dasa during the first sub period or Venus's sub period, in spring during a bright lunar half. This applies to the native of first half of Kutila Nadiamsa. (Also see point "c" below.)

(b) The native of second half of the subject Nadiamsa will beget married in the second dasa, with the Sun moving in Leo or Gemini.

(c) The person belonging to first half will have his marriage in the month of Gemini. (See point "a" above.)

दारेशे कुजसंयुक्ते गुरुणा च निरीक्षिते ॥२०८९ ॥
सिंहलग्रे प्रजातस्य दारप्रीतिः कचित् कचित् ।
चन्द्रे राहुयुते दृष्टे वेश्यास्त्रीभोगेलोलुषः ॥२०९० ॥

2089 - 2090. (a) Interrupted Affection to Wife: The 7th lord (Saturn) in conjunction with Mars and in aspect to Jupiter denotes that the native of Leo ascendant will show affection to his wife now and then. (That is the affection will be limited to certain occasions and will not be uninterrupted.)

(b) Attached to Prostitutes: The Moon in

aspect to or conjunction with Rahu will give addiction to pleasures from prostitutes in case of a Leo native.

स्थिरराशिगते चन्द्रे शन्यङ्गारकवीक्षिते।
वारस्त्रीगमनार्थं च स्वगेहे चौर्यकृत्यवान् ॥२०९१॥
स्वपितुः कोपमूलेन देशमन्यं प्रपद्यते।
पश्चात् स्वदेशमायाति सम्पद्याये त्विदं फलम् ॥२०९२॥

2091 - 2092. Thieving in Own Home: The Moon in an immovable sign in joint aspect to Saturn and Mars denotes that the native of Leo ascendant will indulge in thieving in his own home in order to derive pleasures from prostitutes. Further incurring the wrath of his father, he will go away to a foreign country; later on he will return to his own place. These are the effects for the dasa that is second in order.

विदेशसञ्चार स्वभावशीलः
स्थिरे शशाङ्को शनिभौमदृष्टे।
अकृत्यकार्याणि बहूनि कृत्वा
बाल्ये विदेशात् पुनरागतश्च ॥२०९३॥

2093. Other Effects: The yoga described above (sloka 2091) will further give the undermentioned effects. The subject will generally be disposed to wander in foreign lands (out of family misunderstandings). He will do many acts which are not to be done. In his childhood (i.e. early years) he will go away to a foreign place only to return to his original place.

स्थिरराश्यंशगे चन्द्रे पापद्वयनिरीक्षिते।
कृत्वा च दूरयात्रां तु शीघ्रं चैवागमिष्यति ॥२०९४॥

2094. The Moon in a fixed sign in aspect to two malefics will cause (futile) journeys to distant places. Soon will such a person come back to his birth place. (That is he will be a failure in foreign lands.)

कुटिलांशे पूर्वभागे जातस्य मध्यखण्डके।
श्यामवर्ण कलत्रं स्याद्भर्तृप्रियवती भवेत् ॥२०९५॥
भार्या गुणवती श्यामा भ्रातृभ्रात्रीसमन्विता।
पुत्रविघ्नवती चैव त्वेकभ्रातसमन्विता ॥२०९६॥
ग्रन्थान्तरे भ्रातरौ द्वौ भवेतां च न संशयः।
तयोरेकश्चिरायुष्मान् जातस्य कुटिलांशके ॥२०९७॥
दारान्तरे सालकाश्च द्वित्रिसङ्ख्याश्चिरायुषाः।
सालकानां तु सङ्ख्याश्च कारकाष्टकवर्गगे ॥२०९८॥
सालकस्य फलं चैव विस्तारं मनुरब्रवीत।
द्विकलत्रं चिरायुष्यं कुटिलांशस्य जातके ॥२०९९॥
पक्षान्तरे क्षेमदाये पञ्चाशद्वत्सरात् परम्।
ज्येष्ठभार्या मृतिं चैति मध्यखडोद्भवस्य च ॥२१००॥
पूर्वभागे तृतीयांशे विपद्दाये दशान्त्यगे।
मध्ये वा ज्येष्ठभार्यायाः सन्तानोत्पत्तिनाशनम् ॥२१०१॥
उत्तरार्धे प्रजातस्य विंशाब्दे दारनाशनम्।
विरोधं कलत्रभावे कुटिलांशसमुद्भवः ॥२१०२॥

2095 - 2102. First Half - Kutila Nadiamsa (upto "e").

(a) The native of former half of Kutila Nadiamsa, Leo ascendant will beget a dark-bodied spouse who will be quite attached to him. She will be a virtuous woman, endowed with brothers and sisters. Out of these co-born, one will be a brother and the lady will incur obstacles in giving birth to children. Other authorities prescribe two brothers for her. One of them is said to be long-lived.

(b) The subject will have a re-marriage in which case he will have two or three brothers-in-law. The actual number of such brothers-in-law should be deduced from the Ashtaka Varga.

(c) The said native will have two long-living wives.

(d) According to another view, after the native's 50th year, the first wife will quit the world.

(e) In the end of his second dasa, children born to his first wife will face destruction.

(f) Second half - Kutila Nadiamsa: One born in this part in Leo ascendant will lose his wife in the 20th year.

(g) The native of Kutila Nadiamsa (irrespective of first or second half) will incur enmity with his spouse.

सिंहे विलग्ने कुटिलांशजातो
दारिद्यगेहे च विवाहसिद्धिम्।
दारान्तरे पुत्रसुदीर्घमाहुः
श्रीमान् धनाढ्यः स्वपितुः समः स्यात् ॥२१०३॥

2103. The native of Kutila Nadiamsa, Leo ascendant, will marry in a family of dire poverty. He will obtain progeny following second marriage, will be rich and be equal to his father (in terms of

prosperity, position etc.)

वृश्चिकलग्ने ब्रह्मांशा:

समांशे वृश्चिके लग्ने ब्रह्मांशे च प्रजायते।
विप्रजन्मा सुखी नित्यं सीमन्तनय: स्मृत:॥२१०४॥

2104. Scorpio Ascendant - Sama Nadiamsa: The native in question will be a Brahmin and be the first issue of the family.

Notes: "Brahmamsa" in this part of the text relates to birth in Brahmin family. Brahmin or Brahmana in Vedic ages means - relating to or given by Brahman who was supposed to be required to know the three Vedas to supervise sacrifices and set right the mistakes; a man belonging to the 1st of the 4 original divisions of the Hindu body but often in the present day a layman engaged in non-priestly occupations although the name is strictly only applicable to one who knows and repeats the Veda. Thus the text implies birth in a Brahmin family by words such as "Brahmamsa yoga jatake".

The words "Brahmamsa" need not be confused with Brahma Nadiamsa as such.

For Sama Nadiamsa, please see page 141, Book 1.

समांशगे वृश्चिकलग्ननाथे
केन्द्र त्रिकोणे गुरुवीक्षितेवा।
भाग्याधिपे स्वोच्चगते बलाढ्ये
ब्रह्मांशयोगं मुनयो वदन्ति॥२१०५॥
सिंहे मेषांशगे भौमे समे ब्राह्मांशयोगगे।

2105 - 2105½. Sama Nadiamsa - Mars: (a) Birth in Sama Nadiamsa in Scorpio with ascendant lord Mars in an angle or in a trine in aspect to Jupiter will be that of a Brahmin.

(b) The same effect will come to pass with Mars in Leo getting Aries Navamsa.

Notes: (a) For birth in a Brahmin's family, this yoga requires Jupiter's aspect on Mars who should be in 1st, 4th, 7th, 10th, 5th or 9th from the ascendant Scorpio.

(b) In this case Mars in Leo should get Aries Navamsa, but need not be connected with Jupiter.

In modern ages, such a combination should be interpreted as capable of giving knowledge related to the Supreme Being.

पूर्वभागे प्रजातश्च रक्तवर्णशुभाकृति:॥२१०६॥
समांशगे पूर्वभागे लग्ने च वृश्चिके तथा।
महाशिवालयक्षेत्रे नगरे चाग्रहारके॥२१०७॥
पूर्वपश्चिमवीथ्योश्च दक्षिणस्यां प्रजायते।
समांशगे ब्राह्मायोगे सुखेशे गुरुसंयुते॥२१०८॥
महादेवप्रसादेन नगरे प्रसवं स्मृतम्।

2106 - 2108½. Sama Nadiamsa - First Half: (a) One born in this part in Scorpio ascendant will have an auspicious appearance with blood-red complexion. His birth will be in a famous shrine dedicated to Lord Siva, in a colony of Brahmins, in a street extending from east to west and in a house facing the south.

(b) Should Saturn, the 4th lord, be with Jupiter, the birth due to the mercy of the Lord Siva will be in a city.

समांशगे ब्राह्मायोगे ह्युत्तरे च प्रजायते॥२१०९॥
अग्रहारे प्रसूतिश्च गर्भे च पञ्चमोद्भव:।
सप्तमे पञ्चमे वापि नवमे ब्रह्मयोगगे॥२११०॥
जननं सौख्यमित्याहु: पश्चादभ्रातृविहीनवान्।

2109 - 2110½. Sama Nadiamsa - Second Half: This native of Scorpio ascendant will be born in a Brahmins' colony as the 5th, 7th or 9th issue of the family. His birth will be an auspicious one and he will have no after-born.

Notes: The quintessence of these slokas is as under. The subject will be the last issue of the family which will have a minimum of five children and maximum of nine children. His birth will be a cause of auspicious progress of the family.

समांशगे ब्राह्मायोगे पूर्वभागे च जायते॥२१११॥
पश्चाद्भातृत्रयं चेति भगिनीद्वयवान् सुखी।
तृतीयसोदरभ्रातुर्जातमात्रे मृतिं वदेत्॥२११२॥
कनिष्ठ भ्राता दीर्घायुर्मध्ये चित्तभ्रमं लभेत्।

2111 - 2112½. Sama Nadiamsa - Co-born: One belonging to Scorpio ascendant will have three brothers and two sisters (as against none in case of second half). One of the brothers will have instant death at the time of birth. One will be long-lived. The middle of the brothers will have mental derangement.

Notes: There is some confusion about events relating to sequence of brothers. The translation is

provided eliminating such a confusion. Instant death and long life are apparently applicable, in order, to the first and third of the three brothers. The middle one is destined to suffer from maladies of the mind.

समांशगे पूर्वभागे तृतीये केतु संस्थिते ॥२११३ ॥
पश्चात् सहोदरभ्रातृभार्या पुत्रवती शठा।
भाग्येशे केन्द्रभावस्थे स्वर्भानुयुतवीक्षिते ॥२११४ ॥
सहोदरभ्रातृभार्या कचिदुश्चरिताप्रिया।
कन्यांशे वृश्चिके लग्ने भाग्ये राहौ प्रजायते ॥२११५ ॥
सहोदरभ्रातृभार्या श्वश्रूश्वशुरदूषिणी।
एका वन्ध्यात्वमाप्नोति पतिभक्तिविवर्जिता ॥२११६ ॥
एका शरीरदोषापि पुत्रद्वयसुपूजिता।
पुत्रिकाद्वयसंयुक्ता गर्भस्रावेण कर्शिता ॥२११७ ॥
भ्रात्री भ्रातृप्रियवती मध्ये क्लेशेन कर्शिता।

2113 - 2117½. (a) Ketu in 3rd: The wife of the younger brother of the said native will be blessed with sons but will be crafty if Ketu is in the 3rd.

(b) The Moon in an Angle: If the 9th lord Moon is posited in an angle along with Rahu, the sister-in-law will be somewhat disposed to be fond of questionable history.

(c) Virgo Navamsa: Should birth be in Scorpio ascendant begetting Virgo Navamsa as Rahu is in the 9th from ascendant (i.e. in Cancer), the native's sister-in-law will blame her parents-in-law (i.e. she will be disobedient to them). One of the sisters-in-law will further be unable to bear progeny and will not care for her husband. Yet another will have some physical defect, will have two sons and two daughters, be well honoured, and will be weak-bodied due to some abortions. She will be fond of her brothers and sisters and will occasionally be subjected to troubles.

समांशे वृश्चिके लग्ने मकरे केतुसंस्थिते ॥२११८ ॥
कामेशे कुजसंदृष्टे वेश्यास्त्रीसङ्गपापवान्।
समांशगे पूर्वभागे वेदाध्यायी सहोदरः ॥२११९ ॥
एको वन्धयापति श्चैव ह्यपरस्तु त्रिभार्यकः।
भ्रातृत्रयकनिष्ठश्च भार्याव्यसनतत्परः ॥२१२० ॥
मूढात्मा याचकः कोपी क्लेशपञ्चाङ्गजीवकः।
स्वभुजार्जितवान् किंचिद्भ्रातृमूलाद्वनाढ्यवान् ॥२१२१ ॥
मध्ये भ्रातृविरोधेन विभागानन्तरं व्यथाम् ॥
देशान्तरे वासमति ह्यल्पसौख्ययुतो भवेत् ॥२१२२ ॥
ततः पश्चाद्भ्रातृपीडा त्वग्रहारे निवासवान्।
व्यवसायपरो नित्यं वैदिकस्मार्तजीवकः ॥२१२३ ॥
ततः पश्चाद् भातृफलं जन्मप्रभृति पापवान्।
दुष्टस्त्रीनायकः कोपी कार्यसाहसवान् सुखी ॥२१२४ ॥
डम्भाचाररतो नित्यं भ्रातृद्रोहादपुत्रकः।
भ्रातृविश्वसरहितो ह्यन्तःकपटपापवान् ॥२१२५ ॥
याचकावृत्तिं कुरुते नानाजातिगृहे गृहे।
भ्रातृद्वयं फलं चेति मध्ये ह्युन्मादरोगवान् ॥२१२६ ॥

2118 - 2126. Sama Nadiamsa - Scorpio Ascendant: (a) The subject will be sinful being in the company of whores if Ketu is in the 3rd in Capricorn as the 7th lord (Venus) is aspected by Mars.

(b) Brothers: A brother of the native of first half of this Nadiamsa will be versed in the Vedas.

Another will beget a spouse who will never be able to give birth to a child.

The last one will have three wives who will be domineering. He will be a fool, a beggar, given to anger, will have a troubled life which he will eke out through the use of almanacs, will lead self-earned wealth apart from some riches through brothers, will also incur grief through a division with brothers, will migrate to foreign lands and will enjoy limited happiness. Afterwards, there will be some troubles to his brothers while he will shift to live in a coly of Brahmins. He will be attached to his profession, will live through Vedic calling, will commit sinful acts, will be the husband of a wicked woman, be irritable and be adventurous in his deeds, will indulge in arrogant acts, will go without progeny due to the sins of betraying his brothers, will not be grateful to his brothers, be inwardly cunning and will go begging from house to house belonging to men of various castes.

The middle one of the brothers will be mad.

भाग्ये राहौ प्रजातस्य द्वितीये रविसंयुते।
समांशे सोदरभ्राता हीनवृत्त्याच जीवति ॥२१२७ ॥
पुरा पापस्य दोषेण त्वेकः पुत्रविहीनवान्।
मुखोन्मत्तविकारी च स्वदेहात्मादिवञ्चकः ॥२१२८ ॥
अन्तः क्रोधी प्रसन्नात्मा साधुवद्दुष्ट कृत्यवान्।

2127 - 2128½. Co-born: Rahu in the 9th (in Cancer) while the Sun is in the 2nd (in Sagittarius)

denotes the following. One of the brothers of the native will have mean professions while another will be childless due to previous birth's sins, will suffer from disorders of the mouth or face, will cheat his kinsfolk, be inwardly given to anger but outwardly happy, will trouble the virtuous and will indulge in wicked deeds.

समांशगे पूर्वभागे स्थिरलग्नोद्भवस्य च ॥२१२९ ॥
स्वज्येष्ठभ्रातृमूलेन भाग्यं भ्रातृत्रयं भवेत् ।
कालान्तरे भ्रातृवैरमन्योन्यं च भविष्यति ॥२१३० ॥
द्वेषेण क्लेशमाप्नोति देशत्यागं विनिर्दिशेत् ।
भ्रातृ भावफलाध्याये भगिनीलक्षणं स्मृतम् ॥२१३१ ॥
सहोदरभ्रातृफलं प्रोक्तं विस्तारमेव च ।
समांशे भगिनी चैव बहुकालं समुङ्क्ली ॥२१३२ ॥
पुत्रशोकवती चैव त्वेका क्लेशेन कर्शिता ।

2129 - 2132½. Immovable Ascendant - Sama Nadiamsa: One born in the first half of this Nadiamsa will have three brothers and will prosper through elder brother. After some interval, he will incur enmity with brothers which will cause him troubles and he will leave the country. One of his sisters will have long-living husband but will be grieved on account of progeny. Another will be emaciated due to miseries.

कर्मे भौमे सुखे राहौ स्थिरलग्नोद्भवस्य च ॥२१३३ ॥
सहोदरी क्लेशमति पुत्रशोकवती स्मृता ।
सहोदरीसुतः कश्चित् पुरा पापस्य हेतुना ॥२१३४ ॥
ब्रह्मचर्याश्रमे बाल्ये चोन्मादेन मरिष्यति ।
समांशे भगिनीपुत्रेवंशे पापस्य हेतुना ॥२१३५ ॥

2133 - 2135½. Immovable Ascendant - Sama Nadiamsa: Mars in the 10th and Rahu in the 4th will give the undermentioned effects. The native's sister will undergo miseries and will be grieved on account of loss of a son. Her son will, due to previous birth's sins, take to Brahmacharya in childhood and will die due to madness. There will be a lot of poverty, difficulties and madness in the said family.

अतीव क्लेशदरिद्यमुन्मांद लभते ध्रुवम् ।
समांशे चोत्तरे भागे कीटलग्नोद्भवस्य च ॥२१३६ ॥
सर्वज्येष्ठः सुखी भ्राता वेदाध्ययनशास्त्रवित् ।
तस्य भार्या च कुलटा सन्यासिप्रियभोगिनी ॥२१३७ ॥
सहोदरभ्रातृभार्या यतिमूलात् सुभाषिता ।
उत्तरांशे फलं सत्यं ज्येष्ठभार्या पतिव्रता ॥२१३८ ॥

2136 - 2138. Scorpio Ascendant _ Sama Nadiamsa: The native born in Sama Nadaimsa's second half in Scorpio ascendant will be the first issue. His brother will be learned in the Vedas. The second wife of the said brother will be unchaste, attached to enjoyments from an ascetic. The first wife (of the said brother) will be chaste.

समांशे चोत्तरे भागे नवमे राहुसंस्थिते ।
भ्रातरौ द्वौ चायुष्मन्तावग्रहारे निवासवान् ॥२१३९ ॥
पुराणतत्वधर्मज्ञों ज्येष्ठभ्रातृप्रियः सुखी ।
उत्तरांशे फलं सत्यं ब्राह्मांशे च समुद्भवः ॥२१४० ॥
समे ब्राह्मयांशयोगेन शिवानुग्रहभक्तिमान् ।
रोमाङ्किततनुः प्राज्ञो ह्यन्तश्शुद्धः सधार्मिकः ॥२१४२ ॥
पापत्माकृशदेहश्च बीजप्रान्त्ये सुलक्ष्मकः ।

2139 - 2142½. Rahu in 9th: The subject of second half of Sama Nadiamsa, Scorpio ascendant, with Rahu in the 9th house will beget the following effects. He will have two brothers, be long-lived, will live in a colony of Brahmins and will have knowledge of Puranas, philosophy and justice. He will be fond of his elder brother, be devoted to Lord Siva, will have much hair on his physique, be learned, of pure consciousness, highly munificent, fond of ascetics, devoted to gods, firm in prosperity and endowed with justice and expedients. He will be widely famous, will enjoy pleasures, be indolent, will have good qualities, will also indulge in sinful deeds, be emaciated and endowed with auspicious marks.

वित्ते मन्दे वक्रबुद्धिरभक्षणभक्षणप्रियः ॥२१४३ ॥
असत्यवाचकः कामी ह्यन्तश्शुद्ध शुभान्वितः ।
पापांशे पापसन्दृष्टे पापी दुर्मार्गबुद्धिमान् ॥२१४४ ॥
सत्यशौचविहीनश्च वित्ते मन्दे च जायते ।

2143 - 2144½. Saturn in 2nd: If Saturn is in the 2nd house, declare the following effects. The person will be of crooked disposition, be fond of eating things that are eatable as well as uneatable, be untruthful, libidinous, pure in mind and be fortunate. If Saturn is in a malefic's Navamsa and acquires malefic aspects, the subject will take to bad path. He will be devoid of truth and purity.

वृषभांशकगे मन्दे चापे गुरुसमन्विते ॥२१४५ ॥
समांशे वृश्चिके लग्नो ज्योतिश्शास्त्रविशारदः।
अलसः कीर्तिमान् कामी छन्नपापरतिप्रियः ॥२१४६ ॥

2145 - 2146. Saturn with Jupiter: Should Saturn be in the 2nd in Sagittarius with the company of Jupiter and occupy Taurus Navamsa, the person will be learned in astrology. He will be indolent, famous, lustful and will indulge in questionable deeds as well as sexual pleasures in a secretive manner.

वित्ते गुरुयुते मन्दे तेजस्वी धनधान्यवान्।
अल्पाशी परदारेषु बाल्ये क्लेशदरिद्रवान् ॥२१४७ ॥
ब्राह्मयांशयोगे धर्मात्मा मनस्वी प्रियदर्शनः।
शरीरदोषवान् किंचिन्मिताशी भ्रातृपोषकः ॥२१४८ ॥

2147 - 2148. Saturn in the 2nd with Jupiter will cause one to be splendorous and endowed with wealth and grains. He will eat limited food, be involved with others' wives and will incur difficulties and poverty in childhood. He will be charitable, intelligent, charming in appearance, will have some physical defects and will patronize his brothers.

लग्नात्तृतीयगे मन्दे धनेकेतौ प्रजायते।
सुतेशे शनिसंयुक्ते किंचित्पावनवाक्यवान् ॥२१४९ ॥

2149. Saturn - Jupiter - Ketu: With Saturn and Jupiter in the 3rd (in Capricorn) while Ketu is in the 2nd house, the subject will be somewhat purificatory or holy in speech.

भृगौ स्वोच्चोऽथवा भाग्ये दशमे भूमिनन्दने।
सुराचार्येण संदृष्टे सुपुत्रः कुलदीपकः ॥२१५० ॥

2150. Venus - Mars: One will be a worthy son and a lamp of the family if Venus is in exaltation in the 5th (in Pisces) or is in the 9th (in Cancer). In either case, Mars is to be in the 10th house.

दशामाङ्गारको यस्य लग्ने वा सप्तमेऽपि वा।
न विमुञ्चति तं लक्ष्मीर्लज्जाकुलवधूमिव ॥२१५१ ॥

2151. Goddess Lakshmi (i.e. wealth), like a spouse caring for the family's honour, will never discard the person, should Mars be in the 10th, or the ascendant or the 7th. (That is, one born in Sama Nadiamsa of Scorpio, with Mars in Scorpio, Taurus or Leo will be opulent till death.)

ब्राह्मयांशयोगे सौम्यांशे समांशे वा प्रजायते।
लग्नात् त्रिकोणगे शुक्रे पुरा ब्राह्मणजन्मवान् ॥२१५२ ॥
चन्द्रांशेह्यथ सौम्यांशे समांशे च प्रजायते।
भृगौ स्वोच्चे त्रिकोणे वा त्रिजन्मज्ञानबुद्धिमान् ॥२१५३ ॥

2152 - 2153. (a) The native of Sama Nadiamsa in Scorpio ascendant, with Mercury's Navamsa would have been a Brahmin in previous birth provided Venus is in a trine.

(b) If the Navamsa in question belongs to the Moon or Mercury while Venus is in a trine or in exaltation, the subject will have memory of three previous births.

Note: These two verses are confusing because of unclear reference to Navamsas of Mercury and the Moon.

सुखेशे भृगसुसंयुक्ते पञ्चमस्थेय जायते।
समांशगे पूर्वभागे ज्योतिश्शस्त्रप्रवीणकः ॥२१५४ ॥
शिवपूजाप्रभावेण दैवानुग्रहहेतुना।
फलभागे प्रवीणश्च जातकस्कन्धनैपुणः ॥२१५५ ॥
चातुर्वर्णमताचारे तत्त्वनिष्कर्ष बुद्धिमान्।
महादेवप्रसादेन कालज्ञानयुत स्सुखी ॥२१५६ ॥

2154 - 2156. Scorpio Ascendant: One will be a skilful astrologer if the 4th lord Saturn joins Venus in the 5th in Pisces. Due to worship of Lord Siva, he will be skilful in horoscopy. He will follow the codes prescribed for the four traditional castes, be skilful in philosophy, intelligent and happy.

लग्नात् त्रिकोणगे शुक्रे चन्द्रे पापविवर्जिते।
वित्ते जीवेऽथ वा षष्ठे सदानिर्मलाचित्तवान् ॥२१५७ ॥
एतद्योगे प्रजातश्च सदा दाक्षिण्यबुद्धिमान।
परोपकारवान् रागी लोके प्रख्यातिमान् सुखी ॥२१५८ ॥

2157 - 2158. Scorpio Ascendant: Should Venus be in a trine from the ascendant, Jupiter in the 2nd or the 6th, and the Moon is free from malefic conjunction, the subject will have a pure history, be ever considerate, helpful to others, passionate and be famous in the world.

समांशगे धने जीवे वीक्षिते वा प्रजायते।
शिवपूजारतो नित्यं प्रदोषव्रतपुण्यवान् ॥२१५९ ॥

2159. Jupiter Related to 2nd: If Jupiter is in

the 2nd or aspects it, the native of Sama Nadiamsa in Scorpio ascendant will be devoted to worship of Lord Siva. He will earn merits due to religious rituals.

समांशे वृश्चिके लग्ने पूर्वभागे प्रजायते।
कर्मे कुजे शुभे राहौ गङ्गस्नानादिपुण्यवान् ॥२१६० ॥

2160. Rahu - Mars: One born in the former half of the subject Nadiamsa in Scorpio ascendant with Mars in the 10th and Rahu in the 9th will earn the merits of sacred dips in the Ganges.

कर्मेशे स्वोच्चराशिस्थे कर्मे भौमे शुभेक्षिते।
गङ्गायात्राफलप्राप्तिः भाग्ये च क्रतुकृत् सुखी ॥२१६१ ॥

2161. Exalted Sun: So also when the 10th lord Sun is in his sign of exaltation while Mars is in the 10th in aspect to a benefic. Should Mars be in the 9th (instead of in the 10th), the subject will perform Yagnas.

वेदान्तनिपुणश्चैव ह्युत्तरांशसमुद्भवः।
अग्निष्टोमादि कार्येषु सिद्धिर्भवति नित्यशः ॥२१६२ ॥
गङ्गास्नायी पूर्वभागे समांशे च प्रजायते।
ब्रह्मचर्याश्रमे बाल्ये भिक्षाशी क्लेश मश्नुते ॥२१६३ ॥

2162 - 2163. Should the native belong to second half of the subject Nadiamsa, the person will be skilful in Vedanta and will have attainments in performing Vedic sacrifices like Agnishtoma. The native of former half of this Nadiamsa will have dips in the Ganges, will study Vedas under a Guru observing Brahmacharya in his early years, will acquire food by begging and will lead a difficult life.

लग्ने कुजयुते दृष्टे दशमे पापखेचरे।
जठरे वाम भागे च त्वतिबाल्ये व्रणाङ्कितः ॥२१६४ ॥
तदभावे यौवनेषु व्रणोपद्रवमादिशेत्।
आस्यरोगेण सन्तापं वार्धके वा न संशयः ॥२१६५ ॥

2164 - 2165. Mars Related to Ascendant: One will suffer from ulcers on the right side of the stomach in his childhood if Mars aspects or occupies Scorpio ascendant while the 10th is tenanted by a malefic. If there is no such disease in childhood, ulcers will strike him in youthful days. Or he will suffer from facial disorders in his advanced age.

लग्नारूढ गते चन्द्रे स्वर्भानुयुतवीक्षिते।
आरूढाष्टमगे पापे योगः केमिद्रुमो भवेत् ॥२१६६ ॥
योगे केमिद्रुमे जातः क्लेशी याचकजीवकः।
फलाकालपरित्यागी नानादेशेषु संचरन् ॥२१६७ ॥

2166 - 2167. Kemadruma Yoga: The Moon in Arudha Lagna in aspect to or in association with Rahu while the 8th from the Arudha Lagna is occupied by a malefic will cause a specific kind of Kemadruma Yoga. As a result, the native will be in difficulties, will live by beggary and will wander in various countries.

Notes: "*Phala Kaala Parityagi*" is not amenable to proper rendering. It simply denotes that the person will abandon "effects and time".

आरूढे स्वोच्चगे चनद्रे यत्किंचिद्धनलाभवान्।
तदष्टमगते जीवे वस्त्रवाहनधान्यवान् ॥२१६८ ॥

2168. If the Arudha Lagna happens to be Taurus with exalted Moon, the person will have some financial acquisitions. In this yoga, if Jupiter is simultaneously in the 8th therefrom (i.e. in Sagittarius), one will enjoy robes, conveyances and food comforts.

उत्तरार्धे सुसम्पन्नो बहुक्षेत्रन्द्याधिपः सुखी।
केमद्रुमफलं विन्द्यात् पूर्वभागे कचित् कचित् ॥२१६९ ॥

2169. One born in the second half of Sama Nadiamsa, Scorpio ascendant, with Kemadruma yoga, will be very wealthy and will own vast landed properties. The native of former half will somewhat be troubled by the evil effects of Kemadruma Yoga.

स्वोच्चे नीचांशगे सूर्ये कीटलग्नसमुद्भवः।
राजयोगशतं चैति समांशे तु न योगवान् ॥२१७० ॥
क्लेशजीवनवान्नित्यं समांशे पूर्वभागके।
गङ्गास्नानजपुण्येन शिवभक्तितरतो भवेत् ॥२१७१ ॥

2170 - 2171. The Sun in Libra Navamsa: In case of birth in the first half of the subject Nadiamsa, the Sun in exaltation but with debilitated Navamsa will cause no Yoga in spite of the fact that there may be a hundred Raja Yogas (emanating from other sources). Such a person will lead a difficult life. He will worship Lord Siva due to the merits obtained by dips in the Ganges.

समांशे चोत्तरे भागे बहिराचारडाम्भिकः।
अनेकक्रतुमान् रागी ग्रामद्रव्यापाहारवान् ॥२१७२ ॥

2172. One born in the 2nd half of Sama Nadiamsa, Scorpio ascendant, will be hypocritical, will perform many Yagnas, be passionate and will steal the village properties.

समांशे पञ्चमाधीशे असितेन समन्विते।
पूर्वभागे प्रजातश्च स्वपितमहभाग्यवान् ॥२१७३ ॥
दारारीष्टेन दुःखी च नानादेशेषु संचरन्।
विप्रस्त्रीविधवासङ्गी गङ्गयाने मरिष्यति ॥२१७४ ॥

2173 - 2174. In case of first half of Sama Nadiamsa, Scorpio ascendant, the 5th lord (Jupiter) being with Saturn will cause prosperity through paternal grand-father. The person will incur evils to his spouse, will wander in many countries, will have illicit connections with Brahmin widows and will die in Ganges.

पितामहाधिपे जीवे स्वर्क्षे वर्गोत्तमांशगे।
असितेन युते श्रीमान् महाराजपुरोहितः ॥२१७५ ॥
देहान्ते नरकं याति पौत्रमूलात् सुलोकवान्।
पितृस्थानाधिपे चन्द्रे स्वोच्चे पापविवर्जिते ॥२१७६ ॥
स्वपिता धार्मिकः साधुरेकदारव्रतः सुखी।
समांशे नवमे राहौ स्वपिता स्वभुजार्जितः ॥२१७७ ॥
ज्योतिश्शस्त्रे प्रसिद्धश्च ह्यल्पजीवनवान् सुखी।
पितामही मृत्युकाले स्वपिता सोदरद्वयी ॥२१७८ ॥
शुक्रवारे मृतिं चैति सजीवा प्रपितामही।
पुण्येन प्रपितामह्याः समांशे जनकस्य च ॥२१७९ ॥
जीवने सौख्यमित्याहु रेकाकी स्वपिता सुखी।
विवाहानन्तर सौख्यं राजामात्यप्रसादवान् ॥२१८० ॥
द्विचत्वरिंशपर्यन्तं पुण्यक्षेत्रे वसिष्यति।
पश्चाद्वनान्तरे वासं पुत्रमूलात् सुसौख्यवान् ॥२१८१ ॥
पूर्वभागे पितृफलं सूर्यानड्यां च विस्तृतम्।

2175 - 2181½: (a) Jupiter ruling the 5th house should join Saturn and occupy his own sign in Vargottama. As a result the native of Scorpio ascendant will be opulent, be a king's preceptor but will attain hell after his death. He may attain heavens (only) due to the good deeds of his grandsons.

(b) Father: The lord of the 9th, the Moon, being in exaltation without malefic association will cause following effects concerning the native's father. He will be liberal, saintly, will be attached to his wife (without any illicit associations) and be happy.

(c) Father: Rahu in the 9th house will give following effects in respect of the native's father. He will have self-earned wealth, be a famous astrologer and will have a moderate living. At the time of his mother's death he will have two sisters. She will die on a Friday during which time, the native's paternal great grand-mother will be alive. The native's father will be happy, will prosper after marriage, be lonely, will earn favours from kings and ministers. Following the age of 42, he will live in a shrine. After this, he will migrate to forests and enjoy much happiness through his sons.

In Surya Nadi, effects concerning father have been narrated in full for birth in the former half of Sama Nadi, Scorpio ascendant.

उत्तरांशे पिता तस्य याचकश्च पितामहः ॥२१८२ ॥
केरलप्रान्त्यसञ्चारी भारघृद्वृत्तिजीवकः।
पश्चात् स्वदेशमासाध म्रियते पुत्रसन्निधौ ॥२१८३ ॥
पितामही दीर्घजीवा पुत्रत्रय युता सती।
पुत्रिका च तथा विन्द्या ज्जातस्य चोत्तरांशके ॥२१८४ ॥

2182 - 2184. In case of birth in the latter half of Sama Nadiamsa, Scorpio ascendant, the father will live by beggary. The native's paternal grandfather would live in the region of Kerala, by carrying loads. After some time he will return to his native place and die before his son. His paternal grand-mother will be long lived and would have three sons and three daughters.

समांशके पूर्वभागे दीर्घायुः स्वपितामही।
उपनयनात् परं मृत्युः पिता तस्याश्च कर्मकृत् ॥२१८५ ॥

2185. One born in the first half of Sama Nadiamsa will have a long-living paternal grand-mother. She will die after the native's thread ceremony. The native's father will perform her last offices.

जन्मदाये दशान्त्यादौ संपद्दाये स्वभुक्तिषु।
पितामह श्च निर्याणं वृद्धे गोदावरीतटे ॥२१८६ ॥

2186. The native will, in the end of his first dasa or in the first sub period of the second dasa, lose his

paternal grand-father whose final rites will be performed on the banks of the river Godavari.

त्रिग्रहोच्चे प्रजातस्य नीचाभावे च खेचरे।
राजयोगफलं नास्ति कलौ गर्गमतं स्मृतम् ॥२१८७ ॥
कलौ निचग्रहाभावे निष्फलं स्वोच्चखेचरे।
उच्चनीचौ राजयोगं नीचाभावे दरिद्रकः ॥२१८८ ॥

2187 - 2188. Special Rule - Kali Yuga: According to sage Garga, one born (even) with three exalted planets will not beget Rajayoga effects unless there is a planet in simultaneous debility. This applies to the Kali Yuga. In the said Yuga, without a debilitated planet, an exalted planet will become ineffective. Only with simultaneous presence of exalted and debilitated planets, Raja Yogas will fructify. Without debilitated planet, one with only an exalted planet will incur poverty.

Notes: This seems to be a general rule applicable to various ascendants.

विपद्दाये विदेशानामुत्तरां दिशमेष्यति।
मातामहीप्रसादेन स्वपिता सौख्यमश्नुते ॥२१८९ ॥

2189. In the third dasa, one of Scorpio ascendant, Sama Nadiamsa, will be desirous of going to a foreign country located in the northern direction. In this dasa, his father will derive happiness through his (the native's) maternal grand-mother.

मातृस्थानाधिपे मन्दे चापे गुरसमन्विते।
ब्राह्मयंशयोगे जातस्य स्वमाता चिरजीविनी ॥२१९० ॥
चन्द्रे यावत्फलानि स्युस्तावनम्मातृसहोदराः।
समांशगे पूर्वभागे मातुलद्वययोगवान् ॥२१९१ ॥
मातृष्वसा काचिदेव ह्येकपुत्रसमन्विता।
सुमङ्गली मृतिं चैति मातामही चिरायुषी ॥२१९२ ॥

2190 - 2192. (a) Mother's Life-span: If the 4th lord Saturn is in Sagittarius along with Jupiter, the mother of the said native will be endowed with longevity.

(b) The number of brothers that his mother would have will correspond to the number of bindus in the Moon's Ashtaka Varga.

(c) One born in the former half of Sama Nadiamsa in Scorpio ascendant will have two maternal uncles. His maternal aunt will possibly have a son. She will pre-decease her husband.

(d) His maternal grand-mother will also be long-lived.

समांशे मातुलश्चैको ग्रामणीर्व्यसायकः।
एकोऽध्यायी स्मृतिज्ञश्च गोलकाश्रमजीवकः ॥२१९३ ॥

2193. Maternal Uncles: One of the maternal uncles of the native of Sama Nadiamsa, Scorpio ascendant, will live by agriculture in a village. One will be a student of the Vedas, versed in Smriti (ancient knowledge transmitted by memory) and will live in a hermitage.

समांशके पूर्वभागे मातुलौ द्वौ च बाल्यके।
भिक्षाटनं च कुरुतो विवाहानन्तरं सुखम् ॥२१९४ ॥

2194. If birth be in the former half of Sama Nadiamsa, Scorpio ascendant, two maternal uncles will live by beggary during their boyhood days. Following their marriages, they will be happy (i.e. will give up begging).

मातुलाधिपतौ भौमे मेषांशे गुरुवीक्षिते।
मातुलैकश्चिरायुष्मान् मातृनाशेन कर्शितः ॥२१९५ ॥
मातुलौ द्वौ पुत्रवन्तौ पुत्रिकाशोककर्शितौ।
गार्हस्थ्य जीवनं चैति वेदाध्यायी च मातुलः ॥२१९६ ॥
विप्लवेन विनिर्गत्य वनान्तरपुरे वसन्।
वाणिज्ये शूद्रमूलेन डम्भाचार धनार्जकः ॥२१९७ ॥

2195 - 2197. Mars in Aspect to Jupiter: Mars ruling the house of maternal uncles (i.e. the 6th - Aries) should be in aspect to Jupiter and be in Aries Navamsa, in case of birth in Sama Nadiamsa, Scorpio ascendant. Then a maternal uncle of the subject will be endowed with longevity. The subject will be emaciated due to early loss of mother. Two other maternal uncles will be blessed with male issues. They will lose their daughters and be in grief. One maternal uncle will lead family life as a married man and be a student of the Vedas. He will be displaced in a political calamity and will live in a town surrounded by forests by trading activities with Soodras. He will be hypocritical and will earn wealth.

समांशे भाग्यगे राहौ व्ययेशे कुजवीक्षिते।
पूर्वभागे मातुलस्य भार्या दुष्टचरित्रका ॥२१९८ ॥
म्लेच्छाक्रान्तस्य कालेषु क्लेशं प्राप्नोति विप्लवात्।
मानभङ्ग मन्सतापं देशत्यागमतः परम् ॥२१९९ ॥

पुत्रशोकेन सन्तापं भर्तृक्लेशेन कर्शिता।

2198 - 2199½. Maternal Uncle's Wife: Birth in former half of Sama Nadiamsa, Scorpio ascendant with Rahu in the 9th house, as the 12th lord Venus is aspected by Mars will give the following effects. One's maternal uncle's wife will be of questionable history. She will be in troubles when foreigners attack her country; her modesty will be outraged. Later on she will leave the country in grief. She will be sad losing her son and husband.

मातुलारुढगे मन्दे समांशे गुरसंयुते ॥२२०० ॥
पूर्वभागे मातुलस्य मृतिं चैवाश्रामान्तरे।
ब्रह्मलोकप्राप्तिफलं उत्तरांशे तथा भवेत् ॥२२०१ ॥

2200 - 2201. For birth in former half of Sama Nadiamsa, Scorpio ascendant, see if Saturn is in the Arudha Pada of the 6th house in the company of Jupiter. In that case, a maternal uncle will die in a hermitage. Such maternal uncle will attain Brahma Loka in case of the native of second half of the subject Nadiamsa.

Notes: In sloka 2201, the reading is "*Brahma Loka Praapti-ruttaramse....*" in place of our above text.

भाग्ये राहौ तदीशे च सप्तमे स्वोच्चराशिगे।
शुक्रे कुजयुते हृष्टे त्रिभार्यो ऽन्याङ्गनारतः ॥२२०२ ॥
स्वदारभगिनी क्लिष्टा विधवा दुष्टचारिणी।
तदभावे मातुलस्य भार्या च वा यदि ॥२२०३ ॥
विपद्दाये पूर्वखण्डे द्वित्रिवारं विवाहवान्।
विपद्दाये पूर्वखण्डे द्वित्रिवारं ज्वराद्भयम् ॥२२०४ ॥
त्रयोदशेऽपमृत्युश्च मृतप्रायोऽपि जीवति।

2202 - 2204½. Rahu - Moon - Venus: Rahu in the 9th, the Moon in the 7th in exaltation, and Venus associated with Mars by aspect or company will produce the following results.

(a) The native will have three wives. He will also be involved with others' women.

(b) His wife's sister will be molested, will become a widow and will have a questionable history. In the absence of these effects occurring to a sister of the person's wife, these can happen to a daughter of his maternal uncle.

(c) The native will beget married in the last one third part of the 3rd dasa. The first one third of the said dasa will cause fear from dangerous fever. 13th year will usher fear of untimely death but the subject will survive.

लग्नाद्भाग्यं गते राहौ सप्तमे चन्द्र संस्थिते ॥२२०५ ॥
विषूचीज्वभीत्या च मृतप्रायोऽपि जीवति।
स शूद्रप्रभुसन्मानं विपद्दाये शुभाश्रयम् ॥२२०६ ॥
वाहनाम्बरभूषार्पितम धनलाभं च विन्दति।
वर्षद्वंय महत् कष्टं मनुवर्षात् परं व्यथाम ॥२२०७ ॥
देशान्तरे निवासेन स्वभुजार्जित वित्तवान्।

(b) Libra Dasa: The Dasa of Libra - Venus will produce much happiness. 40th year will give wealth. The middle of Libra Dasa will cause limited number of children.

(c) Scorpio Dasa: During the Dasa of Scorpio - Mars, the native's daughter will obtain progeny.

(d) Libra Dasa: In his Libra - Venus Dasa, much happiness will occur to his daughter. This Dasa will give her marriage, and acquisition of quadrupeds and wealth in the native's family.

(d) Virgo Dasa: Virgo - Mercury dasa will cause much prosperity to his sons. In the end of this Dasa, the native will die, with the transit Sun in Aquarius, Pisces or Aries.

कन्याचक्रदशाकाले द्वादशान्त्यादिजन्मगे ।
स्फुटयोगं गते मन्दे ह्यपमृत्युश्च चक्रगे ।
देहालस्यं च लभते कालमृत्युभयं कचित् ॥२३९२ ॥

2391 - 2392. During the operation of Virgo - Mercury dasa, Saturn's movements in the 12th or in the ascendant will bring his timely death. In a trine thereof, there will be fear of untimely death and physical tiredness apart from fear of timely death to some extent.

देहे पापे स्थिते काले गोचरे हरिणांशगे।
तत्त्रिरकोणे देहजाड्यं क्षिप्रेणारोग्यसौख्यवान् ॥२३९३ ॥
मध्यान्त्यांशगते मन्दे हरिणांशे मृतिं वदेत्।
पुण्यलोकफलप्राप्तिर्व्ययारूढे भृगौ स्थिते ॥२३९४ ॥
व्यये पापे व्ययाधीशे शुभांशे पापवीक्षिते।
भार्गवे पुण्यलोकाप्तिः पश्चाज्जन्मनि सौख्यवान् ॥२३९५ ॥

2393 - 2395. (a) A malefic in transit in the Deha Rasi or a trine thereof will cause physical illness to the native of Harina Nadiamsa, but he will instantly recover.

(b) Saturn in the middle degrees or concluding degrees of Deha Rasi will promote the death of the said native.

(c) Venus in the Arudha Pada of the 12th house will consign him to the Heavens.

(d) A malefic in the 12th, the 12th lord in aspect to a malefic and in a benefic division will send one to heavens. Later on he will have a happy rebirth.

Notes: (d) Reference to Venus is incomplete.

मेषलग्ने कुटिलांशः।
हरिणांशकगे जीवे शुभांशे वृषभे सुखी।
भूसुतेन युते दृष्टे विप्रजन्मा प्रतापवान् ॥२३९६ ॥

2396. Jupiter in Harina nadiamsa with benefic division(?) in Taurus will cause happiness.

(b) If the said Jupiter is in association with Mars by aspect or conjunction ..... (incomplete)

Notes: The current discussions on immovable ascendant end here.

वेदशास्त्रार्थसंपन्नः सोदरभ्रातृपोषकः।
महानदीप्रान्त्यदेशे त्वग्रहारे निवासवान् ॥२३९७ ॥
ग्रामणीर्व्यवसायी च राजद्वारे प्रसिद्धिमान्।
कुलीरांशे पद्मभागे मेषलग्ने प्रजायते
शूद्रजन्मासुखी नित्यं भवेत् सीमन्तपुत्रवान् ॥२३९८ ॥
गर्भजातकम्।
ग्रन्थान्तरे द्वितीयो वा ज्येष्ठभ्रातृविहीनवान्।
पश्चाद्भ्रातृयुतश्चेति कुग्रामे प्रसवः स्मृतः२३९९ ॥

2397 - 2399. Aries Ascendant - Kutila Nadiamsa: (a) The native will be a valorous Brahmin. He will be learned in Vedas and other Sastras, will patronise his brothers and will live in a colony of Brahmins. His profession will be in a village. He will obtain fame in royal service.

(b) One born in Aries ascendant with Asvini (4th quarter) with Cancer Navamsa will be a Soodra and be the eldest issue. There is another authority to state that he will be the 2nd issue, will not have (living) elder co-born but will have younger ones.

Notes: From the caption given in the text, the current verses and the following ones deal with Aries ascendant.

For details of Kutila Nadiamsa, please consult notes under sloka 130 of Book 1.

मेषलग्ने पद्मभागे षषृयंशे कुटिलांशगे।
जायते सुखवाञ्छूद्रो ज्येष्ठहीनश्शुभाकृतिः ॥२४०० ॥
कुग्रामे पट्टणे चैव विश्वयोनौ तु जायते।
एकः कनिष्ठयुक्तस्य पितुर्देशान्तरे मृतिः ॥२४०१ ॥
असितांशे स्थिते सूर्ये कुन्तलांशे निशाकरे।
कुटिलांशे प्रजातस्य सुतो वा संभवे च्चिरात् ॥२४०२ ॥

2400 - 2402. Aries Ascendant - Kutila Nadiamsa: (a) He will be a Soodra, happy in disposition, will not have an elder co-born, be handsome in appearance, be born in a remote village or a town, and will have one younger co-born. His father will die in a distant land.

(b) The Sun in a Navamsa ruled by Saturn while the Moon is in Kutila Nadiamsa denotes that the person is born to his parents after a great deal of delay (or longing).

Notes: The discussions on 2nd half of the subject Nadiamsa extend upto sloka 2425 infra.

The conditions laid down in the first line of sloka 2400, viz. Aries ascendant, Asvini Nakshatra, ... Shashtiamsa and Cancer Navamsa are impracticable. Thus it should only relate to Kutila Nadiamsa, Aries ascendant.

लग्नेशे रविसंयुक्ते कारकेन निरीक्षिते।
पापकर्मरतो नित्यं राजसेवी धनार्जकः ॥२४०३ ॥

2403. Aries Ascendant - Kutila Nadiamsa: The lord of the ascendant Mars being in the company of the Sun and in aspect to Saturn (signifi-

cator concerned) will make one indulge in sinful deeds. He will serve a king to acquire wealth.

लग्नाच्चतुर्थगे चन्द्रे शन्यङ्गारकवीक्षिते ।
अलसो मतिमान् रागी परवित्ताङ्गनाप्रियः ॥२४०४ ॥
वेश्यास्त्रीसङ्गवान् कामी प्रेष्योऽमात्यस्य लोलुपः ।
कुष्ठी रुजातुरो वाग्मी चोष्णमेहशरीरवान् ॥२४०५ ॥

2404 - 2405. The native with the Moon in the 4th (Cancer) in joint aspect to Saturn and Mars will be indolent, intelligent, passionate and disposed to damage others' wealth. He will be libidinous, will join whores, be a servant and be after ministers (or powerful people). He will suffer from leprosy and other diseases and be eloquent in speech. His body will be affected by heat and urinary disorders.

Notes: In sloka 2405, "*Amatya Preshya Lolupah*" is another reading which means the native will be a minister's servant and will possess destructive instincts. The word "*lolupa*" has two meanings, thus: destructive, longing.

लग्नेशे स्वोच्चराशिस्थे शुभारूढे शुभान्विते ।
तेजस्वी मतिमान् धीरः स्वकार्यनिरतः सुखी ॥२४०६ ॥

2406. The lord of the ascendant - Mars - should be in his exaltation sign (in the 10th, Capricorn). The 9th Aroodha Pada should contain a benefic. As a result the native will be brilliant, intelligent, courageous and fond of good deeds.

वृषभांशे विलग्नेशे स्वोच्चे रविसमन्विते ।
कोपी क्षिप्रप्रसन्नात्मा ज्ञातिभाग्यसुयोगवान् ॥२४०७ ॥

2407. Mars at birth should be in Capricorn in the company of the Sun and beget Taurus Navamsa. Such a native will be given to anger but be pleased instantly. He will be fortunate in respect of his kinsfolk and will enjoy a great deal of prosperity.

स्यान्मेषलग्ने जनितोऽतिरक्तः मेहप्रधानः सुकुमारदेहः ।
कामी नित्यं साहसी भ्रातृ वैरी ।
लुब्धश्चसौ ज्ञातिबाहुल्ययुक्तः ॥२४०८ ॥

2408. General: One belonging to Aries ascendant will have much blood, will be prone to incur urinary disorders, will have a soft body, be lustful, adventurous, inimical to mother, miserly and will have numerous relatives.

मेषलग्नेऽर्कहोरायां सिंहद्रेक्काणजस्तथा ।
लग्नाद्वित्तगते मन्दे बाल्ये सौख्यविहीनवान् ॥२४०९ ॥
शिवभक्तिरतो नित्यं शिवकर्मपरः सुखीः ।
मातृस्थानाधिपे चन्द्रे स्वक्षेत्रे कुन्तलांशगे ॥२४१० ॥
स्वमाता विधवा भूत्वा बहुकालं सुजीवति ।
पुत्रशोकवती माता भ्रातृनाशेन कर्शिता ॥२४११ ॥
देशान्तरे भ्रातृयुता ज्ञातिवर्गेणं पोषिता ।
कर्मे रवियुते भौमे मीने शुक्रे कुजांशगे ॥२४१२ ॥
स्वीयभ्रात्रा तु गङ्गायां स्नातो बहुदिनं सुखम् ।
पुंसोक्तं पुत्रमुत्पाद्य क्षयरोगेण नश्यति ॥२४१३ ॥
देशान्तरे भ्रातृशोकज्ञातिवर्गेण जीवति ।
दाराक्षोभप्रदो नित्यं ज्येष्ठभ्रातृवियोगवान् ॥२४१४ ॥
नानाविधक्लेशमेति भ्रातृभावफलं स्मृतम् ।
पितृस्थानाधिपे जीवे कुम्भे वर्गोत्तमांशगे ॥२४१५ ॥
स्वपिता विप्रसेवी स्याद्भ्रातृमान् सोदरीयुतः ।
वाणिज्यशूद्रसेवादि जीवनं स्वपितुः कचित् ॥२४१६ ॥
देशत्यांग च कुरुते पितुर्दुर्मरणं भवेत् ।
कुन्तलांशकगे चन्द्रे पितृव्यैको ह्यपुत्रवान् ॥२४१७ ॥
एको मुख्यः प्रसिद्धश्च राजद्वारे सुपूजितः ।
शिवभक्तिरतो नित्यं द्विकलत्रः सुपुत्रवान् ॥२४१८ ॥
स्वपितुः सोदरभ्राता कश्चित् पापी त्रिपुत्रवान् ।
वेदसङ्ख्याथवा चेति पुत्रपुत्रीसमृद्धिमान् ॥२४१९ ॥
आयुष्मनतौ पितृव्यौ द्वौ कश्चिद्दारान्तरेऽपि च ।
कालान्तरे सुतप्राप्तिदुःखिता पितृसोदरी ॥२४२० ॥
आयुष्मत्यो द्वित्रिसङ्ख्या एका पुत्रवती भवेत् ।
पितृष्वसृद्वयोरेका वैधव्येन च कर्शिता ॥२४२१ ॥
कालान्तरे पुत्रवती त्वेकापुत्रसमन्विता ।
एकः स्वपितृव्यसुतो राजमुद्राधिकारवान् ॥२४२२ ॥
बहुपुत्रार्थसंपन्नो भेदभ्रातृयुतः सुखी ।

2409 - 2422½. Aries Ascendant: (a) The Native: Aries ascendant, with solar Hora and Leo decanate rising (i.e. the ascendant being anywhere between 10° and 15°) while Saturn is in the 2nd from the ascendant (i.e. in Taurus) will deprive one of happiness in boyhood days. He will be devoted to Lord Siva.

(b) Mother: The 4th lord Moon in Cancer in Kuntala Nadiamsa will cause widowhood to mother who will live for a long time. She will be grieved on account of loss of progeny and emaciated due to loss of co-born. Her co-born will live in distant

lands and she would be brought up by other relatives.

(c) **Brother:** One will obtain the following results in respect of a brother if Mars is in the 10th with the Sun, while Venus is in Pisces with a Navamsa of Mars (i.e. Scorpio). The brother will be happy for many days due to dips in the sacred Ganges (i.e. he will go on a long time pilgrimage). His sons will be destroyed due to tuberculosis. He will incur grief on account of mother in a foreign country and will live with his kinsfolk. He will cause perpetual distress to his spouse and will be separated from elder co-born and will incur various kinds of grief. These are the effects concerning a brother.

(d) **Father:** If the 9th lord Jupiter is in Vargottama in Aquarius, the native's father will serve Brahmins, will have brothers and sisters. He will eke out his livelihood by trading, and also by serving Soodras. He will leave his country and die a bad death.

(e) **Paternal Uncles & Aunts:** The Moon in Kuntala Nadiamsa will give the following effects. One of the paternal uncles of the native will be childless. Another will be a chief and a famous person receiving royal honours. He will be devoted Lord Siva, will have two wives and good sons. One will be somewhat sinful and will have three or four sons or will have many sons and daughters. Two of the paternal uncles will be endowed with long lives. One paternal aunt will obtain progeny after a long time and will be in grief. Two or three aunts will be long-lived. One will have male issues. Two aunts will be widowed. A paternal uncle's son will enjoy authority under a king and will have many sons, much wealth and step-brothers.

Notes: (a) In sloka 2410, the expression "*Siva Varma Gharah*" is a corrupt text. It should be "*Siva Karma Parah*" meaning that the ssubject will be devoted to Lord Siva's services.

विपद्दायेऽपरार्धादौ ज्ञातिप्राबल्यादिशेत् ॥ २४२३ ॥
पितृव्यपुत्रयोगेन भाग्यवृद्धिः शुभावहा ।
लग्नाधिपे कर्मराशौ स्वोच्चे सूर्यसमन्विते ॥२४२४ ॥
चन्द्रदृष्टे प्रजातस्तु गङ्गास्नाना फलं लभेत् ।
उत्तरांशे प्रजातस्तु य इदं फलमश्नुते ॥२४२५ ॥

2423 - 2425. Aries Ascendant - Kutila Nadiamsa: (a) The beginning and concluding parts of the second half of the native's third Dasa will cause prosperity of his relatives. Due to association with a son of paternal uncle, the native's fortunes will progress and auspicious results will come forth.

(b) The lord of the ascendant (Mars) in the 10th in exaltation together with the Sun and in aspect to the Moon will cause dips in Ganges.

(c) These effects are for the 2nd half of the subject Nadiamsa.

पूर्वभागे विशेषेण भ्रातृलक्षणमुच्यते ।
यस्यकस्यापि यो जातो गङ्गां गत्वा गयां व्रजेत् ॥२४२६ ॥
सोऽप्यासप्तमकुलानि पूर्वोत्तराणि चोद्धरेत् ।
भाग्ये च राहुणा दृष्टे भ्राता स्याद्दारशोकवान् ॥२४२७ ॥
तेन शोकेन तद्भ्राता क्षीणायुर्नरकं व्रजेत् ।
भाग्येशे कालकूटांशे रविजांशेऽथवा स्थिते ॥२४२८ ॥
लग्नाद्विक्रमगे राहौ स्त्रीमूलाद्भ्रातृनाशनम् ।
इदमेव फलं योज्यमुत्तरांशोद्भवस्य च ॥२४२९ ॥

2426 - 2429. (a) Now specially the effects concerning brother are told. (But the text does not speak of any such thing in detail but refers to dips in Ganges and getting rid of sins of the last seven births. Apparently, there is a loss of text.)

(b) The 9th house aspected by Rahu will cause grief to a brother on account of loss of spouse. Due to such grief, the said brother's life-span will diminish and he will go to hell.

(c) The 9th lord (Jupiter) in Kalakoota Shashtiamsa or in Saturn's Navamsa while Rahu is in the 3rd (in Gemini) will destroy the brother through a female.

These effects are applicable to birth in 2nd half of Kutila Nadiamsa, in Aries.

पूर्वभागे प्रजातस्य सोदरः पापकर्मवान् ।
भाग्येऽष्टमे वा स्वर्भानौ तृतीये रविनन्दने ॥२४३० ॥
भृगौ स्वोच्चे प्रजातम्तु नाशयेत् पैतृकक्रियाम् ।
कालान्तरे पुण्यदेशे पितृसंस्कारमादिशेत् ॥२४३१ ॥
श्रद्धाभक्तियुतः पश्चद्वत्सरान्ते क्रियां चरेत् ।
सुख राशीशराशौ तु गुरौ बुधसमन्विते ॥२४३२ ॥
राहुदृष्टे स्वमाता च प्रणवाद्यै शिवार्चनम् ।
तेन पापेन तस्याः स्तु पुत्रशोकादि दारुणम् ॥२४३३ ॥

तस्यास्तु वंशवृद्धिश्च न भवेन्नित्यं भवेत्।

2430 - 2433½. Kutila Nadiamsa - First Half: (a) Birth in this segment denotes that the native's brother will indulge in sinful deeds.

(b) If Rahu is in the 8th or the 9th, Saturn is in the 3rd and Venus is in exaltation, the native will not be able to perform last offices to his father. But after some time in the end of the year, he will do related rituals in a shrine with devotion.

(d) If the dispositor of the 4th lord is conjunct Jupiter and Merury in aspect to Rahu, the mother should worship Lord Siva with excluively the Pranava Mantra by which she will be rid of tragedies like grief concerning progeny and will have her family grow.

षष्ठस्थे च निशानाथे भूसुतेन निरीक्षिते ॥२४३४॥
पितृवंशस्य वृद्धिः स्यान्मातृवंशक्षयं भवेत्।
पञ्चमेशे रन्ध्रपेन समेते तत्त्रिकोणगे ॥२४३५॥
मन्दे राहुयुते पुत्रीविवाहे विघ्नमादिशेत्।
कालान्तरे च भर्तारं दारिद्यं प्राप्य तत्सुता ॥२४३६॥
अलक्ष्मीप्रतिमादानत्तभ्दर्ता भारयवान् सुखी।
बहुदुःखा बहून् कालानल्पपुत्रवती भवेत् ॥२४३७॥
एवं च गर्भहोरायं प्रोक्ता पुत्रवती सुता।
बहुपुत्रवती नित्यं पितृभाग्येन जीवति ॥२४३८॥

2434 - 2438. (a) Should the Moon be in the 6th in aspect to Mars, the native's father's dynasty will expand while that of the mother will be impeded.

(b) The lord of the 6th (Mercury) in aspect to the 8th lord (Mars) while Rahu and Mars are in a trine from Mercury will bring obstacles in the marriage of the native's daughter. She will marry after delay and be in poverty. By donating the image of Goddess Lakshmi, her husband will earn fortunes. She will experience a lot of grief and will beget a daughter after some time. These have been stated in "Garbha Hora" (read Garga Hora). Due to the good fortunes of her father (i.e. the native), she will obtain many daughters and be long-lived.

धर्मः चातुर्वर्ण्येषु जातानां कन्यानां प्रागृतूदयात्।
कार्यो विवाहो नान्यासां कन्यका नियमस्तथा ॥२४३९॥
यस्तु कन्यामृतुमतीं चातुर्वर्ण्यसमुद्भवाम्।
उद्वाहात् पतिताद्यांदद्हेदासप्तमं कुलम् ॥२४४०॥
इत्थं मनुना प्रोक्तं पाराशर्येण चोदितम्।
होराशास्त्रे तथा प्रोक्तमिदमेव फलं स्मृतम्।
अष्टवर्षा भवेत् कन्या नववर्षा तु रोहिणी ॥२४४२॥
शूदस्यरोहिणि गौरी विवाहस्तस्य चोच्यते।
पुत्राणामथ पुत्रीणां विवाहो विघ्निते सति ॥२४४३॥
सुमङ्लीमहालक्ष्मीगौरी पूजाविधीयते।
क्षीरैर्वाप्यथाहारिद्रैरिभषेकं रमाम्बयोः ॥२४४४॥
सुमङ्गल्यै वस्त्रदानं परमान्ननिवेदनम्।
सकृद्वाचासकृत पूजा यश्चेच्छूद्धयान्वितः ॥२४४५॥

2439 - 2445. Scriptural Injunctions: In case of births relating to the 4 castes (i.e. Brahmin, Kshatriya, Vaisya and Soodra), marrriage of a girl should be done only after her attaining puberty. Otherwise, following such a marriage, (the merits of) seven past generations will be burnt. So had been said by Manu and Parasara. The science of astrology also declares such effects. A girl of 8 is known as Kanya, of 9 Rohini, of 10 Gauri and above 10 Rajasvala (who attained her puberty and is fit for marriage). For Brahmins, Kshatriyas and Vaisyas, the giving away of a Kanya is important (i. e. is recommended). For Soodra, marrriage is allowed of a Rohini or Gauri. If there be obstacles in performing the marriage of a son or daughter, worship of a Sumangali (a female whose husband is alive), Maha Lakshmi and Gauri (i.e. Lakshmi and Parvati) should be done as prescribed by Sastras. Lakshmi and Parvati should be offered Abhisheka (ritual bath) with milk and turmeric. Clothes should be given away to a Simnagali. These should be done once, and many times (i.e. again and again), with purity. Then the hurdles will be removed and marriage will take place.

Notes: An eight year old girl is called Gauri (and not Kanya) and a ten year old girl is Kanya (not Gauri). Apparently, the text in question has been wrongly copied. Thus the first 3 castes were permitted to marry off their daughter after 10 while Soodra can marry off his daughter even at 8 or 9, as per Sastras. More suh information can be found in *Brihad Daivagna Mano Ranjanam.*

तस्य विघ्नविनाशः स्याच्छीघ्र पाणिग्रहो भवेत्।
कुन्तलांशे निशानाथे शन्यङ्गारकवीक्षिते ॥२४४६॥
पुत्रोद्वाहादिविघ्नं स्यात्तस्येमां शान्तिमाचरेत्।

भाग्येशे लाभाराशिस्थे विक्रमेशेन संयुते ॥२४४७ ॥
तल्लाभे गोचरे मन्दे पुत्रिकोद्वाहसंभ्रमः।
विक्रमेशे यदंशस्थे तद्राशौ वा निरीक्षिते ॥२४४८ ॥
तत्त्रिकोणांशमसेषु पुत्रिकोद्वाहंससंभ्रमः।
दारविपदशाकाले दारलाभश्शुभावहः ॥२४४९ ॥

2446 - 2449. (a) The Moon in Kuntala Nadi-amsa in aspect to Saturn and Mars will cause obstacles in the performance of son's marriage for which remedies should be done.

(b) The 9th and 3rd lords should be together in the 11th from the ascendant. When Saturn transits the 11th thereof (i.e. 9th from the ascendant), the native's daughter will get married. Alternatively, Saturn can also aspect the sign identical with the Navamsa occupied by the 3rd lord. The corresponding months will be denoted by the Sun transiting in a sign which is a trine to such Navamsa.

(c) The Dasa of the 7th lord will cause marriage and other auspicious effects.

उत्तरार्धे श्रियावाप्तिः सोदरोद्वाहसंभ्रमः।
प्रत्यग्दशायां कन्यातुद्विस्त्रिविघ्नात् परं सुखम ॥२४५० ॥
विवाहे सर्वकर्मणि सन्तानादि भवेत्ततः।
यावता बिन्दुना युक्तो भाग्येशः शुभसंयुतः ॥२४५१ ॥

2450 - 2451. Aries Ascendant - Kutila Nadi-amsa 2nd Half: (a) The native will accumulate wealth. He will be involved in the marriage of his brother in his 5th Dasa. Marriage will be settled after two or three obstacles. So also in respect of all undertakings and acquisition of progeny.

(b) The lord of the 9th should be associated with a benefic. In that case, the number of Bindus in his Ashtaka Varga will denote the number of issues for the native. His daughter will be charming.

Notes: (a) The relevant text is not clearly composed. Apparently it suggests that the native's brother will incur obstacles in respect of marriage, progeny and other auspicious events.

तावत्कुमारा जायेरन् पुत्रिका रम्यरुपिणी।
असितांशे सुताधीशे काकवन्धयापतिः सुखी ॥२४५२ ॥
भार्या गुणवती श्यामा त्वेकभ्रातृसमन्विता।
कलत्रसोदरभ्राता त्वेकपुत्रयुतो भवेत् ॥२४५३ ॥
सहोदरो द्वित्रिसुतो बाल्ये दुष्टस्वभाववान्।
बालारिष्टभयं किंचिच्छान्त्या शान्तिं प्रायस्यति ॥२४५४ ॥

2452 - 2454. The lord of the 5th (the Sun) in a Navamsa of Venus denotes that the subject will marry a person who will give birth to only one child and then become barren. She will be charming, virtuous, dark in complexion and will have one brother. The native's brother-in-law will have one son. His sister-in-law will have two or three sons and would be wicked in her childhood. She would also incur danger to her survival due to planetary blemishes for which remedies would be sought.

लग्नेशे स्वोच्चरशिस्थे भ्रातपुत्रः सुखी भवेत्।
कलत्रद्वयावान् भोगी पितृव्यार्जितवित्तवान् ॥२४५५ ॥
स्वभुजार्जितसंपन्नो ज्ञातिभाग्य युतः सुखी।
कर्मे कन्यांशगे सूर्ये जातस्य मेषलग्नके ॥२४५६ ॥
द्रव्यार्जनसमर्थश्च भ्रातृपुत्रस्तु पोषकः।
घनाधिपदशाकाले गोचरे द्वादशे शनौ ॥२४५७ ॥
वैष्णवद्वेषमूलेन राजोपदवशोकवान्।
जन्मदाये पितृव्यस्य दारारिष्टं विनिर्दिशेत् ॥२४५८ ॥
द्वितीयोद्वाहमाप्नोति पितृसौख्यं विनिर्दिशेत्।
पश्चात् सहोदरीमृत्युर्भ्रातृलाभो ह्यतः परम् ॥२४५९ ॥
विद्यारम्भं च लभते सौम्ये मन्ददशान्तरे।
जन्मतारदशान्त्ये च स्वपितुर्व्याकुंल महत् ॥२४६० ॥
ज्वरोपद्रवमाप्नोति ज्ञातिवर्गे मनोव्यथाम्।

2455 - 2460½. (a) Brother's Son: If the lord of the ascendant Mars is in exaltation, the native's brother's son will be happy, will have two wives, will enjoy pleasures and will inherit paternal uncle's wealth. He will also have self-earned wealth and will enjoy fortunes through his kinsfolk.

(b) One born in Aries ascendant with the Sun in the 10th house with Virgo Navamsa will be skilful in gathering wealth and will patronize his brother's son.

(c) In the Dasa of Venus, when Saturn transits the 12th, the subject will incur troubles from the king due to enmity with Vaishnavites.

(d) During the native's first dasa, his paternal uncle will lose his spouse and will have second marriage. The native's father will be endowed with happiness. Later on, the subject will lose a sister

and will acquire a brother. His education will commence in Mercury - Saturn periods. The end of the first dasa will cause distress to father due to troubles from fever. Also his kinsfolk will be mentally disturbed.

मण्डलाधिपतेर्मृत्युरौत्तर्य कलहो महान् ॥२४६१ ॥
गुरुशन्यारकालेच देशे दक्षिणभागगे ।
मण्डलधिपते र्नाशो भवेत् सेनाधिपस्य च ॥२४६२ ॥
चापान्ते मकरादौ च तत्त्रिकोणे गुरौ शनौ ।
पाण्ड्यभूपतिसन्ताप श्चापमृत्युभयं भवेत् ॥२४६३ ॥
मृगानने तत्त्रिकोणे स्फुटयोगं गते शनौ ।
स्ववर्ण नगरे चैव भवेद्राजातरं तथा ॥२४६४ ॥
यस्मिन् देशे पट्टणे ग्रामभे वा
जन्मे वित्ते वाष्ट मे च त्रिकोणे ।
यद्वा कर्मण्यगते सूर्यपुत्रे
राजक्षोभो देशपीडा विपत्तिः ॥२४६५ ॥
एकमेव पुरग्रामपट्टणानां तु सर्वशः ।
ततत्रामानुसारेण फलं ज्ञेयं बुधोत्तमैः ॥२४६६ ॥
असितांशकगे सूर्ये स्थिराशि चतुष्टये ।
स्फुटयोगं गते मन्दे पाण्ड्यभूपतिनाशान् ॥२४६७ ॥
तत्पुत्रस्यभवेन्मृत्युस्तथा सेनाधिपस्य वा ।
मीनत्रिकोणगे मन्दे चोलभूपतिनाशनम् ॥२४६८ ॥
स्वसेनानृपतीनां तृ ह्यरिष्टमिति चादिशेत् ।
सुतेशांशे तत्त्रिकोणे मीने वा गोचरे शनौ ॥२४६९ ॥
स्ववासदेश नृपतेर्व्याधिं वा नाशमीरयेत् ।
अष्टमे गोचरे मन्दे भाग्येशांशेऽथ यदि ॥२४७० ॥
स्वराजज्ञातिवर्गेण क्लेशं प्राप्नोति भूरिशः ।

2461 - 2470½. Irrelevant: The head of the region will die and a war will break in the northern part of the country. In the periods of Jupiter and Saturn, the king in the southern part of the country and the army chief will perish. When Jupiter and Saturn journey in the end of Sagittarius or in the beginning of Capricorn, the land of Pandya kingdom will be in grief and there will be fear of untimely death. Saturn's transit in the end of Capricorn or a trine thereof will cause a change of ruler. Saturn in the ascendant, 2nd, 8th or 10th will bring sorrow and danger to the king. The Sun in one of the four immovable signs, with a Navamsa of Venus ..... while the planet Saturn transits a trine ..... the king of Pandya country will be destroyed. The king's son and the army chief will face untimely death. When Saturn transits Pisces or the sign identical with the Navamsa occupied by the 5th lord, the king of the native's country will incur diseases and be destroyed. When Saturn comes to the 8th, or the Navamsa of the 9th lord, there will occur quarrels among the king's relatives.

द्यूनाधिपदशाकाले भाग्यधिपतिभुक्तिषु ॥२४७१ ॥
असितांशे प्रजातस्य स्त्रीप्रजालाभमाधिशेत् ।
राहुदोषेण वा पश्चात् सन्तानप्रतिबन्धकम् ॥२४७२ ॥
कालान्तरे सुतप्राप्तिं केचित्पक्षे विनिर्दिशेत् ।

2471 - 2472½. One born in Aries ascendant with a Navamsa of Venus will gain daughters in the Dasa of the 7th lord (Venus) during the sub period of the 9th lord (Jupiter). Due to blemish caused by Rahu, subsequent child births will be obstructed. After delay, he will obtain a son according to some.

सुताधिपदशायां तु सुखाधिपतिदायगे ॥२४७३ ॥
राजान्तरवशाद्भाग्यमुद्योगप्राप्तिमादिशेत् ।
स्वपितृव्ययुतः कश्चित् क्लेशं चेद्दशवत्सरम् ॥२४७४ ॥
पश्चात् प्राबल्यमाप्नोति बन्धुवर्गे श्रिया युतम् ।
विपद्दाये पित्ररिष्ट त्रयोविंशतिवत्सरे ॥२४७५ ॥
सप्तविंशेऽथ वा चेति कुटिलांशोद्भवस्य च ।
मेषे शनिस्थिते काले मीने वापितृनाशनम् ॥२४७६ ॥

2473 - 2476. (a) The sub period of the 4th lord in the Dasa of the 5th lord will bring professional fortunes under a changed ruler.

(b) For about ten years, his paternal uncle's son will be in difficulties after which he will prosper and the kinsfolk will make wealth.

(c) During the 33rd or 27th year of age, in the 3rd dasa, the native's father will be endangered. At that time Saturn will be in transit in Aries or in Pisces.

सप्तमे मकरे माता परलोकं प्रयास्यति ।
पञ्चमे सोदरक्लेशं प्रत्यग्दाये सुतामयम् ॥२४७७ ॥
ज्ञातिवर्गे मनस्तापं खपितृव्यसुतामयम् ।
जन्मे शनिस्थिते काले द्वादशान्तेऽथवा यदि ॥२४७८ ॥
धनाधिपदशाकाले पितृव्यक्लेशमादिशेत् ।
सुखधिपदशाया तु रन्ध्राधिपतिदायगे ॥२४७९ ॥

अपमृत्युभयप्राप्तिः पितृव्यस्य विनाशनम्।
रन्ध्रेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥२४८० ॥
प्रत्यग्दाये कुंतलांशे त्वपमृत्युभयं महत्।
चापे शनिस्थिते काले वातरोगप्रपीडितः।
पुत्रिकोद्वाहमाप्नोति पौत्रलाभं विनिर्दिशेत् ॥२४८१ ॥

2477 - 2481. (a) Saturn's transit in the 7th (read 10th) in Capricorn will cause mother's death.

(b) Troubles to co-born, mental distress to relatives and destruction of a paternal uncle will result the transit of Saturn in the 5th (in Leo).

(c) When Saturn moves in the ascendant or in the end of the 12th during the Dasa of the 2nd lord, the person's paternal uncle will be in grief. If the Dasa of the 4th lord (the Moon) and the sub period of the 8th lord (Mars) be in operation, paternal uncle will be endangered by fear of untimely death.

(d) Saturn in transit in the sign identical with the Navamsa occupied by the lord of the 8th (Mars), the native of Kuntala Nadiamsa will be greatly endangered by fear of untimely death provided the Dasa is the 5th one.

(e) When Saturn transits in Sagittarius, he will be troubled by windy diseases. But his daughter will beget married and he will obtain a grand-son.

मीने धनुर्युवतियुग्मगतेऽर्कपुत्रः
सौम्यैर्युतो वा बलिभिस्त्ववलोकितो वा।
दुर्भिक्षशस्त्रानलचोरभयानि यानि
प्रोक्तानितानि न भवन्ति भवन्ति पापैः ॥२४८२ ॥

2482. Irrelevant: Transit Saturn in Pisces, Sagittarius, Virgo and Gemini, as the case may be, and in association with or aspect to a strong benefic will cause famine and fear from fire and thieves.

कन्याचक्रदशासंधिकाले क्लेशफलं विदुः।
प्रत्यग्दाये शुक्रचक्रे देहकार्श्यं विनिर्दिशेत् ॥२४८३ ॥
कुन्तालांशे गते चन्द्रे दशायां देहराशिगे।
पापग्रहाक्रान्तकाले क्रुरमासे रुजातुरः ॥२४८४ ॥
तद्दोषपरिहारार्थं शान्ति कुर्याद्यथाविधि।
अष्टविंशोत्तरशतं चतुष्षष्टिपलंच वा ॥२४८५ ॥
द्वात्रिंश त्पलमात्रं वा गृहीत्वाकांस्यपात्रकम्।
राजतं चन्द्रबिम्बं च पलषोडशसंयुतम्।
तण्डुलं षोडश प्रस्थं द्विगुण परिगृह्य च ॥
मण्डपं च तथा कृत्वा वस्त्रैराच्छाद्य चोपरि।
कांस्यपात्र च निक्षिप्य चन्द्रस्य प्रतिमां क्षिपेत् ॥२४८६ ॥
धूपदीपार्घ्य युक्तैश्च पुष्पगन्धाक्षतादिभिः।
स्वर्णपुष्पैर्विशेषेण पूजयेदमृताक्षैरः ॥२४८७ ॥
सौवर्णसूर्य प्रतिमां ताम्रपात्रे निधाय च।
पूर्वोक्तविधिना पूजामाचरे दिन्दुना समम् ॥२४८८ ॥
परमान्नं भागवतो भानो नैवेद्यमाचरेत्।
शरावनीतं क्षीरान्नं कदलीफल मिश्रितम् ॥२४८९ ॥
नैवेद्यमिन्दोः कलयन् मुच्यते ह्यापृमृत्युतः।
यश्चरेदुक्तविधिना परिहारं समन्त्रकम् ॥२४९० ॥
तस्य रोगा विनश्यन्ति ह्यायुश्च परिवर्धते।
बालारिष्टं च न भवेदपमृत्युभयं च न ॥२४९१ ॥
ऐश्वर्य वर्धते नित्यं कीर्तिः स्यादनपायिनी।
नित्यवंशाभिवृद्धिः स्याद्भवेच्छत्रुपराभवः ॥२४९२ ॥
स्वपुत्रिका समाङ्गल्या भर्तृसौख्यवती भवेत्।
चन्द्रसूर्यप्रसादेन वाञ्छितार्थो भवेत् सदा ॥२४९३ ॥
एव संपूज्य विधिवत् प्रतिमाधिकदक्षिणाम्।
दद्याच्च ज्योतिषज्ञाय ह्यर्केन्दुप्रतिमां तथा ॥२४९४ ॥
तेन दानेन चन्द्रार्की सुप्रसन्नौ दयान्वितौ।
दिशेतां दीर्घमायुष्यं स्वदशासु स्वभुक्तिषु ॥२४९५ ॥
क्रूरग्रहदशाकाले गोचरे क्रूरकालगे।
क्रूरग्रहान्तरे चैव च इंद दानमाचरेत् ॥२४९६ ॥
चन्द्रसूर्यप्रसादेन तस्य सर्वे शुभप्रदोः।
आयुरारोग्यसौभाग्यं दिशेयुः कीर्तिमुत्तमम् ॥२४९७ ॥
इदं रहस्यं पापघ्नं लोकानां हितकारणम्।
नारदेन सुताऽध्याये कथितं परमर्षिणा ॥२४९८ ॥
तेनाच्युताय विप्राय प्रसन्नेनाभिभाषितम्।
तां पूजामाचरेत् प्राज्ञो मनुजः स. सुखी भवेत् ॥२४९९ ॥
मृत्युञ्जयं महामन्त्रं जपेद्वप्रमुखैः सुखी।
मार्कण्डेयः पुरा जप्त्वा मृत्युपाशाद्विमोचितः ॥२५०० ॥
मण्डलं वा तदर्धं वा जपेन्मृत्युविनाशानम्।
आयुरारोग्यसौभाग्यवृद्धिस्तस्य दिने दिने ॥२५०१ ॥

2483 - 2501. (a) The learned prescribe difficulties in the junction periods of two Kala Chakra Dasas.

(b) Physical emaciation is denoted in the 5th dasa. (The term "Sukra Chakra" is to be excluded for better understanding.)

(c) Should the Moon be in Kuntala Nadiamsa, the transit of malefics in Deha Rasi will cause

diseases of the body, coinciding with adverse solar movements. To overcome this blemish, remedies should be resorted to.

(d) Remedies: A vessel made of bell-metal weighing 128 or 64 or 32 Palas should be obtained in which an image of the Moon-God made of silver, weighing 16 Palas should be placed on rice grains of 16 Prasthas and should be covered with clothes, in a pavilion and should be worshipped with incense, lamps and flowers. The image of the Sun-God made of gold should also be placed in a copper vessel and worshipped as stated earlier for the Moon-God. The Sun-God should be offered rice boiled in milk with sugar while the Moon-God should be offered with rice cooked in milk mixed with plantains following which the fear of untimely death will vanish. Reciting the remedial Mantras as per rules will destroy diseases and increase life-span. Then there will be no infantile mortality, nor untimely death. His wealth and fame and dynasty will grow. His enemies will be humiliated. His daughter will enjoy long marital life and husband will live long. By praying to the Sun and the Moon, one's desires will always be fulfilled. By the donation of the images of the Sun-God and Moon-God to an astrologer, these Gods will be well-pleased and will bless the person with longevity. These donations should be given away in the dasa periods of the luminaries, or during malefic planets' periods, or during malefic transits or in bad times. With the mercy of the Sun and the Moon, the native will ever enjoy auspicious effects. Longevity, health, fame etc. will prevail in an excellent manner. This sin-destroying secret has been revealed by sage Narada for the welfare of the world. These are spoken by the Brahmin Achyuta with happiness. Those wise men who perform this worship will live happily. Mrityunjaya Maha Mantra should be got recited with the help of a Brahmin. Once upon a time, Markandeya recited this and got relieved of the noose of death. By reciting this for 48 or 24 days, death will be destroyed. As a result, longevity, health and prosperity will grow day by day.

कुन्तलांशकगे चन्द्रे कुटिलांशोद्भवस्य च।
सूर्यचन्द्रप्रसादेन तुलाचक्रे प्रियं वदेत् ॥२५०२॥
नूतनग्रहनिर्माणं ज्ञातिवर्गे सुतोत्सवम्।
पितृव्यपुत्रयोगेन धनलाभं विनिर्दिशेत् ॥२५०३॥
मीनभुक्त्यमन्तमारभ्य कीटान्ते भुक्तिकालके।
त्रिपञ्चाशात् परं मृत्युः सार्धे द्विवत्सरेभवेत् ॥२५०४॥

2502 - 2504. One born in Aries ascendant,, Kutila Nadiamsa, with the Moon in Kuntala Nadiamsa will be happy in the Dasa of Libra - Venus due to the mercy of Sun God and Moon God. He will construct a new house. His relatives will celebrate birth of a child. He will make money with the help of his paternal uncle's son. In the sub period of Pisces or Scorpio, he will incur death. From the age of 27, he will be in danger for a period of 2 years.

Notes: For Kuntala Nadiamsa (also known as Kunda Nadiamsa), please consult notes under sloka 3051, p. 39 of Book 2.

अष्टमधिप भौमस्य दशायां शनिभुक्तिषु।
मेषलग्ने प्रजातस्य कालमृत्युर्भविष्यति ॥२५०५॥

2505. The native of Aries ascendant will face death in the sub period of Saturn in the dasa of 8th lord Mars.

यद्दृष्टे शनियुतेऽथ दृष्टे जातस्य वा तस्य भवेच्च कष्टम्।
योगद्वयं स्यान्निधनं यदेको
योगस्तथा मृत्युसमत्वमाहुः ॥२५०६॥

2506. One with Saturn's aspect or association in respect of the 6th or 8th house will be in difficulties. Should the two be in operation (i.e. Saturn in the 6th aspecting 8th, instead of being in the 8th), death will occur. One of these in existence (i.e. Saturn in the 8th) will cause difficulties equal to death.

वृश्चिकांशे व्यये शुके स्वोच्चे दुर्गतिभागगे।
देहान्ते नरकं याति कुटिलांशसमुद्भवः ॥२५०७॥

2507. Venus exalted in the 12th with Scorpio Navamsa will consign the said native to hell after death.

गुरुतृतीयपर्याये मीनादौ श्रियमश्नुते।
तुलादौ व्याकुलं चैति मेषादित्रिषु व सुखम् ॥२५०८॥

2508. Jupiter's third round of transit in the initial part of Pisces will cause wealth. In the initial part of Libra distress will be caused. In the 3 signs commencing Aries, he will produce happiness.

स्वजन्मराशिमारभ्य शनिचारेण योजयेत् ।
गोचरे शनिचारेण राश्युक्तफलमादिशेत् ॥२५०९ ॥

2509. When saturn transits the various signs commencing from the Moon sign, results prescribed for the various positions be declared.

लग्नाद्वा चद्रलग्नाद्वा रन्ध्रेशांशत्रि कोणगे ।
पापवेधाक्रांन्तकाले सामान्यफलमादिशेत् ॥२५१० ॥
तत्कालगोचरग्रहस्थितिजन्मकाल-
लग्नस्थिति समावलोक्य च सूक्ष्ममदृष्टया ।
अन्तर्दशाधिपदशेशबलं च बुद्धवा
निर्णीय तादृशफलं विफलं च ब्रूयात् ॥२५११ ॥

2510 - 2511. Note the 8th lord from the ascendant or the Moon sign and note in which Navamsa the said 8th lord is placed. When Saturn transits the sign identical with that Navamsa or a trine, with Vedha (obstruction in transit) by a malefic, moderate results (instead of completely good results) be declared. Planetary positions prevailing at the time of the said transit and those of the birth should be minutely examined. Strengths of the dasa lord and sub period lord should also be studied. Otherwise the effects will be futile.

ये ग्रहाजन्मकाले तु यस्मिन् राशौ स्थितिं गताः ।
तस्मिन् राशौ दशारम्भे गतास्ते शुभदायिनः ॥२५१२ ॥

2512. If a planet, at the time of commencement of its dasa, attains its natal position (signwise) in transit, then its dasa will prove auspicious.

Notes: This is a useful clue for analysing the possible good of a particular dasa. Say Mercury dasa commences at a certain time. If transit Mercury reaches the sign occupied by him at birth, his dasa will deliver auspicious results.

लग्नाद्वा चन्द्रलग्नाद्वा गोचरे लाभगे तमः ।
तस्मात् सूर्यबलाभावन्मासि प्राणभयं भवेत् ॥२५१३ ॥

2513. When Rahu is in transit in the 11th counted from the Moon or the ascendant, the transit Sun becoming weak will bring about the death of the native.

जन्मद्वादशरन्ध्रगेसति महाक्रूरेऽति पापे शनौ
प्राप्ते कष्टदशाविरामसमये तत्कालचक्रेऽथ वा ।
कालान्तकेऽभिषेचनं च ह्यथवा मृत्युञ्जयप्रार्थनं
यद्वा स्वर्णसुदर्शनाय विधिवत् पूजाप्रदानं चरेत् ॥२५१४ ॥
य इदं परिहारं तु कुरुते श्रद्धयान्वितः ।
तस्येदं विजयः श्रेयः कीर्तिरन्यादृशी भवेत् ॥२५१५ ॥

2514 - 2515. General: Note a great malefic moving in the ascendant, 12th or the 8th. Saturn in transit should also be exceedingly adverse, and the Dasa should be one capable of causing difficulties. Then prayer to Lord Mrityunjaya should be offered or worship and donation of a golden image of Sudarsana (the disc of Lord Vishnu) should be undertaken. If this remedy is done with devotion, one will acquire success, benefits and fame.

जन्मकालग्रहस्थित्या दशेशस्यबलेन च ।
ग्रहचारेण वक्तव्यं शुभाशुभफलं नृणाम् ॥२५१६ ॥

2516. General: Auspicious and inauspicious effects should be applied based on the positions of planets at birth and the strength of the lord of the Dasa concerned.

लाभाधिपांशगे जीवे भाग्येशांशकगेऽथ वा ।
गोचरे सौख्यमाप्नोति ह्युद्योगधनवान् भवेत् ॥२५१७ ॥
धनेशांशे तत्त्रिकोणे लाभेशांशत्रिकोणेगे ।
स्फुटयोगं गते जीवे धनलाभं विनिर्दिशेत् ॥२५१८ ॥
धनेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
लाभेशांशे तत्त्रिकोणे ज्ञातिवर्गे महाविपत् ॥२५१९ ॥
स्वदारदेहजड्यादि प्रत्यक्तारदशान्त्यगे ।
प्रबलज्ञातिसन्तापं दारवंशे ह्यरिष्टदम् ॥२५२० ॥

2517 - 2520. General: (a) When Jupiter transits the sign identical with the Navamsa occupied by the 11th lord or the 9th lord, happiness, employment and wealth will occur.

(b) Wealth will come to pass if the said transit is in a sign that is identical with the Navamsa occupied by the 2nd lord or the 11th lord.

(c) Should Saturn replace Jupiter as at "b" above, the person's relatives will be greatly endangered.

(d) Aries Ascendant - Kutila Nadiamsa: The end of the 5th dasa will produce sickness to the native's wife. His relatives will be in great distress and in-laws will be subjected to evils.

देहधर्मव्ययेशानां स्फुटयोगं गते गुरौ ।
चन्द्रे वाप्यथवा सौम्ये पुण्यतीर्थाटन भवेत् ॥२५२१ ॥
देवतादर्शनं चैव देवब्राह्मणपूजनम् ।

तत्तत्काले गोचरेषु फलान्यूह्यानिसूरिभिः ॥२५२२ ॥

2521 - 2522. Mercury, the Moon or Jupiter transiting the degree represented by the sum total of the longitudes of ascendant lord, 9th lord and 12th lord (i.e. of Mars and Jupiter) will cause visits to shrines for dips in sacred rivers. The native will offer prayers to gods and will worship Brahmins as well. The learned should guess these effects based on the transits occurring at that time.

मीनशुक्रदशाकाले मकरे रविभुक्तिषु ।
सेतुस्नानफलप्राप्तिं जातकस्य विनिर्दिशेत् ॥२५२३ ॥

2523. During the Dasa of Venus who at birth is placed in Pisces and in the sub period of the Sun, one will take dips in the Setu.

चापान्ते मिथुनान्ते वा तन्मध्ये वा शनौ स्थिते ।
कुटिलांश प्रजातस्य राजोपद्रवं मादिशेत् ॥२५२४ ॥

2524. One born in Kutila Nadiamsa will face royal wrath when Saturn moves in the end of Sagittarius or Gemini or when Saturn is between these signs.

प्रत्यग्दाये मध्यखण्डे पञ्चमे गोचरे शनौ ।
षष्ठांशे व्याकुलं चैति सप्तमे प्राणसंशयम् ॥२५२५ ॥
पूर्वोक्तशान्तिकार्येण ह्यरिष्टशतनाशनम् ।
आयुरारोग्यसौभाग्यं राजप्रीतिशुभावहम् ॥२५२६ ॥

2525 - 2526. In the course of the 5th dasa, Saturn moving in the 5th or 6th from the ascendant will cause much distress. In the 7th, the planet will cast doubts on the very survival of the native. If remedies stated earlier (vide slokas 2485 - 2581 supra) are performed, the evils of Saturn will be destroyed and the person will enjoy life-span, health and prosperity, apart from auspicious effects through royal patronage.

वत्सरे वाष्टपञ्चाशे निधनेशदशान्त्यगे ।
क्रूरमासे कालमृत्युर्गुरुभौमार्कवासरे ॥२५२७ ॥
नाडिपञ्चग्रहफलं कुटिलाशोद्भवस्य च ।
रन्ध्राधिपदशामृत्युं यावज्जीवं सुभाग्यवान् ।
प्रस्तारान्तर्दशामार्ग फलं विस्तारमुच्यते ॥२५२८ ॥

2527 - 2528. The end of 8th lord's Dasa, in the 58th year will bring about death on a day ruled by Jupiter, Mars or the Sun. These are effects of "Pancha Graha Nadi" for a native of Kutila Nadiamsa. His death will occur in the 8th lord's dasa. He will enjoy prosperity throughout his life. Effects should be understood in detail with the help of sub periods.

पञ्चग्रहनाडी फलम् ।
सुखाधिपे सुखस्थाने दशायां सुखंजीवनः ।
नूलगोहस्य निर्माणं धनधान्यादिक भवेत् ॥२५२९ ॥

2529. Aries Ascendant - Kutila Nadiamsa: If the 4th lord (the Moon) is in the 4th house, her Dasa will give a happy life. The native will construct a new house and will enjoy wealth and grains (food comforts).

पापांशगे सुखाधीशे पापग्रहनिरीक्षिते ।
क्रूरकाले तद्दशायां स्वराजोपद्रवो भवेत् ।२५३० ॥

2530. Should the 4th lord be in a malefic's Navamsa and be in aspect to a malefic, one will incur royal wrath in the Dasa of the 4th lord.

सुखेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
सुखेशदृष्टिराशौ वा नृपतिक्षोभमादिशेत् ॥२५३१ ॥
कर्मेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ।
कर्मेशदृष्टिराशौ वा सोदरभ्रातृनाशनम् ॥२५३२ ॥
क्रूरमासे च तत्पूर्वे स्वपितृव्यसुतामयम् ।
ज्ञातिशोकफलप्राप्तिमशुभं तत्र निर्दिशेत् ॥२५३३ ॥
ज्ञातिवर्गे सुतारिष्टं बन्धुवर्गे सुतक्षयम् ।
सहोदरभ्रातृपीडां मातृशोकां विनिर्दिशेत् ॥२५३४ ॥

2531 - 2534. (a) One will incur difficulties from the king when Saturn comes into the sign represented by the Navamsa occupied by the lord or the sign that is aspected by 4th lord (at birth).

(b) Saturn's similar transit involving the 10th lord will destroy one's co-born. Prior to this, his paternal uncle's son will be destroyed in a month denoted by the Sun's adverse transit. There will be loss of progeny in the relatives' circle, and troubles to co-born and mother.

षष्ठाष्माधीशभुक्तौ सुखाधिपतिदायगे ।
राजामात्यजनस्नेहमुद्योगादिधनागमम् ॥२५३५ ॥
ततः पश्चादेहजाङ्यं भ्रातृपुत्रस्यनिर्दिशेत् ।
तद्गोचरे शुभे जीवे शुभसन्तापमाप्नुयात् ।
जीवे शनियुते काले पुत्रपीडां मनोव्यथाम् ॥२५३६ ॥
अन्तर्दशाधिपे दुष्टे गोचरे क्रूरमासगे ।

स्वजनात्मप्रपीडादि भवेद्बन्धुनृपव्यथा ॥२५३७ ॥

2535 - 2537. (a) During the Dasa of the 4th lord (the Moon) and the sub periods of the lords of the 6th and 8th (i.e. Mercury and Mars), the native will befriend the king and minister and will gain work and wealth. Following these, his brother's progeny will incur physical illness.

(b) When Jupiter comes to the 9th, the native will obtain excellent progeny.

(c) The time of Saturn - Jupiter conjunction in transit will cause evils to his progeny and distress to him.

(d) The lord of the sub period being in adverse transits will cause evils to the native's kinsfolk and royal wrath to him.

Notes: (d) This part of the text is corruptly constructed and the relevant translation is made taking available hints in the text.

स्वसेवितनृपद्वारे दायदिकलहः कचित् ।
अन्तश्छिद्रकलापेन स्वराजामात्यव्याकुलम् ॥२५३८ ॥

2538. Irrelevant: There will be strife among the king's relatives to some extent. Due to internal confusion, the king and minister will be distressed.

कर्माधिपान्तरे काले षष्ठेशस्यान्तरे व्यथा ।
इदमेव फलं सत्यं योजयेत् कालवित्तमः ॥२५३९ ॥

2539. The sub periods of 10th, 6th and 8th lords (in the Dasa of the 4th lord) will cause distress. These results will bear truth according to the learned in astrology.

पुत्रिकोद्वाहसन्तोषं षट्चत्वारिंशवत्सरे ।
जामातृसौख्यमाप्नोति स्वगेहे श्रियमश्नुते ॥२५४० ॥

2540. During the native's 46th year, his daughter will beget married. His son-in-law will be happy and wealth will accrue to the subject.

लाभेशांशे तत्त्रिकोणे दृष्टराश्यंशगे ।
जामातृभवनं चैव जन्मर्क्षं च विनिर्दिशेत् ॥२५४१ ॥

2541. The Moon sign of the son-in-law will correspond to the sign represented by the Navamsa occupied by the 11th lord. Alternatively it could be a trine thereof, or the sign aspected by the 11th lord.

Notes: The 11th is the 5th from the 7th and hence denotes daughter-in-law or son-in-law as the case may be.

लाभे राहुस्थिते काले षष्ठे गोचरगे शनौ ।
राजद्वारे कलापः स्यान्मित्रात्मस्वजनावधि ॥२५४२ ॥

2542. Rahu in the 11th and Saturn in the 6th in transit will cause quarrels apart from distress to friends and relatives.

पश्चात् स्वस्थं महत् सौख्यं ज्ञातिवर्गे शुभाधिकम् ।
सर्वाध्यक्षाधिकारादियोगं प्राप्नोति भूरिशः ॥२५४३ ॥

2543. Afterwards, health (or well-being) will prevail and the subject will be greatly happy. He will beget an authoritative post and will enjoy great prosperity.

मण्डलाधिपतेर्मृत्युर्लोके दुर्भिक्षजं मयम् ।
शनिभुक्तौ फलं ब्रूयात् सुखाधिपतिदायगे ॥२५४४ ॥
बुधान्तरे स्वसामन्तसन्तानप्राप्तिमादिशेत् ।
मन्दान्तरे ज्ञातिवर्गे पुत्रलाभं महत् सुखम् ॥२५४५ ॥
अपमृत्युभयप्राप्तिः शान्त्या शन्ति प्रयास्यति ।
सुखाधिपदशाकाले पापवेधग्रहान्तरे ॥२५४६ ॥
मेषलग्ने प्रजातस्य मातृनाशं विनिर्दिशेत् ।
चन्द्रे शत्रन्तरे काले शुभाशुभफलं समम् ॥२५४७ ॥
जामातृवंशे सन्तापं ज्वरोपद्रवमादिशेत् ।
चन्द्रे शुक्रान्तरे काले कुन्तलांशसमुद्भव ॥२५४८ ॥
अतीव सौख्यमाप्नोति क्रूरमासं विना सुखम् ।
शुक्रान्तरे क्रूरमासे राजोपद्रवमादिशेत् ।
विप्लवेन मनस्तापं पश्चात् स्वस्थं शुभाशुभम् ।
पञ्चाशद्वत्सरे क्लेशं कालचक्रदशाभयम् ।
कालचक्रप्रदानेन देहारोग्यं विनिर्दिशेत् ॥२५५० ॥

2544 - 2550. (a) Irrelevant: In the sub period of Saturn during the Dasa of the 4th lord, the head of the region will die and famine will spread. In the sub period of Mercury, the subordinate king will obtain progeny.

(b) The sub period of Saturn (in the 4th lord's Dasa), there will be gain of a son in the relatives' circle.

(c) The native will in the said sub period be endangered with fear of untimely death for which remedies be resorted to.

(d) In a malefic's sub period, during the 4th lord's Dasa, the native's mother will die.

(e) The Dasa of the Moon (4th lord) will give equal measure of good and bad effects in the sub

periods ruled by inimical planets. There will be grief in the family of the native's son-in-law due to trouble from fever (in the said sub periods).

(f) In the sub period of Venus during the 4th lord's dasa, extreme happiness will prevail except in the months denoted by adverse solar movements. In such excepted months, troubles from king will come to pass apart from distress. Later on, well-being and auspicious and inauspicious effects will follow. In the ensuring year, troubles will occur to the native. By donating an image of the zodiac, health will recur.

Notes: (e) In the first line of sloka 2550, the term "Kalachakra Dasamayam" has no proper meaning and is out of context.

चन्द्रसूर्यान्तरे काले पुत्रिकासौख्यमश्नुते ॥२५५१ ॥
पुत्रोत्सवफलप्राप्तिर्बन्धुवर्गे मनोव्यथा ।
ग्रन्थान्तरे कुन्तलांशे सुखाधिपदशान्त्यगे ॥२५५२ ॥
स्वजनात्मजनक्लेश राजवर्गेऽप्यरिष्टंदम् ।
कुम्भेशनिस्थिते काले दशासन्ध्योर्मनोव्यथाम् ॥२५५३ ॥
विप्लवेन मनस्तापं स्वपितृव्यस्य नाशनम् ।
लग्नाधिपदशाकाले कुन्तलांशोद्भवस्य च ॥२५५४ ॥
धनधान्यसुत प्राप्तिराजप्रीतिं विनिर्दिशेत् ।
पितृव्यसुतयोगेन स्वप्राबल्यं धनागमम् ॥२५५५ ॥
प्रबलोद्योगसौख्याप्तित्पुत्रः प्रबलो भवेत् ।
कुजान्तरे क्रूरमासे व्रणोपद्रवमादिशेत् ॥२५५६ ॥
कुम्भे शनिस्थिते काले पुत्रिकाज्वरमादिशेत् ।
सूतिकावातरोगेण देहजाड्यं मनोव्यथाम् ॥२५५७ ॥
पश्चादारोग्यमाप्नोति देहकार्श्यं विनिर्दिशेत् ।
लाभाधिपदशाकाले पापभुक्तौ तथा भवेत् ॥२५५८ ॥
क्रूरमासे देहजाड्यं शान्त्या शान्तिं प्रयास्यति ।
रन्ध्राधिपदशाकाले रन्ध्रस्थ पापदायगे ॥२५५९ ॥
अपमृत्युभयप्राप्ति स्वजनारिष्टमादिशेत् ।
लग्नाधिपदशाकाले भाग्याधिपतिभुक्तिषु ॥२५६० ॥
राजामात्यप्रसादेन धनलाभं विनिर्दिशेत् ।
स्वगेहे शुभसन्तानं बन्धुवर्गे विनिर्दिशेत् ॥२५६१ ॥

2551 - 2561. (a) During the "sub periods" of the Moon and Sun (read the sub period of the Sun, in the Dasa of the Moon), the native's daughter will be happy and will obtain a male issue. His son-in-law will also remain pleased.

(b) The junction period of the Dasas of the 4th lord (Moon) and Mars will cause auspicious events in the family and birth of a son will occur. But the native's kinsmen will be distressed (for other reasons).

(c) In another text, for birth in Kuntala Nadiamsa, Aries ascendant, the end of the 4th lord's Dasa is said to inflict sadness on relatives and evils in (from) king's circles.

(d) Saturn moving in Aquarius in the junction periods of Moon and Mars will cause mental worries. The native's paternal uncle will die.

(e) The Dasa of ascendant lord Mars will cause wealth, grains (food comforts) and progeny. The person will prosper on account of his association with the son of his paternal uncle. He will obtain prosperous employment and a good son.

(f) The sub period of Mars (in the dasa of Mars) will cause fever during the periods of adverse movements of the Sun.

(g) Saturn's stay in Aquarius will cause (troublesome) fever to one's daughter. She will incur illness due to delivery of a child and also mental distress. Later on her health will be normal but she will be emaciated. Malefics' sub periods in 11th lord's (i.e. Saturn's) Dasa will also cause these events. Illness will occur with adverse movements of the Sun. Suitable remedies be performed.

(h) If a malefic is placed in the 8th, its sub period in the Dasa of the 8th lord will produce fear of danger from untimely death.

(i) Financial gains will occur through ministerial favours in the sub period of the 9th lord during the Dasa of the lord of the ascendant. Further there will be an auspicious event in the form of child birth in the relatives' circle.

मीने त्विष्टफलप्राप्तिर्धर्मेशेऽतिधनागमम् ।
रन्ध्राधिपदशाकाले मन्द भुक्त्यन्त्यकालगे ॥२५६२ ॥
मेषलग्ने प्रजातस्य प्रबलज्ञातिनाशनम ।
भूसुतस्य दशाकाले दुःखी स्याद्रविजान्तरे ॥२५६३ ॥
जीवान्तरेऽपमृत्युश्च जीविते दैर्घ्यमायुषः ।
कुन्तलांशे प्रजातस्य प्रत्यक्षं देवकेरलम् ॥२५६४ ॥

2562 - 2564. (a) For an Aries native, when the 9th lord (Jupiter) moves in Pisces, desires will be fulfilled and he will have advent of wealth.

(b) In the sub period of Saturn during the Dasa of the 8th lord (Mars), important relatives will die.

(c) The sub period of the Sun in the Dasa of Mars will cause grief.

(d) The sub period of Jupiter in the said Dasa will usher fear of untimely death.

Results stated for Kuntala Nadiamsa in Deva Keralam will bear truth.

चद्रक्रियावस्थाफलानि

इतः पर प्रवक्ष्यामि तत्कालेन्दुपरिस्फुटम् ।
चराचरत्रिलोकस्य यज्ज्ञानेन फलं लभेत् ॥२५६५ ॥
लाभालाभौ सुखं दुःखं जीवितं मरणं तथा ।
विजयापजयं चैव गमनागमनं तथा ॥२५६६ ॥
लोकोचितां तथा वृष्टि राजावस्थादिकौतुकम् ।
एतत् सर्वं तथा चान्यं जायतेन्दुपरिस्फुटात् ॥२५६७ ॥
ततश्चन्द्रस्यावस्थादिनिर्णयः कथ्यतेऽधुना ।
तथा विलिप्तिकाः सृष्टा हृत्वा शिष्टा नतैस्तथा ॥२५६८ ॥
पञ्चे दुःखगुणासङ्ख्या ३००, १५, ३०, ।
हृत्वा व्योमाग्रचान्विता ७०००, ३०, १८२, ७०००, ७ ॥२५६९ ॥

2565 - 2569. Chandra Kriya, Chandravasthas & Effects: After this, I now state of the (Avasthas, Kriyas etc. based on the) Moon's longitude at a given time by the knowledge of which effects for the movable and immovable beings of the 3 worlds can be obtained. Gain, absence of gains (i. e. loss), enjoying happiness, grief, life, death, success, defeat, coming, going, rains sufficient for the country and pleasures like royal state *et cetera* - these and many other things ought to be known of the Moon. I now tell ways of deciding the Avasthas of the Moon. In that manner, the viliptikas (1/3600th part of a degree which means of arc of a second,) be found out ... deducted .... remainder ... 300, 15, 30 and 5 accompanied by 7000, 30, 182, 7000 and 8 .....

Notes: This portion attempts to instruct us on the 12 Avasthas and 60 kinds of Kriyas of the Moon. These and the 36 Chandra Velas are well-discussed coherently in texts like *Phala Deepika* and by Pandit late M. R. K. Bhat in his work, *Essentials of Horary Astrology*. But in our present text, in these slokas there are utter confusion, copying errors and the like making the clues unintelligible.

The methods of finding out Chandra Kriyas and Chandra Avasthas are put forth by me as under so that my job is completed in a satisfactory manner.

Chandra Kriya (Moon's actions): One Nakshatra is 13° 20' or 800' of arc. Divide 800 by 60 and find out in what part of such a portion is the Moon placed. That will be Chandra Kriya.

Example: Say the Moon is 2° 40' of Aswini, i.e. 160th minute of longitude in Aswini. 160 divided by 60 yields the 3rd Chandra Kriya. The result mentioned for the 3rd Kriya will apply to the Moon's particular position.

Also see slokas 2570 - 2578 *infra* for effects of Chandra Kriyas. Our text gives another methd of Chandra Kriya which are five per sign, and 60 in all for 12 signs, which are found from sloka 2579 onward.

Chandra Avasthas (Moon's states): There are 12 specific Avasthas for the Moon which should be found out by dividing 800 by 12. In which of the 12th part is the Moon located in that particular Nakshatra should thus be known which will tell of Chandra Avastha.

(Similarly for Chandra Vela, the divisor is 36 as there are 36 Chandra Velas, or the Moon's periods.)

These can be used in respect of birth horoscope, query horoscopes, Muhurta etc.

स्थानाद्भ्रष्टस्तपरवी च ह्यन्यस्त्रीसक्त लम्पटः ।
द्यूतकृच्च गजारूढः सिंहासनस्थितरतथा ॥२५७० ॥
नृपतिर्ह्यारिहन्ता च दण्डनेता गुणी तथा ।
निष्ठाणच्छिन्नमूर्धा च क्षतपादकरस्तथा ॥२५७१ ॥
बन्धनस्थो विनष्टसुत नृपतिर्वेदपाठकः ।
सुप्तः सुचरितश्चैव स्मृतिमान् धर्मकार्यवान् ॥२५७२ ॥
सद्वंशो निधिसंयुक्तः श्रुतवंशोऽर्थबोधकः ।
शत्रुहन्ता च रोगी च ह्यरिनिर्जित एवं च ॥२५७३ ॥
स्वदेशाच्चलितो भृत्यो विनष्टार्थक इत्यपि ।
आस्थानी च सुमन्त्री च परदेशपतिस्तथा ॥२५७४ ॥
सभार्यो गजभीतश्च संयुगे भीतिमांस्तथा ।
भयाधिकश्च क्रोडी च ह्यन्नदाताग्निरक्षकः ॥२५७५ ॥
क्षुद्भाधासहितश्चान्नविचरन् मांसभोजकः ।
अस्त्रक्षतश्च सोद्वाहो धृतकञ्चुक द्यूतकृत् ॥२५७६ ॥

राजा च दुःखितश्चैव शय्यास्थो रिपुसेवितः।
मित्रेण युक्तो रोगी च भार्यायुक्तश्च मृष्टाशी ॥२५७७॥
पयःपायी पुण्यकर्ता स्वस्थश्चास्ते सखी तथा।
नक्षत्रे षष्टिकार्याणि चन्द्रस्य तु शुभानि च ॥२५७८॥

2570 - 2578. (Now stated are effects for sixty such Chandra Kriyas). (1) Loss of position, (2) performing penance, (3) attachment to others' women, (4) covetousness, (5) gambling, (6) riding on an elephant, (7) occupying a throne, (8) royal status, (9) destruction of foes, (10) lord of justice, (11) virtuousness, (12) lack of life (state of being dead), (13) bereft of upper portion (or being headless), (14) being with injured feet and arms, (15) being in confinement, (16) loss, (17) kingly status, (18) reader of Vedas, (19) in a state of deep sleep, (20) having a good history, (21) having knowledge of **Smrithi** (or orally transmitted scriptures), (22) charitability, (23) birth in a good family, (24) endowed with wealth, (25) birth in a famous family, (26) teacher of concepts, (27) destroyer of enemies, (28) a sickly person, (29) won over by an enemy, (30) one who goes away from his birth place, (31) a servant, (31) one who loses his wealth, (32) employed in the king's assembly, (33) a good minister or adviser, (34) owner (or usurper) of others' lands, (35) has a wife, (36) fear of elephants, (37) cowardice in fights, (38) very timid in disposition, (39) sportive, (40) giver of food, (41) maintains sacred domestic fire (*"agnipaalaka"* and *"Agnirakshaka"*, i. e. will perform fire rites regularly), (42) troubled by hunger, (43) thinks about food, (44) eats flesh, (45) injured by weapons, (46) blessed with a marriage, (47) holds a ball in his hand, (48) a gambler, (49) a minister, (50) a grieved person, (51) sleeping on a bed, (52) honoured by foes, (53) endowed with friends, (54) sickly, (55) endowed with wife, (56) eats sweet food, (57) drinks milk, (58) performs meritorious deeds, (59) enjoys health and (60) enjoys happiness. The Nakshatra occupied by the Moon should be divided into sixty parts and the good (and bad) be known thus (through 60 Chandra Kriyas).

प्रकारान्तरम–

स्थानाच्च्युतस्तपस्वी च परनारीरतिं गतः।
स्तेयी गजाधिरूढश्च मेषे पञ्चगुणा विधोः ॥२५७९॥
सिंहासनस्थितो राजा राज्ञां मध्यगतस्तथा।
शुत्रहन्तां च सेनानीर्वृषे पञ्चगुणा विधोः ॥२५८०॥
प्राणच्युतो भग्नशिराः पाणिपादव्रणाङ्कितः।
बन्धी तु देहनाशी च युग्मे पञ्चगुणा विधोः ॥२५८१॥
भूपत्वं वेदपाठित्वं मद्यपान विनिन्दिताम्।
धर्मकर्ता च कर्मी च कर्कटे शशिनो गुणाः ॥२५८२॥
सद्वंशजो निधियुतः सुकीर्तियुतवंशजः।
व्याख्याता शत्रुहन्ताच सिंह पञ्चगुणा विधाः ॥२५८३॥
ज्वरार्तः स्थाननाशी च परैर्जितस्तु भृत्यकः।
कन्यास्त्रीसङ्गमे सक्तः कन्यायां शशिनो गुणाः ॥२५८४॥
आस्थानी च सुमन्त्री च ह्यन्यदेशपतिस्तथा।
विवाही च गाजारूढस्तुलायां शशिनो गुणाः ॥२५८५॥
मन्त्री स्वमन्त्रिभिर्योद्धा त्रस्तः समरभीतिमान्।
निद्रायुक्तोऽग्निपालश्च कीटे तु शशिनो गुणाः ॥२५८६॥
क्षुधार्तस्त्वन्नभोक्ता च मांसभुक् चास्त्रताडितः।
निवासीचान्यदेशेषु चापे पञ्चगुणा विधोः ॥२५८७॥
स्वस्त्रियां कन्दुकक्रीडी स्वस्त्रीहस्तग्रहान्वितः।
द्यूती विहारी राजा चा मृगे पञ्चगुणाविधोः ॥२५८८॥
शिशिरः पुण्यदेहश्च मित्रवर्गेणसंयुतः।
चक्रपाणिर्गृहे राजा कुम्भे पञ्चगुणा विधोः ॥२५८९॥
मृष्टाशी क्षीरपायी च पुण्यकर्मकरस्था।
स्वस्थश्चापि सुखी चैव मीने पञ्चगुणा विधोः ॥२५९०॥
चन्द्रस्य द्वादशावस्था राशौ राशौ प्रकल्पयेत्।
नाडीपदे च युक्ताभिरेकादशाभिरेव च ॥२५९१॥

2579 - 2591. Chandra Kriyas (or Chandra Gunas) Based on Signs: There is another kind of Chandra Kriya (which are 5 per sign).

(a) Aries: (1) Loss of position, (2) performing penance, (3) interest in others' women, (4) courage ("Saurya" is the correct text as per another version) and (5) riding on an elephant are the five Gunas of the Moon in Aries.

(b) Taurus: (1) Occupation of a throne, (2) king, (3) being amidst kings, (4) destroyer of enemies and (5) an army-man are the five Gunas of the Moon in Taurus.

(c) Gemini: (1) Loss of life, (2) has broken or curved head, (3) has injured hands and legs, (4) one in confinement and (5) destroyed body are the five Gunas of the Moon in Gemini.

(d) Cancer: (1) Kingship, (2) Study of Vedas,

(3) bad name due to consuming liquor, (4) charitable acts, (5) dutiful are the five Gunas of the Moon in Cancer.

(e) Leo: (1) Birth in a good family, (2) Endowed with wealth, (3) wide-spread fame, (4) commentator and (5) destroyer of adversaries are the five Gunas of the Moon in Leo.

(f) Virgo: (1) Troubled by fever, (2) destruction of place, (3) won by others, (4) servant and fondness for joining girls are the five Gunas of the Moon in Virgo.

(g) Libra: (1) Member of royal assembly, (2) a good minister, (3) lord of another others' lands, (4) a married person and (5) one equal to a person sitting on an elephant are the five Gunas for the Moon in Libra.

(h) Scorpio: (1) Minister, (2) warrior, (3) fears battles, (4) state of sleep and (5) maintains sacred doemstic fire are the five Gunas of the Moon in Scorpio.

(i) Sagittarius: (1) Troubled by hunger (2) eater of food, (3) eater of flesh, (4) pierced by weapons and (5) lives in foreign lands are the five Gunas of the Moon in Sagittarius.

(j) Capricorn: (1) Plays ball with his wife, (2) Holds the hands of his wife, (3) a gambler, (4) wanders for pleasure and (5) a king are the five Gunas of the Moon in Capricorn.

(k) Aquarius: (1) Cool in dispoition, (2) a meritorious person, (3) endowed with friends, (4) devoted to Discus-holder, i.e. Vishnu and (5) being a king are the five Gunas of the Moon in Aquarius.

(l) Pisces: (1) Eats sweet food, (2) drinks milk, (3) performs meritorious deeds, (4) healthy and (5) happy are the five Gunas for the Moon in Pisces.

These states for the Moon in different signs should be understood thus.

Notes: The Moon's positions for every 6 degrees give five various positions as above.

प्रवासनष्टाख्यमृताजयाख्य-
हास्यारतिक्रीडति सुप्तभुक्तिः।
ज्वराह्वयाकम्पितसुस्थिरे च।
द्विष्टकसख्याश्च विथोरवस्थाः ॥२५९२ ॥

2592. Chandra Avasthas: The 12 Avasthas of the Moon should be variously understood. These are: (1) Pravasa (going abroad), (2) Nashta (loss), (3) Mrita (dead), (4) Jaya (success), (5) Haasya (ridiculous or comical), (6) Rathi (enjoying carnal pleasures), (7) Kreeda (sportive) (8) Supta (state of deep sleep or numbness), (9) Bhukti (eating), (10) Jvara (fever), (11) Kampita (trembling) and (12) Susthira (very firm) are the 12 Avasthas for the Moon.

Notes: How these Avasthas are to be calculated is not clearly given. Since certain Avasthas are restricted to Moon's exaltation in the following verses, the confusion is confounded.

सुस्थिरे शुभसंदृष्टे शुभवर्गे स्थिरे विधौ।
सर्वारम्भाः प्रसिध्यन्ति लग्ने च शुभवर्गके ॥२५९३ ॥

2593. If at the commencement of an undertaking the Moon is with benefics' aspects and in benefics' divisions while the ascendant should be in beneficial divisions, the Avastha is Susthira. (As a result, the undertaking will be fruitful.)

भानुक्षेत्रगते मन्दे यदि भौमसमन्विते।
अवस्थाकम्पिते चन्द्रे निग्रही वित्तभीषणः ॥२५९४ ॥

2594. If Saturn along with Mars is in the Sun's sign it gives Kampita Avastha to the Moon, causing restraint and mental terror to the person.

स्वक्षेत्रगते मन्दे यदि भौमसमन्विते।
शोभनं सर्वकार्येषु लाभालाभादि, कर्मसु ॥२५९५ ॥

2595. Should the Moon be in her own sign, it is Jaya Avastha, whereby she will grant success and auspiciousness in all undertakings, and gains and losses (?) in work.

स्वतुङ्गे निशानाथे हास्यावस्था शुभप्रदा।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥२५९६ ॥
कार्यार्थी कार्यसिद्धि च सर्वप्रश्नशुभाशुभम्।
परमोच्चांशगे चन्द्रे रत्यावस्ता शुभप्रदा ॥२५९७ ॥

2596 - 2597. (a) The Moon will be in Hasya Avastha in her sign exaltation sign and will be auspicious, will give a son to the one that seeks a son, wealth to him who seeks it and fruition of efforts in one's undertakings.

(b) Should the Moon be in deep exaltation it is Rathi Avastha, proving auspicious.

क्रूरराशिगते चन्द्रे तदधीशसमन्विते।
प्रवासं कुरुते कार्य विफलं सर्वकर्मणि ॥२५९८ ॥

2598. The Moon will be in Pravasa Avastha, in a malefic's sign along with her dispositor and will destroy one's undertakings.

क्रूरराशिगते चन्द्रे यदि भौमसमन्विते।
ज्वरावस्था ज्वरं तापं शुभदृष्टिः शुभप्रदा ॥२५९९ ॥
क्रूरदृष्टिस्तु मरणं रहस्यं साम्प्रदायिकम।
बुधक्षेत्रगते चन्द्रे यदि भौमसमन्विते।
सुप्तावस्थाविनिर्दिष्टा हानिशोकभयप्रदा ॥२६०० ॥

2599 - 2600. (a) The Moon will be in Jvara Avastha in a malefic's sign along with Mars and will cause fever and heat. If she is, in the process, in aspect to a benefic, she will prove auspicious, i.e. will not cause fever etc. If the Moon as above is aspected by another malefic, death of the person will occur secretively.

(b) The Moon will be in Supta Avastha, in a sign of Mercury when in the company of Mars and will cause harm and grief.

गरुराशिगते चन्द्रे गुरुयुक्तेऽथ वीक्षिते।
भुक्तावस्थादिनिर्दिष्टं सर्वकार्यशुभप्रदम् ॥२६०१ ॥
सुभोजनसुसौख्याप्तिं स्त्रीभाग्यं च सुखानि च।
स्नानदानादिसिद्धिः स्याज्जायते च शुभप्रदा ॥२६०२ ॥

2601 - 2602. The Moon will beget Bhukta Avastha in a sign of Jupiter, with Jupiter's aspect or company which will give auspicious effects in all undertakings, good food, happiness, fortunes in respect of wife, sacred dips and giving away charities.

भृगुक्षेत्रगते चन्द्रे तदीशेन समन्विते।
शुभदृष्टियुते चन्द्रे क्रीडावस्था सुखप्रदा ॥२६०३ ॥

2603. The Moon in a sign of Venus along with Venus and with beneficial aspects will be in Kreeda Avatsha which will bestow happiness.

चरराशिगते चन्द्रे शुभग्रहसमन्विते।
शुभदृष्टियुते प्रश्ने ज्यो जयति निश्चयः ॥२६०४ ॥

2604. If at the time of a query, the Moon is in a movable sign with aspect and company of benefics, it is her Jaya Avastha whereby she will give success to the querist.

स्थिरराशिगते चन्द्रे लग्नेशेन समन्विते।
मिथुनग्रहसंदृष्टे स्थायी जयति नित्यशः ॥२६०५ ॥

2605. The Moon will be in Susthira Avastha in a fixed sign provided she joins the lord of the ascendant and gets the aspect of a planet placed in the sign Gemini. As a result, sure success is denoted.

Notes: This will apply to Aquarius rising with the Moon and Saturn therein as Jupiter is in Gemini. Alternatively to Leo rising with the luminaries therein, and Saturn placed in Gemini.

द्विखभावगते चन्द्रे भृगुभौमाभिवीक्षिते
स्थायी जयमवाप्नोति विपरीते विपर्ययः ॥२६०६ ॥
मेषाळिवृषराशिस्थे चन्द्रे स्थायी जयं लभेत्।
अष्टोत्तरशतावस्था चन्द्रे गच्छत्यहर्निशम् ॥२६०७ ॥
साधयेद्दिनचर्याया फलं सम्यावदाम्यहम् ॥२६०८ ॥

2606 - 2608. (a) The Moon in a dual sign in aspect to Venus and Mars begets Susthira Avastha whereby success is granted. In a situation contrary to this there will be no success.

(b) The Moon in Aries, Scorpio and Taurus will beget Jaya Avastha which will give success (to the querist).

(c) In a day consisting of day and night, the Moon undergoes 108 Avasthas. The effects should be understood with the help of Dina Charyas which I am now explaining below.

Notes: The text concerning Dina charya is apparently missing as the next slokas deal with queries relating to food.

भोजनप्रश्नः प्रवासवस्थागे चन्द्रे प्रौढान्नं लभते बुधः।
लवणं चाधिकं वापि षड्रसैश्च विवर्जितम् ॥२६०९ ॥
अजीर्णभोजनं दुःखं मानसक्षीणभोजनम्।
नष्टास्थायुते चन्द्रे शाकपाकविवर्जितम् ॥२६१० ॥
शुष्काङ्गाशनप्राप्तिस्तु प्रश्नकालवशात् फलम् ॥
मृतावस्थागते चन्द्रे प्रदुष्टं लभते नरः।
अजीर्णस्थ विकासेऽत्र व्याधिपीडां विनिर्दिशेत् ॥२६११ ।

2609 - 2611. Query about Food: If the Moon is in Pravasa Avastha, one gets luxurious food with more salt but bereft of six tastes (Shadrasas). If the Moon is in Nasthavastha, one will not be able to digest the food served; he will be grieved and will mentally decline; the food concerned will be dry and bereft of vegetables etc. all of which should be known through query horoscope. If the Moon is in Mrita Avastha, one will get very inferior food, will

incur indigestion and diseases.

॥ इति चन्द्रावस्था ॥

॥अथ भावफलानि ॥

तृतीयभावनाथानां लग्नाच्चन्द्राच्च कारकात् ।
तत्र भावपतीनां वा ह्यंशेशानामथापि वा ॥२६१२ ॥
स्फुटयोंग गते सौम्ये तत्र योगं विनिर्दिशेत् ।
पापारिनीचगे मूढे त्वशुभं तत्र निर्दिशेत् ॥२६१३ ॥

2612 - 2613. Add the longitudes of the lords of the 3rd counted from the three places, viz. ascendant, the Moon and Karaka (?) or the longitudes of Navamsa dispositors of the said three places. When a benefic transits in the resultant place, Yoga (or prosperity) will occur.

Notes: The present two slokas are apparently defective in composition.

सलाभस्थस्थितिं ज्ञात्वा निर्दिशेत् कालवित्तमः ।
आधानजन्मकर्मार्थसंप्रदायं गुरोर्मुखात् ॥२६१४ ॥

2614. One should know of the beneficial places for transits (viz. Janma, Sampat, Vipat Nakshatras etc.) with the directions of a teacher and apply the effects of planetary transits in Janma Nakshatra group, Karma Nakshatra group and Adhana Nakshatra group.

Notes: There is a popular method of seeing planetary transits, which in particular is in vogue in Andhra and Kerala regions. Janma, Sampath, Vipath, Kshema, Pratyak, Sadhaka, Vadha (or Naidhana), Maitra and Parama Mitra are the nine Nakshatras counted from the birth star. These repeat again twice thus completing 27 stars. However, the 10th Nakshatra from the one occupied by the Moon is specially known as Karma Nakshatra while the 19th one as Adhana Nakshatra. Commencing from Janma Nakshatra, transits are alternatively bad and good. This is just a brief idea and the entire scheme cannot be reproduced here.

While on the subject, I must rectify a mistake of mine committed in the translation of sloka 486, Book 2, vide p. 131. Karmarksha means the 10th star (and not the 10th house), Adhana means the 19th from birth star and not Adhana ascendant, and Vainasa is 8th star and not 8th house. The reader will kindly give forgive me for my lapse.

सुतस्य चन्द्रगुर्वोश्च स्फुटयोम गते शनौ ।
पुत्रप्राप्तिस्तु तत्काले सुतेशे शुभवीक्षिते ॥२६१५ ॥
तत्तत्सुतेशयोगेन पुत्रप्राप्तिं विनिर्दिशेत् ।
सुखदेहाय नाथानां स्फुटयोगं गते शनौ ॥२६१६ ॥
अतिसौख्यं धनप्राप्तिं निर्दिशेत् कालवित्तमः ।
धन देहायनाथानां स्फुटयोगं गते गुरौ ॥२६१७ ॥
लाभं च धनधान्यानां निर्दिशेच्छुभवीक्षिते ।
धनबुद्धिक्षितीशानां स्फुटयोगं गतेशनौ ॥२६१८ ॥
धनधान्यपशूनां च हानिं तत्र विनिर्दिशेत् ।
देहबुद्धिप्रियेशानां स्फुटयोगं गते शनौ ॥२६१९ ॥
कर्मसिद्धिस्तु तत्काले तत्कर्मेशनिरीक्षिते ।
धनकर्मायनाथानां स्फुटयोगं गते गुरौ ॥२६२० ॥
स्त्रीलाभं ह्यथवा भोगं निर्दिशेद्गुरुवीक्षिते ।
वित्तायकर्मनाथानां स्फुटयोगं गते गुरौ ॥२६२१ ॥
प्रभूतधनलाभं च निर्दिशेत् सोमवीक्षिते ।
क्षेत्रादिधनलाभानां स्फुटयोगं गते शनौ ॥२६२२ ॥
स्त्रीलाभं भूमिलाभं च ह्यथवा नरवाहनम् ।
धनभाग्यव्ययेशानां स्फुटयोगं गते शनौ ॥२६२३ ॥
धनहानि महद्दुःखं निर्दिशेच्छुभवीक्षिते ।
देहपुत्रव्ययेशानां पुत्रहानिविनिर्दिशेत् ॥२६२४ ॥

2615 - 2624. Special Rules for Transit: (a) Add the longitudes of the 5th lords counted from the Moon and Jupiter. When Saturn transits the resultant place, birth of a child is to be declared provided the 5th lord at that time is in aspect to a benefic.

(b) Add the longitudes of the 4th lord, 11th lord and ascendant lord. Saturn moving in the resultant place will cause much happiness and acquisition of wealth.

(c) Add the longitudes of the 2nd lord, 11th lord and ascendant lord. Jupiter moving in the resultant place with another benefic's aspect will produce gain of wealth and grains.

(d) Add the longitudes of Mars, 2nd lord and 5th lord. The time of Saturn's transit in the resultant place will harm wealth, grains and quadrupeds.

(e) Add the longitudes of lords of 1st, 5th and 7th. When Saturn's transit occurs in the resultant space, the native will have professional fulfilment. Transit Saturn should then be in aspect to 10th lord.

(f) Saturn's movement, in aspect to Jupiter, in

the space resulting the addition of the longitudes of the lords of the 2nd, 10th and 11th will give gain of a woman (i.e. marriage). Or else one will enjoy pleasures.

(g) Add the longitudes of the lords of the 2nd, 11th and 10th. When Jupiter in transit occupies this space, with the aspect of the Moon, the native will have abundant financial gains.

(h) Add the longitudes of (the lords of) 4th, 1st, 2nd and 11th. Saturn's transit in the resultant space will cause marriage, gain of lands or men-borne conveyances.

(i) Add the longitudes of the lords of the 2nd, 9th and 12th. Loss of wealth, and great grief will result the transit of Saturn in the resultant space. There should, however, be aspect of a benefic on the said Saturn.

(j) Saturn moving in the space caused by adding the longitudes of the lords of ascendant, 5th and 12th will cause evils in respect of progeny.

देहभ्रातृव्ययेशानां भ्रातृहानिं विनिर्दिशेत् ।
परभ्रातृव्ययेशानां भ्रातृहानिं विनिर्दिशेत् ॥२६२५ ॥
व्ययकामधनेशानां स्फुटयोगं गते शनौ ।
धनहानिं महद्दुःखं निर्दिशेच्छुभवीक्षिते ॥२६२६ ॥
देहपुत्रव्ययेशानां पुत्रहानिं विनिर्दिशेत् ।
मन्दे राहुसमायोगे भार्याहानिं विनिर्दिशेत् ॥२६२७ ॥

2625 - 2627. Special Rules for Transit (continued): (a) Add the longitudes of lords of ascendant, 3rd and 12th. The transit of Saturn in the resultant space will cause harm to co-born.

(b) The same effect as at "a" will come to pass through the transit of Saturn in the space resulting the addition of lords of the 6th, 3rd and 12th.

(c) Add the longitudes of the rulers of 12th, 7th and 2nd. Saturn's transit in the resultant space will bring about loss of wealth and great grief provided he is aspected by a benefic.

(d) Add the longitudes of the lords of ascendant, 5th and 12th. Declare evils to one's progeny out of Saturn's movement in the resulting space. If transit Rahu joins Saturn in the said context (i.e. during the said transit), evil to wife be feared.

इति मन्दकुटुम्बानां चन्द्रलग्नाच्च भार्गवे ।
स्फुटयोगं गते शुक्रे स्त्रीलाभं निर्दिशेद्बुधः ॥२६२८ ॥

2628. The constitution of this verse suffers from want of clarity because of the words "Manda Kutumbaanaam". Possibly the hint is: Add the longitudes of the 2nd lord from the Moon and Venus. When Venus transits the resultant space (in appropriate dasa periods), one will gain a woman (will be married).

देहकर्मायनाथानां स्फुटयोगं गते गुरौ ।
चन्द्रे वाप्यथवा सौम्ये तीर्थसिद्धिं विनिर्दिशेत् ॥२६२९ ॥
विक्रमायव्ययेशानां स्फुटयोगं गते फणौ ।
भ्रातृहानिं महारोगं निर्देशेद्रिपुवीक्षिते ।
कुजमन्दफणीनां च स्फुटयोगं गते फणौ ॥२६३० ॥
महारोगं मनस्तापं निर्दिशेद्रन्ध्रराशिगे ।
व्ययपुत्रायनाथानां स्फुटयोगं गते कुजे ॥२६३१ ॥
पुत्रहानिं महद्दुःख निर्दिशेद्रिपुवीक्षिते ।
देहार्थलाभनाथानां लग्नाच्चन्द्रबृहस्पतौ ॥२६३२ ॥
स्फुटयोगं गते मन्दे धनलाभं विनिर्दिशेत् ।
तत्त्रिकोणेऽथ वा चन्द्रे जीवे शुक्रे शुभेक्षिते ॥२६३३ ॥
त्रयाणांमृत्युनाथानां स्फुटयोगं गते ध्वजे ।
कर्महानि महाक्लेंश स्थानाच्चलनतोऽपि वा ॥२६३४ ॥
स्फुटयोगं गते मन्दे मरणं तत्र निर्दिशेत ।
त्रयाणां कर्मनाथानां निर्दिशेद्राहुवीक्षिते ॥२६३५ ॥

2629 - 2635. Special Rules for Transit (Continued): (a) Jupiter, the Moon or Mercury in transit in the space denoted by addition of longitudes of lords of 1st, 10th and 11th will cause pilgrimage.

(b) Add the longitudes of lords of the 3rd, 11th and 12th. When Rahu moves in the resultant space with the aspect of a planet that is inimical to him, the person will incur loss of co-born and a great disease.

(c) Add the longitudes of Mars, Saturn and Rahu as seen at birth. When Rahu transits the 8th from the resultant space, great disease and great distress will come to pass.

(d) Evils to progeny and incurring great grief will be experienced with the transit of Mars in the space denoted by the addition of the longitudes of the lords of 12th, 5th and 11th.

(e) Add the longitudes of the lords of 1st, 2nd and 11th counted from the ascendant, the Moon or Jupiter as the case may be. Saturn journeying in the resultant space or a trine thereof will bring finan-

cial gains. The Moon, Jupiter and (or) Venus should then be aspected by a benefic.

(f) Ketu transiting the place caused by adding the longitudes of the two planets, viz. lords of 3rd and 8th, will cause professional obstacles apart from much difficulties and change of place.

(g) Should Saturn (instead of Ketu) move in the space as mentioned at "f" above, death will strike the person.

(h) The 2nd line of sloka 2635 is incomplete in respect of effects. " Rahu aspecting the lords of 3rd and 10th ....."

त्रयाणां भाग्यनाथानां गुरोः चन्द्राच्च लग्नतः।
स्फुटयोगं गते राहौ भाग्यहानिं विनिर्दिशेत् ॥२६३६ ॥

2636. When Rahu transits the space denoted by the sum caused by addition of the longitudes of the lords of the 9th with reference to natal Jupiter, natal Moon and natal ascendant, predict deline ine one's fortunes.

षष्ठाष्टमव्ययेशानां स्फुटयोगं गते शनौ।
मरणं निशि जातानां दिनजानां तदस्तगे ॥२६३७ ॥
मन्दमान्द्याहिसंयोगे स्फुटयोगं शनैश्चरे।
कुजे वा राहुपुच्छे वा मरणं तत्र निर्दिशेत् ॥२६३८ ॥

2637 - 2638. (a) Add the longitudes of the lords of the 6th, 8th and 12th. When Saturn moves in the resultant space, death will occur to a day-born person. For a night-born, Saturn should be moving in the 7th from the resultant space.

(b) Add the longitudes of Saturn, Gulika and Rahu. The resultant space should be in transit by Saturn or Mars or Ketu. The result will be death.

लग्नचद्रसुखेभ्यश्च षष्ठेशानां स्फुटे शनौ।
मातुर्वियोगं तत्काले निर्दिशेत् कालवित्तमः ॥२६३९ ॥
त्रयाणां भाग्यनाथानां लग्नाच्चन्द्राच्च भास्करात्।
स्फुटयोगं गते मन्दे पितृहानिं विनिर्दिशेत् ॥२६४० ॥
त्रयाणां पुत्रनाथानां पुत्राच्चद्राच्च लग्नतः
स्फुटयोगं गते जीवे पुत्रलाभं विर्निर्दिशेत् ॥२६४१ ॥
त्रयाणां कामनाथानां शुक्रच्चन्द्राच्च लग्नतः।
स्फुटयोगं गते शुक्रे भार्यालाभं विनिर्दिशेत ॥२६४२ ॥

2639 - 2642. (a) Saturn moving in the sign denoted by the sum of longitudes of 6th lords counted from the ascendant, the Moon and the 4th lord will cause separation from mother.

(b) Evil to father will result the transit of Saturn in the space indicated by the addition of the lords of the 9th, counted from the ascendant, the Moon and the Sun.

(c) Add the longitudes of the lords of the 5th counted from the 5th house, the Moon and the ascendant. Jupiter's journey in the resulting space will cause gain of birth of a son.

(d) One will beget a wife when Saturn moves in the space indicated by the addition of longitudes of the lords of 7th counted from Venus, the Moon or the ascendant.

त्रयाणां सुखनाथानां भौमाच्चन्द्राच्च लग्नतः।
स्फुटयोगं गते भौमे भूमिलाभं विनिर्दिशेत् ॥२६४३ ॥
त्रयाणां रिपुनाथानां लग्नाच्चन्द्राच्च भास्करात्।
स्फुटयोगं गते सूर्ये शस्त्रपीडां विनिर्दिशेत ॥२६४४ ॥
त्रयाणां धननाथानां गुरोश्चन्द्राच्च भास्करात्।
पुभूतधनलाभं च निर्दिशेत् कालवित्तमः ॥२६४५ ॥
त्रयाणां सुखानाथानां सौम्याच्चन्द्राच्च भास्करात्।
स्फुटयोगं गते जीवे विद्यालाभं विनिर्दिशेत् ॥२६४६ ॥
त्रयाणां राज्यनाथानां चन्द्राद् लग्नाद् बृहस्पतेः।
स्फुटयोगं गते जीवे राजपूज्यं विनिर्दिशेत् ॥२६४७ ॥
त्रयाणां व्ययनाथानां भौमान्मन्दाच्च लग्नतः।
स्फुटयोगं गते भौमे खड्गबाधां विनिर्दिशेत् ॥२६४८ ॥
त्रयाणां कर्मनाथानां लग्नाच्चन्द्राच्चभास्करात्।
स्फुटयोगं गते मन्दे व्याधिभ्रंशं विनिर्दिशेत् ।२६४९ ॥
त्रयाणां लाभनाथानां शुक्राज्जीवाच्च भास्करात्।
स्फुटयोगं गते चन्द्रे धनप्राप्तिं विनिर्दिशेत् ॥२६५० ॥
भाग्यायकर्मनाथानां स्फुटयोगं गते बिधौ।
पापदृष्टिविहीने च मनोऽभीष्टार्थलाभकृत् ॥२६५१ ॥
॥इति देवकेरळे द्वितीयभागे प्रथमोऽशः॥

2643 - 2651. (a) Gains of landed properties will be the result when Mars moves in the space indicated by adding the longitudes of the 4th lords from Mars, the Moon or the ascendant as the case may be.

(b) Troubles frcm weapons will come to pass when the Sun passes on the space denoted by the addition of longitudes of the 6th lords counted from the ascendant, the Moon and the Sun.

(c) Add the longitudes of the 2nd lords from Jupiter, the Moon and the Sun. Astrologers declare

advent of plenty of money (by the transit of Jupiter in the said space).

(d) Educational gains will occur with the transit of Jupiter on the space denoted by addition of longitudes of the 4th lords counted from Mercury, the Moon and the Sun.

(e) One will be worshipped by the king during the transit of Jupiter on the space caused by adding the longitudes of the 10th lords reckoned from the Moon, the ascendant and Jupiter.

(f) Add the longitudes of the lords of the 12th from Mars, Saturn and the ascendant. Mars moving in the said space will cause trouble from knife.

(g) Add the longitudes of the lords of the 12th counted from the ascendant, the Moon and the Sun. Saturn moving in the said space will cause fear from tiger.

(h) Acquisition of wealth will result the transit of the Moon on the space caused by the addition of longitudes of the 11th lords counted from Venus, Jupiter and the Sun.

(i) Add the longitudes of the lords of the 9th, 11th and 10th (counted from the ascendant). When the Moon transits the said space, without a malefic's aspect, one will have gains and fulfilment of desires.

॥ धनुर्लग्ने चम्पकांशः ॥

चम्पकांशे धनुर्लग्ने चोत्तरांशे प्रजायते ।
विप्रजन्मासुखी नित्यं पञ्चमोऽयं प्रकीर्तितः ॥२६५२ ॥
अथवा च द्वितीयः स्याद्रक्तवर्णः शुभाकृतिः
कुग्रामे जननं चैति नदीप्रान्ते पुरीषु च ॥२६५३ ॥

2652 - 2653. Sagittarius Ascendant - Champaka Nadiamsa: The native of 2nd half of Champaka Nadiamsa in Sagittarius ascendant will be a Brahmin and be the fifth or the second issue of his family. He will be blood-red in complexion, be auspicious in appearance and be born in a remote village or in a town in a river region.

Notes: For Champaka Nadiamsa, please see notes under sloka 1412, p.128, Book 1.

मिथुनांशे धनुर्लग्ने चापद्रेक्काणजस्तथा ।
भाग्येशे गुरुसंयुक्ते बाल्ये पितृविनाशवान् ॥२६५४ ॥
पश्चाद्भातृविहीनः स्याज्ज्येष्ठभ्रातृप्रियः सुखी ।
बाल्ये दारिद्यमापन्नो ज्येष्ठभ्रातृसमन्वितः ॥२६५५ ॥
मातामहीगृहे वासं मातृसौख्यं कचित् सुखम् ।

2654 - 2655½. Gemini Navamsa (or) Sagittarius Decanate: The native of Sagittarius ascendant with Gemini Navamsa (or) Sagittarius decanate will lose his father early in his childhood if the 9th lord (the Sun) is with Jupiter (the lord of the ascendant). He will have no after-born but will have older co-born and be liked by them. His childhood days will be marked by poverty and danger. He will live in his materna grand-mother's home. His mother will be somewhat happy.

पूर्वभागे प्रजातस्तु चतुर्थः परिकीर्तितः ॥२३५६ ॥
सीमन्तपुत्र इत्याहुः क्वचित् पक्षान्तरे मतः
चम्पकांशे पूर्वभागे शनित्रिंशांशजस्य च ॥२६५७ ॥
वनप्रान्ते प्रसूतिः स्याद्विप्रजन्मसुखं भवेत् ।
महानदीप्रात्यदेशे जननं चाग्रहारके ॥२६५८ ॥

2656 - 2658. The native of first half of the subject Nadiamsa will be the 4th issue of his family. There are authorities to state that he will be the first issue. If birth be in Saturn's Trimsamsa it will be in a forest region in a colony of Brahmins. He will be a Brahmin.

प्राग्पश्चिमवीथ्योर्वा दक्षिणे भाग एव च ।
उत्तरांशे तथा विन्द्यान्मध्य खण्डोद्भवस्य च ॥२६५९ ॥
जन्माब्दे पितृनाशः स्याच्चम्पकांशे न संशयः
नीचे भौमांशगे सूर्ये भूसुतेन समन्विते ॥२६६० ॥
देशान्तरे नदीप्रान्त्ये पितुर्मरणमादिशेत् ।
सम्पद्दशान्ते जननी मध्ये वा मृतिमाप्नुयात् ॥२६६१ ॥

2659 - 2661. (a) Birth will be in a street spread from east to west in a south-facing house.

(b) The native of second half of Champaka Nadiamsa, Sagittarius ascendant, will lose his father in the first year of birth.

(c) The Sun in debility (in the 11th, in Libra) together with Mars and obtaining a Navamsa of Mars will cause death of father in a region of river in a foreign place.

(d) His mother will die either in the end of 2nd Dasa or in its middle portion.

पूर्वभागे तृतीयांशे मातृ वंशविर्वधनम् ।
कनिष्ठभ्रातृसिद्धिः स्याच्चम्पकांशोद्भवस्य च ॥२६६२ ॥
उत्तरांशे मातृवंशे बाल्ये वासं विनिर्दिशेत् ।

क्लेशजीवनमित्याहुः शूद्रप्रभुवशात् सुखम् ॥२६६३ ॥

2662 - 2663 (a) The maternal family of one born in the former half of the subject Nadiamsa will progress. The subject will obtain younger co-born.

(b) One of 2nd half of this Nadiamsa will live with his maternal kinsfolk during his childhood experiencing difficulties. He will be happy through a Soodra king.

Notes: "Third part" of 1st half, 2nd half etc. should be ignored as they appear to be interpolations and are impractical.

ग्रन्थान्तरे—

चम्पकांशे घर्नुलग्ने बाल्ये शूद्रप्रभुप्रियम् ।
पर गेहे निवांस च भ्रातृमूलात् क्वचित् सुखम् ॥२६६४ ॥

2664. Champaka Nadiamsa - 2nd Half: There is another authority to state that this native of Sagittarius ascendant will be liked by a Soodra king and will live in others' house. He will receive some happiness through co-born.

भाग्यारूढे घनुर्लग्ने भाग्ये यावत् फलैर्युते ।
तावद्वर्षात् परं भाग्यं योगवान् कीर्तिमान् भवेत् ॥२६६५ ॥

2665. There are certain missing links in this verse apart from some deficiency in its constitution. The apparent clue is that the native of Sagittarius ascendant will prosper after such number of years as denoted by the Ashtaka Varga Bindus in the 9th house in Sarvashtaka Varga.

आरूढे राहुदोषेण बाल्येऽल्पसुखबुद्धिमान् ।
कालान्तरे चम्पकांशे स्वबुद्धयायुक्तिमान् गुणी ॥२६६६ ॥

2666. Rahu in the Arudha Pada (of the ascendant) will be a blemish as a result of which, one will have limited happiness and limited intelligence in childhood. With the passing of time, he will be more intelligent and expedient. He will also be virtuous.

विद्याभ्यासं च लभते वेदाध्ययनवर्जितम् ।
चम्पकांशे राजसेवी कोपी क्षिप्रप्रसादवान् ॥२६६७ ॥
राजद्वारे प्रसिद्धश्च ह्युपायात् कार्यसाधकः ।
राजप्रकृतिमान् धीरो रागी दुष्टस्वभाववान् ॥२६६८ ॥
स्वपक्षवादी परकार्यदक्षः
श्रीचम्पकांशे परकार्यसक्तः
सुलोचनस्तीक्ष्णमतिः प्रसिद्धः
समीरपैत्यामयदेहवान् स्यात् ॥२६६९ ॥

2667 - 2669. He will receive education but be bereft of Vedic studies. He will serve a king, be irritable but instantly pleased, will attain fame through royal service, will tactfully achieve his aims, be of royal disposition, valorous, passionate and wicked. He will argue in his own favour, be skilful in achieving for others and interested in others' jobs. He will have beautiful eyes and sharp mind, and be famous. His body will have windy and bilious imbalances.

चापे मेषांशगे चन्द्रे त्वगम्यागमनोत्सुकः
गूढकामातुरः प्राज्ञश्चम्पकांशे प्रजायते ॥२६७० ॥

2670. The Moon in Sagittarius with Aries Navamsa will cause enthusiasm to undertake journeys. The person will be secretively lustful and be learned.

पापवारे चम्पकांशे धीरः साहसकार्यवान् ।
कोपी क्षिप्रप्रसन्नात्मा स्वभुजार्जितभाग्यवान् ॥२६७१ ॥
राजवित्तापहारी स्याद्बृहन्नेत्रः सूरूपवान् ।
स्थूलकेशः प्रसन्नात्मा देवब्राह्मणपोषकः ।
उत्तरांशे फलं सत्यं हरिशङ्करभक्तिमान् ॥२६७२ ॥

2671 - 2672. Birth on a Malefic's Week Day: Should birth be on a malefic's week day, the said native will be valorous, will perform adventurous deeds, be irritable but instantly pleased and will have fortunes made by dint of his efforts. He will steal royal wealth, will have large eyes, be charming in appearance, will have thick (or heavy) hair and will honour Gods and Brahmins. He will be devoted Lords Vishnu and Siva. These effects for 2nd half of Champaka Nadiamsa will bear truth.

Notes: Malefic weekdays are Sunday, Tuesday and Saturday. Monday and Wednesday will also fall in this category if the Moon and Mercury are in order malefic planets as per standard rules for a given horoscope. The aphorisms discussed apply to Sagittarius ascendant in particular.

ग्रन्थान्तरे—

सत्पात्रदानप्रियकार्यदक्षः
श्रीचम्पकांशे बहुमानपूज्यः ।
प्रहृष्टचेता मृदुदेहपुष्टिः

कालान्तरे भाग्यसुपुण्यभाक् स्यात् ॥२६७३ ॥

2673. Sagittarius Ascendant - 2nd Half of Champaka Nadiamsa: According to another authority, the native will be fond of being munificent towards deserving people. He will be skilful in undertakings, will receive a lot of honour and be eligible to be worshipped (or honoured). His deeds will be exceedingly rejoiceable. He will have a soft and strong physique. With the progress of time, his prosperity and merits will be on the increase.

पूर्वभागे महापापी देवब्राह्माणपोषकः
सदा रोषमदोन्मत्तह्मपात्रव्ययडाम्भिकः ॥२६७४ ॥
चम्पकांशे पूर्वभागे कामी विषयलोलुपः।
स्वभावमानकार्येषु दुष्टकृत्यः शठो भवेत् ॥२६७५ ॥
तमोगुणप्रधानश्च पूर्वभागेशठः खलः।
नीचकार्यरतो नित्यं नीचसेवी दुरात्मकः ॥२६७६ ॥

2674 - 2676. Champaka Nadiamsa - 1st Half: One of Sagittarius ascendant rising in this segment will be a great sinner. He will honour gods and Brahmins, be ever irascible, inebriated and will spend his wealth on unworthy causes. He will be hypocritic, lustful, addicted to salacious pleasures, wicked, crafty, predominantly ignorant, will indulge in mean deeds, will serve mean men and be ill-disposed.

उत्तरांशे धनुर्लग्ने हरिभक्तिविशेषवान्।
कलत्रद्वयवान् रागी ज्येष्ठभ्रातृवियोगवान् ॥२६७७ ॥
चम्पकांशे धनुर्लग्ने ह्युत्तरांशे प्रजायते।
एकभ्रातृयुतः श्रीमान् पितृश्रेष्ठः सुपुत्रवान् ॥२६७८ ॥

2677 - 2678. Champaka Nadiamsa - 2nd Half: This native will be devoted to Lord Vishnu and Lord Siva. He will have two wives, be passionate and will incur separation from his older brother. He will have one brother and be wealthy. He will prove to be a best father and will have very good sons.

पितृस्थानधिपे नीचे स्वपितुः क्लेशजीवनम्।
पितामहानुजः कश्चिद्योगप्राबल्यवान् सुखी ॥२६७९ ॥

2679. Debilitated Sun: The lord of the 9th (the Sun) in debility denotes that his father will lead a difficult life. A paternal grand-uncle will have some prosperity and happiness.

पितृव्याधिपतौ शुक्रे नीचे स्वोच्चांशसंस्थिते।
स्वपित्रधिकसौख्यं स्यात् पितृव्यैको न संशयः ॥२६८० ॥
पितृष्वसृद्वयं चैव ह्येका पुत्रवती भवेत्।
पितृभावफलाध्याये चम्पकांशोद्भवस्य च ॥२६८१ ॥
पितृव्यफलविस्तारं सङ्ख्यालक्षणमुच्यते।
पितृस्थानाधिपे सूर्ये स्थिरांशे शुभराशिगे ॥२६८२ ॥
लग्नद्द्वादशगे मन्दे सीमन्तशिशुनाशनम्।
पश्चात् पुत्र श्चिरंजीवी मितसन्तानवान् भवेत् ॥२६८३ ॥

2680 - 2683. (a) Debilitated Venus: Venus, ruling the house of paternal uncles (i.e. the 11th), in debility (in the sign Virgo) and with exaltation Navamsa (Pisces) will cause much happiness to father. The native will have one paternal uncle and two paternal aunts. Out of the latter two, one will be endowed with progeny. Effects relating to paternal uncle have been told in the concerned chapter (in the work consulted by the author). Therein explained are the ways and means to ascertain the number (of paternal uncles).

(b) The Sun in an Immovable Navamsa: The lord of the 9th, the Sun, in a benefic's sign with an immovable Navamsa while Saturn is in the 12th from the ascendant will destroy the first issue (of the paternal uncle). The son born later will be long-lived. He will have limited number of issues.

Notes: (b) These instructions apparently relate to the paternal uncle of the native.

सम्पद्दाये चम्पकांशे शूद्रप्रभुसमागमम्।
बाल्ये देशान्तरं गत्वा निषादप्रभुराज्यके ॥२६८४ ॥
नगरे देहजाड्यं च ज्वरपीडाभयं क्वचित्।
पश्चात् स्वदेशमासाद्य मासमेकं ज्वाराद्भयम् ॥२६८५ ॥
पश्चदारोग्यमाप्नोति विवाहोत्सवमादिशेत्।
सम्पद्दाये तृतीयांशे लग्नाधिपतिभुक्तिपु ॥२६८६ ॥
चम्पकांशे विवाहश्च षोडशाब्दात् परं भवेत्।
ग्रन्थान्तरे राहुभुक्तौ मायाब्दादौ च वत्सरे ॥२६८७ ॥
विवाहोत्सवकार्यणि चम्पकांशेनसंशयः।
पूर्वभागे चम्पकांशे द्वादशाब्दे विवाहवान् ॥२६८८ ॥
राहुदोषवशाद्विघ्नं विंशाब्देनात्रसंशयः।
विवाहानन्तरं भाग्यं राजद्वारे सुभाग्यवान् ॥२६८९ ॥
उत्तरांशे फलं सत्यं प्रत्यक्षं देवकेरलम्।
बाल्ये सम्पद्दशाकाले स्वाश्रितप्रभुनाशनम् ॥२६९० ॥

तद्वर्गे वा मृतिश्च स्याद्राजपुत्रवशात् सुखम् ।
काञ्चीपिनाकिनीमध्ये देशे राजान्तरं भवेत् ॥२६९१ ॥
सम्पद्दाये मध्यखण्डे स्वराजक्लेशमादिशेत् ।
सम्पद्दाये मध्यखण्डे ज्येष्ठभ्रातुर्महत् सुखम् ।
अनाचारवशाद्व्याधिर्मध्ये मध्ये प्रपीडयेत् ॥२६९२ ॥

2684 - 2692. (a) Champaka Nadiamsa - 2nd Half: During his second Dasa, the person will join a Soodra king. In his childhood, he will live in another country ruled by a hunter. There will be some fear of (epidemic) fever in the city (concerned). Later on he will return to his native country and will incur fever for a period of one month. His health will recover later on. His marriage will take place in the sub period of the lord of the ascendant (Jupiter) during the 2nd Dasa. There are divergent views that the marriage will be in the sub period of Rahu, or in the 16th year or in the 14th year.

(b) For one born in the 1st half of the subject Nadiamsa, marriage will be in the 12th year.

(c) Champaka Nadiamsa - 2nd Half: There will be obstacles in the 20th year due to blemishes caused by Rahu. The native's prosperity will follow his marriage and he will acquire good fortunes due to royal service. Effects stated in Deva Keralam for the 2nd half will bear truth. During the native's early days in the course of his 2nd dasa, the ruler patronising him will incur destruction. There will be a death in the king's circle. Perhaps the subject will acquire happiness through the princes. Possibly, in the Pinakini region, there will be change of ruler (?) The middle of 2nd dasa will cause grief to the king (?) The native's older brother will enjoy greater happiness during this phase but due to misconduct, he will occasionally be troubled by diseases.

कृष्णागोदावरीमध्येयवनप्रभुपट्टणे ।
विप्रो प्राबल्यमापन्नो द्वादशाब्दे भविष्यति ॥२६९३ ॥
दशवर्षात् परं चैव त्विदं फलमुदाहृतम् ।
लाभाधिपदशाकाले विंशाब्दे शुभमादिशेत् ।
द्वादविंशाब्देऽथ वा चेति दारसौख्यं विनिर्दिशेत् ॥२६९४ ॥

2693 - 2694. (a) In his 12th year or 10th year, Brahmins will be greatly endangered in the city of Yavanas situated between the rivers Krishna and Godavari.

(b) In the Dasa of 11th lord (Venus) during the 20th year, auspicious effects should be declared. After 22nd year, the native will be happy in respect of his spouse.

Notes: (a) "Yavanas in the region of Krishna and Godavari in the southern India" emerging from the current verse should be carefully noted. This clue from Deva Keralam explodes the baseless myth that the Yavanas referred to in the context of famous astrological works were Greeks or aliens. This goes to prove that Yavanas lived in India itself and were not the Greeks.

Yavanas also clearly means people of a certain caste legitimately generated by a Kshatriya and a Vaisya.

सम्पद्दशान्ते बुधभुक्तिकाले
केत्वन्तरे वाथ सुतोत्सवः स्यात् ।
तत्पूर्वभागे मृतिमाकरोति
श्रीचम्पकांशे शुभसंप्रजातः ॥२६९५ ॥

2695. In the sub period of Mercury or of Ketu during the 2nd Dasa, the person will obtain a son. Prior to that a death will occur.

ज्येष्ठपत्न्याश्च जातानां पुत्राणां नाशमीरयेत् ।
एकपुत्रश्चिरायुष्मान् ह्यायुष्मत्यौ द्विपुत्रिके ॥२६९६ ॥
दारान्तरे जातपञ्चपुत्रीपुत्रसमन्वितः ।
द्विपुत्रकन्यकैका स्तु लभन्ते दैर्घ्यमायुषः ॥२६९७ ॥
चम्पकांशे धर्नुलग्ने ह्युत्तरांशोद्भवस्य च ।
इत्थं च ऋतुसङ्ख्याकाः पुत्रीपुत्राश्चिरायुषाः ॥२६९८ ॥
प्रन्थान्तरे पञ्चसङ्ख्या द्वौ पुत्रौ कन्यकात्रयम् ।
दीर्घायुर्योग इत्याहुः केचित्पक्षैकपुत्रवान् ॥२६९९ ॥

2696 - 2699. (a) Progeny of First Wife: Sons obtained through his first wife will not survive. (Only) one son and two daughters will be long-lived.

(b) Progeny of Second Wife: He will have a total of five sons and daughters through second wife, out of whom two sons and one daughter will be long-lived.

(c) For one born in the 2nd half of the subject Nadiamsa, six sons and daughters in all will be long-lived. There is another authority to state that

it will be only five - two sons and three daughters - that will be endowed with longevity.

दारत्रयं पूर्वभागे मध्यखण्डोद्भवस्य च।
उक्तस्य त्वेकपुत्रस्य राजयोगं विनिर्दिशेत् ॥२७०० ॥
पूर्वखण्डे दरिद्रः स्यादेकोद्वाहो द्विकन्यकः
कन्यके बुद्धियुक्ते च विद्याभागेन जीवतः॥२७०१ ॥

2700 - 2701. (a) One born in the middle one third part of first half of the subject Nadiamsa will have three wives.

(b) Out of the sons referred to, one will have kingly prosperity.

(c) The native of former half of the Nadiamsa will be in the grip of poverty. Perhaps he will have one marriage and two daughters. He will be intelligent and will eke out livelihood through education.

उत्तारंशे मध्यखण्डे द्विपुत्रौच त्रिकन्यकाः।
दीर्घायुषा इति प्रोक्तं चम्पकांशोद्भवस्य च ॥२७०२ ॥
एकपुत्रमपुत्रस्य दत्तपुत्रप्रदो भवेत्।
कलत्रद्वयमित्याहुः पूर्वखण्डैकपुत्रवान् ॥२७०३ ॥

2702 - 2703. (a) One born in the middle one third part of second half of the subject Nadiamsa will have two sons and three daughters and will be long-lived. One of his sons will be childless and will adopt a son.

(b) The subject of first half of the said Nadiamsa will have two wives and one son.

चम्पकांशे धनुर्लग्नेह्युत्तरांशोद्भवस्य च।
पापे शुक्रे पूर्वखण्डे पाण्ड्यदेशेप्रभोर्विपत् ॥२७०४ ॥
मीनेऽर्कनन्दने काले तत्त्रिकोणस्य सप्तमे।
चोलदेशे ह्यरिष्ट स्यान्मण्डलाधिपतेर्विपत् ॥२७०५ ॥
सिंहे शनिस्थिते काले पाण्ड्यदेशप्रभोर्मृतिः।
जनकस्येष्टदेशे च ह्याराजकमिति स्मृतम् ॥२७०६ ॥
विपद्दाये पाण्ड्यदेशे स्त्रीराज्यं च शुभाधिकम्।
ब्राह्मणः प्रबलः स्याच्चतत्काले भाग्यमादिशेत् ॥२७०७ ॥
जनकस्येष्टतद्राज्ये चम्पकांशे सुभाग्यवान्।
नरवाहन युक्तश्च क्षेमदाये न संशयः॥२७०८ ॥
सम्पद्दाये तृतीयांशे गोचरे दशमे गुरौ।
लोके घान्यक्षयादीनि ह्यनावृष्टिर्भविष्यति ॥२७०९ ॥
म्लेच्छप्राबल्यमित्याहुर्विपद्दायेनसंशयः।
सम्पद्दाये तृतीयांशे विपद्दाये न संशयः॥२७१० ॥

2704 - 2710. Irrelevant: For one born in Sagittarius ascendant, Champaka Nadiamsa first half, Venus is a malefic.... danger to the king of Pandya ... When Saturn transits Pisces or its trine or the 7th, evil to Chola kingdom will occur. Perhaps its ruler will be endangered. Saturn moving in Leo will kill the king of Pandya. In the 2nd Dasa, Pandya kingdom will have a female ruler and more auspicious effects will follow. Brahmins will grow in prosperity. During that time, progress will occur. He will obtain fortunes in a kingdom dear to his father. In the 4th Dasa, he will acquire conveyances. In the 2nd Dasa, Jupiter moving in the 10th will cause famine and loss of crops. Mlechchas will prosper in the 3rd Dasa. In the 2nd's last part..... in the 3rd dasa .....

Notes: Out of these verses, we can make out the following relevant instructions.

(a) Venus will give mutilated adverse effects for the native of first half of the subject Nadiamsa.

(b) His 2nd Dasa will cause prosperity.

(c) His 4th dasa will give him conveyances.

विपद्दाये मध्यखण्डे ज्येष्ठभ्रातृविनाशनम्
स्वराजद्वेषमित्याहुर्विप्रमूलाद्विरोधवान् ॥२७११ ॥
स्थानच्युति र्मनस्तापं दक्षिणे गमनं तथा।
यातायातं च लभते विपद्दाये न संशयः॥२७१२ ॥

2711 - 2712. Third Dasa: The said native's elder brother will be destroyed in the middle of the 3rd dasa. The native will incur royal wrath and enmity with Brahmins. His (professional) position will be lost. He will be distressed and will set off to the southern part of the country. He will move hither and thither in this dasa.

प्रत्यक्षभाग्याधिपतेर्दशायां
स्थानच्युतिं मित्रविरोधिदुःखम्।
तदन्यभूपालसकृत्प्रसादं
शुभाशुभं क्लेशफलं च दद्यात् ॥२७१३ ॥

2713. In the dasa of the 9th lord (in debility), he will lose his position and be grieved while his friends will turn into foes. He will earn the mercy of the ruler of another country. The dasa in question will (thus) give auspicious and inauspicious effects and difficulties.

Notes: If the 9th lord is debilitated, the person

will initially suffer debacles in the dasa of 9th lord. Changes will occur in his life at a later part for better. This instruction can in general be applied in respect of fortunes for all ascendants.

नीचग्रहदशाकाले कुत्सितप्रभुसेवया।
जीवनं कानने वासमल्पसौख्यं विनिर्दिशेत् ॥२७१४॥
पश्चाद्राजान्तरस्नेहं ग्रामन्तरनिवासवान्।
क्षेमदाये फलं सत्यं विपद्दाये शुभाशुभम् ॥२७१५॥
दशान्ते क्लेशकार्याणि पुत्रपीडा भविष्यति।
सन्तानोत्पत्तिनाशः स्यात् स्वपुत्रस्य शुभं क्वचित् ॥२७१६॥

2714 - 2716. (a) During the dasa of a debilitated planet, the person will serve a mean king. He will live in forests. His happiness will be curtailed. Later on he will befriend a different king and will live in a different village.

(b) Effects stated for 4th dasa will bear truth. The 3rd dasa will give both auspicious and inauspicious effects. End of 3rd dasa will cause difficulties in work and evils concerning progeny. Children being then born will be destroyed while the native's son (depending on his age) will receive some happiness.

Notes: (a) The dasa of a debilitated planet will cause association with mean and questionable men. One will have change of place to his dislike and will lose much of his happiness.

क्षेमाधिपदशाकाले चम्पकांशोद्भवस्य च।
नूतनप्रभुसन्मानमर्थलाभं शुभाधिकम् ॥२७१७॥
प्रबलोद्योगकार्याणि ब्राह्मणस्नेहमादिशेत्।
चम्पकांशे क्षेमदाये बाल्यस्नेहप्रभोर्मृतिः।
स्वसेवितनृपक्लेशं तत्पुत्रस्य वशाद्व्यथाम् ॥२७१८॥

2717 - 2718. Fourth Dasa: The dasa of which is the 4th in sequence will cause association with a new king and will beget honours and wealth. The native will experience auspicious effects in an abundant measure. He will earn a more prosperous employment and will befriend Brahmins (or learned men). During this dasa, a ruler will die who would be a childhood friend of the subject native. The king served by him will be in grief and the king's son will be a source of trouble.

Notes: Some of the events relating to king should be wisely replaced. The relevant portion should be understood thus. The native in this dasa will lose an important childhood friend following which some relatives of that family will trouble him.

भूमीशकार्येण मनोविचारं
चतुर्थदाये मलिनं कृतज्ञः।
वर्षत्रयं क्लेशफलं ददाति
पश्चात् सुसौख्यं शुभशोभनाप्तिम् ॥२७१९॥
स्वात्माश्रितभूमिपतेश्चराज्ये
दायादिवर्गा समरोत्सुकाः स्युः।
कोशादिनाशं चतुरङ्गनाशं
चतुर्थदाये फलमाहुरार्याः ॥२७२०॥

2719 - 2720. Fourth Dasa (continued): (a) The native of Champaka Nadiamsa, Sagittarius ascendant, will undergo mental distress due to royal assignments in the 4th dasa. He will be dirty and grateful. For three years, difficulties will exist following which much happiness and auspiciousness will come to pass.

(b) Irrelevant: The kinsfolk of the king patronising the native will be enthusiastic to fight a war amongst them. The king's treasury and army will be destroyed. So say the learned about the 4th dasa.

नष्टराज्याद्धनप्राप्तिरष्टाविंशतिवत्सरे।
स्वप्रभोश्च मनस्सौख्यं तदूर्ध्वं क्षेममादिशेत् ॥२७२१॥
अमात्यजनसन्मानं विप्रस्नेहं शुभाधिकम्।
यत्नकार्यार्थसिद्धिं च गेहे कल्याणमादिशेत् ॥२७२२॥
योगे चत्वारिविंशेऽब्दे चत्वारिंशतिवासरे।
चम्पकांशे शुभाधिक्यं धनुर्लग्नोद्भवस्य च ॥२७२३॥

2721 - 2723. During the 28th year, the person will earn wealth from a defeated kingdom. His king will receive happiness and after that his well-being will prevail. The native will be honoured by ministers. He will befriend Brahmins. His undertakings will bear fruits. A marriage will occur in his family. His 40th year will bring him prosperity. The native of Champaka Nadiamsa in Sagittarius ascendant will receive more auspicious effects (in the 4th dasa).

रन्ध्राधिपदशाकाले त्रयस्त्रिंशतिवत्सरे।
एकोनचत्वारिंशेऽब्दे प्रभुनाशं विनिर्दिशेत् ॥२७२४॥

स्वराजपुत्रदेहार्तिः पञ्चत्रिंशतिवत्सरे।
देहकार्श्यं च लभते प्रत्यग्दाय इदं फलम् ॥२७२५॥
स्वशत्रुजननाशश्च पाण्ड्यदेशे भविष्यति।
चम्पकांशे क्षेमदाये चत्वारिंशात् परं श्रियम् ॥२७२६॥
नरवाहनभूषाप्ति राजयोगं द्वितत्सरे।
ग्रन्थान्तरे द्विवर्षं च योगप्राबल्यमादिशेत् ॥२७२७॥
क्षेमदाये तृतीयांशे योगं प्राप्नोति भूरिशः।
गेहेशे लाभराशिस्थे कर्मभाग्येशसंयुते ॥२७२८॥
क्षेत्रगोधान्यवृद्धिः स्यात् क्षेमदाये सुभाग्यवान्।
अनायासेन च लब्धविशालगृहलाभवान् ॥२७२९॥
तत्पूर्वे नीचदोषेण बहुगेहनिवासवान्।
परगेहे निवासं च गृहेशे नीचसंयुते ॥२७३०॥
चत्वारिंशात् परं सौख्यं गृहे क्षेत्रधनागमम्।
आरूढे राहुदोषेण प्रत्यग्दाये मनोव्यथा ॥२७३१॥
अल्पयोगमिति ख्यातं चम्पकांशोद्भवस्य च।
गार्हस्थ्यजीवनं चैति प्रत्यग्दाये शुभाशुभम् ॥२७३२॥

2724 - 2732. Irrelevant: During the dasa of 8th lord (Moon) in the 33rd year or in the 39th year, the king will be destroyed. During the native's 35th year, the king's son will be physically ill and be emaciated. These are the results for the 5th dasa. The native's enemies will be destroyed in Pandya kingdom.

(b) In the 4th dasa, following 40th year of age, wealth will accrue. He will acquire men-borne conveyances. For two years he will enjoy Raja Yoga effects. There is another authority to state that during the said two years, the subject will grow stronger in terms of prosperity.

(c) The last one third part of the 4th dasa will cause plenty of prosperity.

(d) If the 4th lord (Jupiter) is in the 11th house (in Libra) in the company of the lords of the 9th and 10th (i.e. the Sun and Mercury), the person will effortlessly gain a large-sized house. Prior to that because of the blemish of debility, he will live in many houses owned by others. This will be due to the 4th lord's association with a debilitated planet (i.e. the Sun).

(e) After his 40th year, he will be happy and will acquire landed properties.

(f) Rahu in the Arudha ascendant being a blemish will cause mental distress in the 5th dasa. The effects of Yoga (prosperity) will be minimised and he will receive a mix of good and bad effects in this Dasa.

लग्नाद्भाग्यं गते राहौ तदीशे नीचराशिगे।
क्लेशं क्षेमदशान्त्यादौ दुर्निमित्तवशाद्विपत् ॥२७३३॥
स्वगेहे विषसर्पादिदर्शनेन मनोव्यथा।
क्षेमदाये सुभाग्यं स्याद्ग्रहशङ्काप्रपीडिता ॥२७३४॥
दारशङ्कनिवृत्तिः स्याद्विघ्नमूलात् सुसौख्यवान्।
लग्नाद्भाग्यं गते राहौ नीचे स्वोच्चांशगे भृगौ ॥२७३५॥
सूतिकागृहदोषेण भार्यामरणमादिशेत्।
प्रत्यग्दाये पूर्वखण्डे वेदचत्वारिवत्सरे ॥२७३६॥
दारारिष्टमिति प्रोक्तं क्षिप्रेणोद्वाहमादिशेत्।
प्रत्यक्तार दशाकाले स्वभुक्तौ दारनाशनम् ॥२७३७॥
द्वितीयोद्वाहमाप्नोति चम्पकांशसमुद्भवः।
दारारिष्टात् परं किंचिद्भाग्यक्षीणं विनिर्दिशेत् ॥२७३८॥

2733 - 2738. (a) Rahu in the 9th while its lord (Sun) is in debility will be a source of difficulties in the initial and concluding phases of the 4th dasa. There will be danger on account of evil reasons. Mental distress will occur due to sight of poisonous snakes at home.

(b) His fortunes will improve in the 4th dasa but his wife will have some troubles due to planetary blemishes which will be overcome through Brahmins. Then happiness will recur.

(c) The native's wife will die due to shortcomings in the delivery chamber if Rahu is in the 9th while Venus is in debility (in Virgo) with exaltation Navamsa.

(e) Jupiter's Transit: When Jupiter reaches Cancer or its trine, his father will be happy. The native's education will commence and at the same time his father's fortunes will pick up. Jupiter journeying in Virgo will cause Sacred Thread Ceremony to the native followed by marriage.

सुरांशे मकरे लग्ने वृश्चिके यमलांशके ॥३४१८॥
उच्चराश्यन्त्यगे जीवे चौलोपनयनं स्मृतम्।
शुक्रे जीवान्तरे काले जीवे राह्वन्तरान्तरे ॥३४१९॥
तुलांशके प्रजातश्च शनिभुक्तौ शुभं लभेत्।

3418 - 3419½. (a) Jupiter reaching the end of Cancer in transit will cause tonsure ceremony and sacred thread ceremony. This applies to the native of Sura Nadiamsa of Capricorn ascendant as well as Durbhaga Nadiamsa in Scorpio ascendant.

(b) Should the Navamsa be Libra, Rahu's sub-sub period in the sub period of Jupiter in the dasa of Venus, and Saturn's sub period (in the dasa of Venus) will cause auspicious effects.

Notes: (b) "Tulamsake Prajatascha" in sloka 3419 should, in my opinion, read as "Suramsake Prajatascha" denoting the native of Sura Nadiamsa, in Capricorn ascendant, for whom both the sub periods of Jupiter and Saturn in the dasa of Venus will prove auspicious.

कीटलग्ने प्रजातस्य जन्माब्दे दक्षिणायने ॥३४२०॥
जीवान्तरे स्वगोत्रेषु पुत्र स्वीकरणं स्मृतम्।
जीवे कुजयुते दृष्टे व्रणपीडा क्वचित् क्वचित् ॥३४२१॥
बाल्ये कृशत्वमाप्नोति द्वितीयाब्दे प्रपीडितः।
वन्ध्या मातामहीवंशे द्वितीयाब्दे महाविपत् ॥३४२२॥
स्वजनारिष्टमाप्नोति वन्ध्या माता मनोव्यथाम्।
शन्यन्तरे शुक्रदाये कीटलग्नोद्भवस्य च ॥३४२३॥
स्वमातामहसन्तापं देहालस्यं विनिर्दिशेत्।
जननीव्याकुलं चैव सुखाधिपतिभुक्तिषु ॥३४२८॥
शुक्रे मन्दान्तरे काले कीटलग्नोद्भवस्य च।
उत्तरार्धे पितुः सौख्यं गृहे कल्याणसंभ्रमम् ॥३४२५॥

3420 - 3425. (a) One born in Scorpio ascendant (Capricorn is referred to in another version) will, in the first dasa, with the Sun's southerly course, go in adoption into a family belonging to his own Gotra. This will be in the sub period of Jupiter (in the dasa of Venus).

(b) Jupiter joining or in aspect to Mars will show some possibility of danger through ulcers. In childhood, he will be thin-bodied. The 2nd year of his age will cause troubles and there will be great danger in the family of his maternal grand-mother. The native's kinsfolk will incur evils, great danger and mental distress.

(c) In the dasa of Venus and in the sub period of Saturn, the maternal grand-father of Scorpio native will enjoy happiness but will incur physical illness. The person's mother will be distressed in

the sub period of the 4th lord (Saturn). The second half of Saturn's sub period in the dasa of Venus will cause happiness to the native's father followed by a family marriage.

Notes: (b) "Vandhya" meaning "barren" is found in the 2nd line of sloka 3422 dealing with maternal grand-mother. This is a truthless reference. This term also occurs in the next line. Further, the word "Mata" (mother) in the first line of sloka 3423 is replaced by "Mahadvipat" meaning "great danger" in another text.

स्वजन्मदेशे कलहं विचित्रं
देशान्तरे भूपतिनाशमाहुः।
अमात्यसेनाधिपयोश्च वेधां
भाग्यक्षयात् स्वप्रभुशोक कालम् ॥३४२६ ॥

3426. Irrelevant: There will be a wonder-instilling quarrel in his birth country. The king of another country will be destroyed. The minister and army chief will face troubles. His king will be grieved due to decaying fortunes.

शुक्रसौम्यान्तरे काले कीटलग्नोद्भवस्य च।
क्रूरमासे ज्वरभयं क्षिप्रेणारोग्यमादिशेत् ॥३४२७ ॥
शन्यन्तरे तृतीयांशे सोदरोत्पत्तिमेव च।
ज्येष्ठभ्रातृविवाहादि पितृसौख्यं विनिर्दिशेत् ॥३४२८ ॥

3427 - 3428. The sub period of Mercury in Venus dasa will cause fear, with the Sun's adverse transit, of fever for a Scorpio native. The last one third part of Saturn's sub period will cause birth of a younger brother, marriage to older brother and happiness to father.

तारार्केशाधिपे स्वर्क्षे नीचे वाथ प्रजायते।
राजयोगं च लभते क्षेमदाये महत् सुखम् ॥३४२९ ॥

3429. This is not a logically constructed sloka. Neither the planets involved are clear. "Tara" = Nakshatra; "Arka" = Sun;

"Isa" = Lord; "Adhipa" again is lord. Thus the term "Tara + Arka + Isa + Adhipa" yields nothing sensible. These planets, if at all they mean something clear, should be in own sign or debilitation, giving a Raja Yoga and great happiness in the 4th dasa.

द्यूनाधिपदशाकाले लाभाधिपतिभुक्तिषु।
विद्यारम्भं च लभते तथोपनयनं ततः ॥३४३० ॥
सुरांशे वृश्चिके लग्ने यमलांशोद्भवस्य च।
जन्मदाये केतु भुक्तावुपनयनमिष्यते ॥३४३१ ॥
दुर्भगांशे प्रजातस्य लाभाधिपतिभुक्तिषु।
महानदीप्रान्तदेशे मौञ्जीबन्धनमाचरेत् ॥३४३२ ॥

3430 - 3432. Scorpio Ascendant - Durbhaga Nadiamsa: (a) In the sub period of the 11th lord (Mercury) and in the dasa of the 7th lord (Venus), one's education will commence followed by sacred thread ceremony.

(b) Capricorn Ascendant: For one born in Capricorn ascendant's Sura Nadiamsa, Ketu's sub period in the first dasa will cause sacred thread ceremony.

(c) For one born in Scorpio ascendant, vide "a" above, the said ceremony in the 11th lord's sub period will occur in the region of a great river.

Notes: (b) "Vrschike Lagne" is replaced by "Makare Lagne" in another version, which is only correct.

सम्पदाये शुक्रभुक्तौ कीटलग्नसमुद्भवः।
वसन्तकाले चोद्वाही पितृभाग्यः सुखी ॥३४३३ ॥

3433. Scorpio Ascendant: The native will beget married during the season of spring in the sub period of Venus in the 2nd dasa. His father will also prosper (during this sub period).

कर्माधिपदशाकाले वासदेशे नृपावधि।
पष्ठाष्टमाधीयुक्तौ देशे राजान्तरं भवेत् ॥३४३४ ॥
स्वपिता क्लेशैकार्याणि वर्षमेंक मनोव्यथाम्।
प्राबल्यं लभते पश्चाद् भ्रातृयोगवशात् सुखम् ॥३४३५ ॥

3434 - 3435. The sub periods of either the 6th or 11th lord (i.e. of Mars or Mercury) in the dasa of the 10th lord (Sun) the king will be replaced(?) In these sub periods, the native's father will be in difficulties and will be distressed for a period of one year after which he will prosper on account of his co-born.

सर्वदाये सौम्यभुक्तौ भूसुतस्यान्तरेऽथ वा।
अतीव क्लेशकार्याणि देहजाड्यां विनिर्दिशेत् ॥३४३६ ॥
दुर्भगांशे पूर्वभागे कीटलग्नोद्भवस्य च।
बुधान्तरे व्याकुलं स्यादुरुभुक्तौ क्वचित् क्वचित् ॥३४३७ ॥
शन्यन्तरे श्रिया युक्तो स्वप्राबल्यं विपद्दशा।
ज्येष्ठभ्रातृविशेषं च प्राबल्यं चोत्तरोत्तरम् ॥३४३८ ॥

विपद्दशापरार्धादौ ज्येष्ठभ्राता श्रिया युतः।
पुत्रोत्सवादिसन्तोषं पितृसौख्यं विनिर्दिशेत् ॥३४३९ ॥
वृश्चिकान्ते चापशनौ गोचरे पितृपीडनम्।
सम्पद्दाये क्रूर भुक्तौ पितुः पीडा भविष्यति ॥३४४० ॥
मीने शनिस्थिते काले मेषान्ते वृष्भेऽथ वा।
दुर्भगांश्जस्य चारे विपद्दाये पितुर्विपत् ॥३४४१ ॥

3436 - 3441. Scorpio Ascendant: (a) The sub periods of Mercury and Mars in all dasas will cause physical illness due to troublesome undertakings.

(b) One born in the first half of Durbhaga Nadiamsa will be distressed in the sub period of Mercury. So also to some extent in that of Jupiter. (This applies to 2nd dasa.)

(c) The later half of the 3rd dasa will bring wealth and acquisition of a son for the native's older brother. His father will also enjoy happiness.

(d) Śaturn's Transit: Saturn's sojourn in the end of Scorpio, or in Sagittarius will cause evils to father. This may also be in a malefic's sub period in the 2nd dasa. During the native's 3rd dasa, with saturn moving in Pisces, end of Aries or in Taurus will endanger his father.

पितृभावाष्टमे जीवे कीटलग्नोद्भवस्य च।
सप्तमाब्दे पित्ररिष्टमष्टाविंशेऽथ वा यदि ॥३४४२ ॥

3442. During the native's 7th or 28th year, Jupiter moving in the 8th from the 9th (i.e. in Aquarius which is the 4th from Scorpio ascendant) will cause death of father.

सुखेशसंबन्धदशाविपाके
चन्द्रात् सुखे भानुसुते च काले।
जन्मान्तरे पापवशाच्च दुःखं।
तातम्बिकारिष्टमितिबुवन्ति ।३४४३ ॥

3443. In the dasa periods of a planet related to 4th lord, note Saturn in movement in the 4th place from the natal Moon. Then the native will be in grief for his sins and his paternal grand-mother will be endangered.

तुलांशगे क्रिये चन्द्रे कुलीरे गोचरे शनौ।
क्षेमदाये पित्ररिष्टं मास्सु मेषादिषु त्रिषु ।३४४४ ॥
स्वमाता विधवा भूत्वा बहुकालं सुजीवति।
प्रत्यग्दाये पापभुक्तौ जननीमृत्युमादिशेत् ॥३४४५ ॥

3444 - 3445. Should the Moon be in Aries with Libra Navamsa, Saturn's movement in cancer during the 4th dasa will endanger his father. The months concerned will be when the Sun moves in Aries and the next two signs. His mother will become a widow and will be long-lived. She will die when the native will be in a malefic's sub period of 5th dasa.

सुरांशे वृश्चिके लग्ने पञ्चविंशतिवत्सरे।
एकत्रिंशोऽथ वा चेति स्ववन्ध्यामातृनाशनम् ॥३४४६ ॥
स्वपित्रिरिष्टतः पूर्वं सुरांशेजनितस्य च।
माता सुमङ्गली मृत्युं पिता पश्चादभार्यकः ॥३४४७ ॥

3446 - 3447. In case of Sura Nadiamsa, Scorpio ascendant (another version rightly suggests Capricorn ascendant), mother will die in the native's 25th or 31st year. This death of mother will occur prior to the death of father who then will remain unmarried.

Notes: "Vandhya" (barren) in relation to mother is an inadmissible expression.

मीनांशे वृश्चिके लग्ने यमलांशोद्भवस्य च।
दीर्घायुश्चापि जननी ? भेदमाता विनश्यति ॥३४४८ ॥
षोडशाब्दे भेदमातुरमृत्युभयं क्वचित्।
ततः पश्चाद्विवाहः स्याद् द्यूनाधिपतिदायके ॥३४४९ ॥

3448 - 3449. For one born in Scorpio (Capricorn is found in another version) ascendant, Durbhaga (or Sura) Nadiamsa, mother will be endowed with longevity. But his step-mother will be destroyed (early). The said step-mother will die a dangerous death when the native will be 16. Later on, in the 7th lord's dasa, his marriage will occur.

Notes: Reference to Pisces Navamsa is redundant in the 1st line of sloka 3448 above.

सुरांशे षोडशे वर्षे त्वष्टादशे च वत्सरे।
प्रत्यक्षपितृमूलेन वदेदुद्वाह कर्म च ॥३४५० ॥

3450. The 16th or 18th year of age will cause marriage to the native of Sura Nadiamsa (Capricorn) through the good offices of his full father. (That is, a step-father is indicated, vide next sloka.)

प्रत्यग्दाये पित्ररिष्टं सुरांशेजनितस्य च।
शन्यन्तरे क्लेश कालः स्वभेदपितृकर्मकृत् ।३४५१ ॥

3451. The 5th dasa will endanger his father. The sub period of Saturn will be a time of troubles

and the native will perform last offices to his half-father.

चापारूढे क्रिये चन्द्रे तुलांशे क्षेमदायके।
स्वप्राबल्यं विशेषं च भ्रातृमूलात् सुवाहनम् ॥३४५२॥
राजामात्यप्रसोदन भ्रातृयोगाभिवृद्धिमान्।
गृहे लक्ष्मीकटाक्षेण नित्यश्रीसौख्यमश्नुते ॥३४५३॥

3452 - 3453. The Moon in Aries or Sagittarius with Libra Navamsa will specially increase one's prosperity in the 4th dasa. He will acquire conveyance through his brothers. Due to favours of the king and minister, his brother will enjoy prosperity. The family will receive the blessings of the goddess of lucre and happiness will prevail.

नक्रांशे वृश्चिके लग्ने यमलांशोद्भवस्य च।
भाग्याधिपदशाकाले भ्रातृप्राबल्यमादिशेत् ॥३४५४॥
लग्नाधिपदशाकाले जातकश्च श्रिया युतः।
सन्तानोत्पत्तिमाप्नोति दारसौख्यं शुभाशुभम् ॥३४५५॥

3454 - 3455. Scorpio ascendant with Capricorn Navamsa will bring prosperity to brother when the native will be in the dasa of the Moon. In the dasa of the lord of the ascendant (Mars), he will himself gather wealth, will acquire a son and be happy with his wife. Good and bad results are possible (in the dasa of Mars).

शन्यङ्गारकसंयोगे दशमे गुरुवीक्षिते।
कीटलग्ने प्रजातस्य बुद्धियोगी भविष्यति ॥३४५६॥
बुद्धियोगप्रजातस्य भ्रातृप्राबल्यहेतुना।
भाग्याधिपदशाकाले बहुभाग्यं विनिर्दिशेत् ॥३४५७॥
कर्माधिपदशाकाले पितृसौख्यं महत् सुखम्।
जन्मदाये तृतीयांशे तातादिश्रियमश्नुते ॥३४५८॥
यावदायुष्यमाप्नोति तावद्भाग्यं विनिर्दिशेत्।
बुद्धियोगे सुखे जीवे पशुधान्यसमृद्धिमान् ॥३४६०॥
द्वात्रिंशे दारनाशः स्यात् क्लेशं प्राप्नोति भूरिशः।
द्वितीयोद्वाहसिद्धिः स्यात् पश्चात् प्रबलयोगवान् ॥३४६१॥

3456 - 3461. Saturn and Mars joining in the 10th (in Leo) with the aspect of Jupiter will cause what is called "Buddhi Yoga" as a result of which, the native will obtain great prosperity in the dasa of the 9th lord through the help of his brother. The dasa of the 10th lord (Sun) will cause much happiness to father. The last one third part of 1st dasa will cause wealth to father. Throughout his life, the native will enjoy fortunes. In the said Buddhi Yoga, Jupiter being in the 4th, will cause increase of quadrupeds and corns, and will grant palanquins (conveyances) and ornaments, apart from fortunes through brother. The 5th dasa will cause a family division and some enmity with brother. In the native's 32nd year, his wife will die and he will incur plenty of grief. His 2nd marriage will follow, following which he will see great prosperity.

Notes: The yoga is referred to as "Buddhi Yoga". Buddhi means intelligence and has directly nothing to do with Bhagya or prosperity. It should read as Bhagya or Vriddhi Yoga in line with the combination suggested although the title of the yoga is not that important. Apart from giving prosperity, the conjunction of Mars - Saturn in Leo in aspect to Jupiter has other events as could be seen.

सुखेशे सिंहराशिस्थे दुर्भगांशोद्भवस्य च।
सर्वदाये मीनराशौ तत्त्रिकोणेऽथ वा यदि ॥३४६२॥
स्फुटयोगं गते मन्दे स्वप्नभोश्च महाविपत्।
स्वसेवितनृपक्लेशात् क्लेशमाप्नोति भूरिशः ॥३४६३॥
कन्यादौ जन्मदेशेषु राज्याधिपतिनाशनम्।
तत्त्रिकोणेऽथ वा चेति योजयेत् कालवित्तमः ॥३४६४॥

3462 - 3464. One born in Scorpio ascendant, Durbhaga Nadiamsa, will incur great danger to his king if the 4th lord Saturn at birth is in Leo and reaches in transit Pisces or its trine. Due to the said troubles to the king, the native will himself be in great troubles. The king will be destroyed when Saturn reaches the initial part of Virgo, or a trine thereof.

Notes: The important clue here is that one will have great professional troubles with Saturn moving in the sign Pisces or a trine, if at birth he occupies Leo, the 10th.

मायाब्दान्तादिमारभ्य ज्येष्ठभ्राता श्रियान्वितः।
रन्ध्राधिपान्तरे काले भाग्यधिपतिदायगे ॥३४६५॥
स्वजनारिष्टमाप्नोति भगिनीपुत्रनाशनम्।
गुरुद्वितीयपर्याये वृषे मेषे महत् सुखम् ॥३४६६॥
स्वपिता नित्यसन्तोषं राजप्रीतिशुभावहम्।
गुरुप्रथमपर्याये वृषभादौ वा श्रियान्वितः ॥३४६७॥

द्वितीये वृषभादौ वा भ्रातृप्राबल्यमादिशेत् ।
मेषत्रिकोणगे जीवे सूर्ये स्वोच्चांश संयुते ॥३४६८ ॥
स्वपितुर्देहजाड्यादि पितृवर्गे महाविपत् ॥३४६९ ॥
ज्ञातिवर्गे कष्टकालो मित्रवर्गे महत् सुखम् ।
स्वमित्रसुतसौभाग्यं वृषभादौ विशेषतः ॥३४७० ॥
बुद्धियोगी स्थिरे लग्ने गोचरे वृषभे गुरौ ।
स्वपितुर्मित्रतनयः योगवान् कीर्तिमान् सुखी ।३४७१ ॥
गुरुतृतीयपर्याये मिथुनान्ते कुलीरगे ।
राजद्वेषं मनस्तापमुद्योगार्थविनाशनम् ॥३४७२ ॥
चापान्ते मकरे काले निरोधादि मुपद्रवम् ।
स्वपुत्रदारशोकादिक्लेशं प्राप्नोति भूरिशः ॥३४७३ ॥

3465 - 3473. (a) During the beginning and concluding parts of the native's 14th year, his elder brother will gather wealth. In the dasa of the 9th lord and in the sub period of the 8th lord, relatives will be harmed and a son of his sister will die.

(b) Jupiter's Transit: In the 2nd round of transit, Jupiter arriving in Taurus or Aries will cause much happiness. His father will be continuously happy, will please the king and will experience auspicious effects. In the first round, Jupiter in the initial part of Taurus will cause advent of wealth. In second round, in the same space, Jupiter will promote brother's growth.

(c) Father: Jupiter at birth in Aries or as trine thereof as the Sun begets his exaltation Navamsa will cause illness to father, and great danger to paternal kinsfolk. Relatives will be in the grip of troubles. But happiness will prevail in friends' circle. When Jupiter arrives in the beginning of Taurus, his friends' progeny will be fortunate, famous and prosperous. When in 3rd round Jupiter moves in the end of Gemini or Cancer, he will incur enmity with the king, mental distress and loss of position and wealth. In the end of Sagittarius or in Capricorn, Jupiter will cause obstacles and his son will suffer loss of spouse leading to much grief.

मन्दांशेशदशाकाले बुद्धियोगोद्भवस्य च ।
सहोदरः क्लेशमेति पित्ररिष्टं विनिर्दिशेत् ॥३४७४ ॥
पितृस्थानाधिपे चन्द्रे तुलांशे मेषराशिगे ।
स्वसुतेन युते दृष्टे त्वापत्संन्यासवान् पिता ॥३४७५ ॥
सुखेशांशदशाकाले सप्तविंशतिवत्सरे ।
मेषे जीवे मेषमासे शुक्लपक्षे मृतिं वदेत् ॥३४७६ ॥

3474 - 3476. In the dasa of the Moon's Navamsa dispositor, the native's brother will incur difficulties and his father will be subjected to evils and will die. During the time of this death, the native will be of 27 years of age and be in the dasa of the 4th lord's Navamsa dispositor. In transit, Jupiter will be in Aries along with the Sun, when bright lunar half rules.

क्षेमदाये सुतारिष्टं बुद्धियोगोद्भवस्य च ।
युग्मे शनिस्थिते काले पुत्रारिष्टं विनिर्दिशेत् ॥३४७७ ॥
मेषकन्याधनुर्मीने बुद्धियोगद्भवस्य च ।
पुत्रशोकफलप्राप्ती राज विग्रहवान् क्वचित् ॥३४७८ ॥

3477- 3478. The native's son will be subjected to evils in 4th dasa with Saturn's movement in the sign Gemini. Grief on account of loss of son will occur with .... (planet not mentioned) in Aries, Virgo, Sagittarius or Pisces apart from royal displeasure.

राहुस्थितेशांशदाये राहुभुक्तौ ज्वराद्भयम् ।
जननी क्लेशकार्याणि भ्रातृपीडा क्वचित् क्वचित् ॥३४७९ ॥

3479. In the dasa of Rahu's Navamsa dispositor, and in the sub period of Rahu, one will be troubled by fever; his mother and brother will also be subjected to evils.

Notes: "Rahu sthitesamsa daaye" should read as "Rahu sthitesa amsesa daaye".

अष्टमेशस्थितांशेश दशायां बुधभुक्तिषु ।
अपमृत्युभयप्राप्ति र्कीटलग्नोद्भवस्य च ॥३४८० ॥

3480. In the sub period of Mercury during the dasa of the Navamsa dispositor of the 8th lord, the native of Scorpio ascendant will be in the grip of fear of untimely death.

सुताधिपदशासंधिकाले स्वर्भानुभुक्तिषु ।
क्रूरान्तरान्तरे काले ज्येष्ठभ्रातृविनाशनम् ॥३४८१ ॥
ग्रन्थान्तरे वृद्धियोगे सुताधिपतिदायगे ।
स्वज्येष्ठभ्रातृसन्तान भाग्यनाशवशाद्व्यथा ॥३४८२ ॥

3481 - 3482. His older brother will be destroyed in the junction of the 5th lord's dasa (Jupiter's dasa) and in Rahu's sub period. The sub-sub period rulership will go to a malefic planet. There is another authority to state that the 5th dasa will destroy the fortunes of the native's older brother's son.

जीवे शन्यन्तरे काले ज्येष्ठभ्रातृविनाशनम् ।
कीटलग्ने प्रजातस्तुक्लेशं प्राप्नोति भूरिशः ॥३४८३ ॥
तत्पुत्रप्रबलं चैति सुताधिपतिदायके ।
प्रत्यग्दशान्त्ये सन्तापं भेदभ्रातृविनाशनम् ॥३४८४ ॥
दशामध्येऽपमृत्यं च शान्त्या शान्तिं प्रयास्यति ।
भाग्याधिपदशान्त्यादौ ज्येष्ठभ्रातृश्रिया युतः ॥३४८५ ॥
त्रिदशायोगवृद्धिं च बुद्धियोगोद्भवस्य च ।
भाग्यवृद्धिः श्रिया युक्तो गृहे लक्ष्मीकटाक्षवान् ॥३४८६ ॥

3483 - 3486. (a) Jupiter dasa, Saturn's sub period will be the cause of death of one's older brother and the native of Scorpio ascendant will be grieved much. His son will get great prosperity in this dasa. End of the 5th dasa (different from 5th lord's dasa) will cause distress and will destroy step-brothers. In between the dasa fear of untimely death (for step-brother) will prevail for which remedies be done.

(b) The native's brother will acquire wealth in the beginning and end of the 9th lord's dasa. Prosperity and wealth of the family will increase.

Notes: (b) The 1st line of sloka 3486 is ill-constructed and is not amenable to a proper rendering.

धनाधिपदशाकाले दुर्भगांशोद्भवस्य च ।
केतुभुक्त्यन्तमारभ्य शुक्रभुक्तौ मृतिं वदेत् ॥३४८७ ॥
जीवे शुक्रान्तरे काले कीटलग्नोद्भवस्य च ।
अष्टपञ्चाशगे वर्षे तुलामासत्रिकोणगे ॥३४८८ ॥
कृष्णपक्षे शुक्रवारे प्रातःकाले मृतिं वदेत् ।
लग्नाष्टमगते शुक्रे मित्रग्रहसमन्विते ॥३४८९ ॥
दुर्भगांशे पूर्वभागे परलोको न विद्यते ।
दुर्गतिं चाष्टमे शुक्रे यस्यां नाड्यां प्रजायते ॥३४९० ॥
व्ययाष्टमगते केतौ गच्छत्येवअधोगतिम् ।
दुर्भगांशे फलं सत्यं प्रत्यक्षं देवकेरलम् ॥३४९१ ॥

3487 - 3491. (a) Death: The native of Scorpio ascendant, Durbhaga Nadiamsa will die in the 2nd lord's dasa and in the beginning and ending of sub period of Ketu or in the sub period of Venus. Death occurring in Venus sub period in the dasa of Jupiter will be in the 58th year, with the transit Sun in Libra or its trine, in a dark fortnight, on a Friday morning.

(b) One born in the first half of Durbhaga Nadiamsa, Scorpio ascendant, with Venus in the 8th along with a friendly planet, will die a bad death. One will beget bad end if Ketu is in the 8th or the 12th.

(c) Whatever has been stated in Deva Keralam about Durbhaga Nadiamsa will be truthful.

स्थिरलग्नचतुर्थे निशाकरांशः

निशाकरांशगे सूर्ये स्थिरराशिचतुष्टये ।
स्थिरलग्ने प्रजातस्तु शूद्रजन्मा सुखी भवेत् ॥३४९२ ॥
सूर्यकालाधिपे शुक्रे त्वसितेन निरीक्षिते ।
शूद्रकाले शूद्रजन्मा राजयोगे तु सङ्करः ॥३४९३ ॥
जीवदृष्टियुते विप्रकाल समुद्भवः ।
विप्रजन्मा सुखी नित्यं क्षत्रियादौ यथाक्रमम् ॥३४९४ ॥

3492 - 3494. Immovable Ascendant - Nisakara Nadiamsa: With the Sun in an immovable sign, one born with this Nadiamsa in any of the four immovable signs will be a Soodra. While the Soodra Kala of the subject Nadiamsa (i.e. its last one fourth part) rises, if Venus becomes the lord of the day time and gets the aspect of Saturn, one born will be a Soodra and will enjoy Raja yoga effects. The Sun in aspect to Jupiter will cause birth of a Brahmin in the Vipra Kala (1st one fourth part) of the said Nadiamsa. Kshatriyas and others will be born in the respective parts, i.e. a Kshatriya in Kshatriya Kala, a Vaisya in Vaisya Kala and a Soodra in Soodra Kala, of the Nadiamsa.

Notes: Nisakra (known as Nisakari as well as Nisachari in some versions) extends thus: from 19° 36' to 19° 48' of a movable sign, from 10° 12' to 10° 24' of an immovable sign and from 4° 36' to 4° 38' of a dual sign.

निशाकरांशगे सूर्ये बुधशुक्रसमन्विते ।
स्वसुतेनयुते दृष्टे शूद्रजन्मेति कथ्यते ॥३४९५ ॥
जीवनं वैश्यवृत्त्या च बाल्ये क्लेशेन कर्शितः ।
स्वपिता च तथा विन्द्यान्मध्येवयसिभाग्यवान् ॥३४९६ ॥
श्यामवर्णशरीरी च बहुभ्रातृविनाशवान् ।
पञ्चसङ्ख्या भगिन्यश्च भविष्यन्ति चिरायुषाः ।३४९७ ॥

3495 - 3497. It is stated that a Soodra will be born if the Sun joins Mercury and Venus in aspect to or in association with Saturn. He will live by trading activities and be emaciated in childhood due to troubles. So also will his father be. The native will make his fortunes in the middle of his

life. He will be black in complexion and will incur destruction of many brothers. He will have six long-living sisters.

सूर्यलग्नाधिपे मन्दे मीने कालाग्निनाडिके।
निशाकरेण संयुक्ते सोदरभ्रातृनाशवान् ॥३४९८॥
भगिन्यो बहवश्चैव केचित्पक्षे ह्यसोदरः।
बाल्ये मन्दमतिः साधुः कामुको बुद्धिमान् सुखी ॥३४९९॥
यौवने बहुभाग्याप्तिर्वार्धके क्लेशवान् भवेत्।
निशाकरांशगे सूर्ये तदीशे शनिसंयुते ॥३५००॥
अल्पविद्यो शठः कामी क्षिप्रकोपी प्रवृत्तिमान्।
वयो मध्ये सुसामर्थ्यं कटुकाम्लरसप्रियः ॥३५०१॥
ज्ञानवान् धर्मबुद्धिश्च रजोगुणसमन्वितः।
तामसप्रकृति र्बाल्ये वयोमध्ये सुसात्त्विकः ॥३५०२॥
धर्ममार्गरतो नित्यं वैदिकाचारबुद्धिमान्।
देवब्राह्मण विश्वासी विंशोपरि सुभाग्यवान् ॥३५०३॥

3498 - 3503. Immovable Ascendant: (a) Saturn becoming the lord of the Sun sign and associated with the Moon will destroy one's brothers. The native will have many sisters. According to some, there will be no co-born. During his childhood, he will be dull-headed. He will be gentle, libidinous and (later on will become) intelligent. In his youth, his fortunes will be plenty. Old age will bring forth troubles.

(b) The Sun in Nisakara Nadiamsa, while his dispositor joins Saturn, denotes the following. The person will have limited education. He will be crafty, libidinous and be instantly irascible. In the middle of his age, he will become smart. He will be fond of bitter juices, wise, munificent and passionate. In his childhood he will be indolent and in youth gentle. He will be ever interested in taking to the path of justice and will follow the Vedic codes of conduct. He will have faith in gods and Brahmins. His fortunes will register increase after his 20th year.

Notes: (a) "Kalagni Nadiamsa in Pisces" is an interruption and a wrong copy for some other text while the Shashtiamsa with this name appears rightly in sloka 3504.

मन्दे कालाग्निषष्ट्यंशे मलिनः क्रूरकर्मवान्।
सम्पद्दाये महायोगं जन्मदाये च दुःखितः ॥३५०४॥
विप्लवेन धनच्छेदमग्निदाहेनवातथा।
भाग्यक्षीणमवाप्नोति षोडशाब्दान्तमेव च ॥३५०५॥
पश्चादल्पसुखी चैव मन्ददोषो न विद्यते।

3504 - 3505½. The native of an immovable ascendant, with Saturn placed in Kalagni Shashtiamsa, will indulge in dirty and cruel acts. His 2nd dasa will cause much prosperity, but the first dasa will usher grief. He will lose wealth in a calamity or in a fire accident and his fortunes will be on the decline upto the end of his 16th year. Afterwards, he will enjoy limited (or some) happiness and the blemish of Saturn (being in the said Shashtiamsa) will not exist.

सितांशगे विलग्नेशे ताराधिपसमन्विते ॥३५०६॥
सम्पद्दशायां नष्टं च स्वपित्रार्जितनाशनम्।
वृषभे चन्द्रदृष्ट्यंशे शुभद्वयसमन्विते ॥३५०७॥
निशाकरांशजातश्च विपद्दाये सुभाग्यवान्।
स्वप्नावल्यं च लभते क्षेमदाये फलं सुखम् ॥३५०८॥
प्रत्यग्दाये मनस्तापं दारिद्येण च कर्शितः।
साधनेशदशाकाले बहुभाग्य युतः सुखी ॥३५०९॥
क्षेमतार दशान्त्यादौ क्लेशः स्याद्वसुवत्सरे।
विपद्दाये धनप्राप्तिः क्षेमदाये महत् सुखम् ॥३५१०॥

3506 - 3510. (a) The lord of the ascendant, which is an immovable sign, begetting the company of the Moon and occupying a Navamsa of Venus, will cause losses in the 2nd dasa including paternal inheritances.

(b) One born in the subject Nadiamsa having two benefics in Taurus in Indu Shashtiamsa will enjoy much fortunes in his 3rd dasa. He will enjoy prosperity and happiness in the 4th dasa. His 5th dasa will cause mental distress and will physically weaken him due to penury. In the 6th dasa, he will make much prosperity and happiness. In the beginning and ending parts of the 4th dasa, he will be in grief for about 8 years. 3rd dasa will give wealth and 4th dasa (?) much happiness.

मीनत्रिकोणगे चन्द्रे वृश्चिकांशोद्भवस्य च।
इदमेव फलं सत्यं साधनेशदशासुखम् ॥३५११॥
पाके सौम्यदशान्त्यादौ विपद्दाये सुभुक्तिषु।
ज्वरभीतिं च लभते मृतप्रायोपजीवति ॥३५१२॥

3511 - 3512. An immovable ascendant having Scorpio Navamsa, while the Moon is in Pisces or a

trine thereof, will give the above effects, and happiness in the 6th dasa. In the beginning or ending portions of Mercury's dasa, or in the sub period of a benefic planet in the 3rd dasa, there will be fear of fever and the native will nearly die.

Notes: "Above effects" means the ones denoted at "b" of slokas 3506 - 3510. To wit, two of the following combinations will give identical results.

(1) The Moon in Taurus & *C.*

(2) An immovable ascendant which has Scorpio Navamsa & C.

The second yoga has an additional effect of giving happiness in the 6th dasa.

चन्द्रांशके तत्रिकोणे स्फुटयोगं गते शनौ।
स्वजन्मदेश नृपतिर्मृतः स्यान्नात्र संशयः ॥३५१३ ॥
निशाकरांशगे सूर्ये वृषभे च स्थिते सति।
मूलत्रिकोणगे मन्दे हाथ वा दृष्टिराशिषु ॥३५१४ ॥
चन्द्राक्रान्तर्क्षगे वापि चन्द्रांशे वा विशेषतः।
चन्द्रदृष्टेषु राशीषु स्फुटयोगं गते शनौ ॥३५१५ ॥

3513 - 3515. Irrelevant: Saturn moving in the sign that is identical with the Moon's Navamsa of birth, or its trine will kill the king. If the Sun is in Nisakara Nadiamsa in Taurus, Saturn in his Moola trikona Rasi .....in the sign aspected by .. when Saturn transits the sign identical with the Moon's natal Navamsa, or a trine thereof, particularly the said Navamsa sign ... in the sign aspected by the Moon .... (Incomplete text).

सप्तमाधिपतौ शुक्रे द्विग्रहेण समन्विते।
निशाकरांश नाड्यां तु जातश्चैव द्विभार्यकः ॥३५१६ ॥
मायाब्दे षोडशाब्दे वा स्वसोदर्याश्च शोभनम्।
सम्पद्दाये विवाहः स्यात् स्वविवाहो ह्यतः परम् ॥३५१७ ॥
सम्पद्दाये तृतीयांशे दारेशस्यांशके तथा।
स्फुटयोगं गते जीवे प्रथमोद्वाहमादिशेत् ॥३५१८ ॥
मन्दांशे संस्थिते चन्द्रे मीने शनियुतेक्षिते।
षोडशाब्दात् परं चैव द्विवर्षे पाणिसंग्रहम् ॥३५१९ ॥
दारेशांशे तत्रिकोणे दारजन्मर्क्षमं विदुः।
दारेशदृष्टिशौ तु योजयेत् कालवित्तमः ॥३५२० ॥

3516 - 3520. Scorpio Ascendant - Marriage: (a) One born in Nisakara Nadiamsa, Scorpio ascendant (one of the immovable signs) having the 7th lord Venus in the company of two planets will have two wives. During his 14th or 16th year, his sister's marriage will occur. After this, in the last one third part of his 2nd dasa, his first marriage will occur which will coincide with Jupiter's transit in the sign identical with the Navamsa occupied by the 7th lord (Venus) at birth.

(b) Marriage will occur within two years after the 16th year if the Moon is in a Navamsa of Saturn while the sign Pisces is related to Saturn by aspect or position.

(c) The natal birth star of his bride will correspond to the Navamsa occupied by he 7th lord (Venus) or a trine thereof.

Notes: (a) "Sobhanam" means a propitious function. Here it is to be interpreted as marriage.

कीटांशगे निशानाथे कुलीरांशे दिवाकरे।
सम्पद्दाये विवाहः स्याद्गोचरे वृषभे गुरौ ॥३५२१ ॥
अथवा मिथुने वापि मेषादित्रयमासगे।
लग्नात् सप्तमगे राहौ सङ्गरांशोद्भवस्य च ॥३५२२ ॥
जन्मदाये विप्लवेन स्वपितुः क्लेशमादिशेत्।
पितामह्या विनाशेन क्लेशं प्राप्नोति भूरिशः ॥३५२३ ॥
सम्पद्दाये शुक्रभुक्तौ केतुभुक्त्यन्तरेऽपि च।
स्वपितृव्य विनाशेन ह्यतीव क्लेशवान् पिता ॥३५२४ ॥
ततः पश्चाद्दरिद्रः स्यात् पितृव्यसुतनाशनम्।
पितृव्यस्य मनस्तापो भवत्यत्र न संशयः ॥३५२५ ॥

3521 - 3525. (a) For a native of Scorpio ascendant, the Moon and the Sun in order occupying Scorpio and Cancer Navamsas, marriage will occur in his 2nd dasa. The possibility is, transit Jupiter will then be in Taurus (the 7th). Or else, he could be in Gemini (the 8th). The corresponding months will see the Sun in transit in any of the 3 signs commencing from Aries.

(b) Immovable Ascendant - Nisakara Nadiamsa: If Rahu is in the 7th from the ascendant, one's father will be grieved due to some calamity. The grief, which will be abundant, will be due to loss of the native's paternal grand-mother. The native will be in much grief due to loss of father, in the 2nd dasa, in the end of Ketu's sub period or in Venus' sub period. Following this, there will be penury in the family, death of paternal uncle's (i.e. father's brother's) son and distress to the said

uncle.

Notes: (b) The name of the Nadiamsa in the first line of sloka 3522 should read as Nisakara Nadiamsa.

विक्रमाधिपतौ भौमे स्वर्भानुयुतवीक्षिते ।
पश्चात् सहोदरभ्रातृनाशं च मनुरब्रवीत् ॥३५२६ ॥

3526. Aquarius Ascendant: Mars being the 3rd lord and be in association with Rahu by company or aspect will destroy the native's younger brothers.

Notes: This applies to Aquarius, as Mars is the ruler of 3rd for an immovable ascendant.

पितृव्यसुतमावेशे राहुसंयुतबीक्षिते ।
स्वपितृव्यसुतारिष्टं विषाग्निजलहेतुना ॥३५२७ ॥
स्वपितृ द्वेषमूलेनजिह्वाच्छेदं विनिर्दिशेत् ।
मसूरिज्वर भीत्या च स्वज्येष्ठभ्रातृनाशम् ॥३५२८ ॥
चन्द्रांशे जननात् पूर्वं ज्येष्ठभ्रातृविनाशनम् ।
भगिन्यो बहुलाश्चैव मातुलाभावमादिशेत् ॥३५२९ ॥

3527 - 3529. Immovable Ascendant - Nisakara Nadiamsa: Should the 3rd house denoting the son of father's brother be aspected or occupied by Rahu, danger to the said son through poison, fire or water be foretold. Further due to enmity with the said uncle, the native's tongue will be cut off. His elder brother would die due to haemorrhoids (or small-pox), prior to the native's birth. He will have many sisters but not a maternal uncle.

Notes: Nisakara Nadiamsa is at times referred to as "Chandramsa". The Moon's natal Navamsa position as well as Cancer Navamsa are also denoted by the term "Chandramsa". Suitable care is taken in the rendering.

पितामहस्य भ्राता च नास्ति चन्द्रांशगे रवौ ।
पितामहस्वसाप्येका पुत्रिणीदीर्घ जीविनी ॥३५३० ॥
पितामह्यास्तु वार्धक्ये नेत्रक्लेशं विनिर्दिशेत् ।
दीर्घायुर्योगमित्याहुः पौत्रनाशेन कर्शिता ॥३५३१ ॥
एकः कश्चित् पितृव्येषु दुष्टपुत्रयुतो भवेत् ।
भाग्यमूलात् सुसन्तोषी त्वगम्यागमनोत्सुकः ॥३५३२ ॥
तस्य पापवशात् क्लेशं वार्धके व्रणमादिशेत् ।
भाग्यक्षीणं च लभते संपद्दाये त्विदं फलम् ॥३५३३ ॥

3530 - 3533. For one born in the subject Nadiamsa, the Sun in Cancer Navamsa would not cause a brother but a sister to the native's paternal grand-father. The said sister's daughter will be long-lived. The native's paternal grand-mother will incur eye troubles in her old age. She will be long-lived but emaciated on account of (premature) loss of grand-sons. One paternal uncle will have a wicked son, will be happy through his prosperity and be enthusiastic of travels. Due to his sins he will incur ulcers in his old age and his fortunes will decline. These effects will be evident when the native will be in his 2nd dasa.

सम्पत्ताराधिपे सौम्ये दशायां च स्वभुक्तिषु ।
विद्यारम्भं च लभते ह्यथ वा शुक्रभुक्तिषु ॥३५३४ ॥
तत्काले च पितृव्यादि क्लेशं प्राप्नोति भूरिशः ।
लग्ने जीवे मदे राहौ मलिनः पापचेतनः ॥३५३५ ॥
चन्द्र शनियुते दृष्टे बाल्ये दारिद्ययोगवान् ।
विंशद्वर्षात् परं सौख्य मेकयोगो न विद्यते ॥३५३६ ॥
विपद्दाये भाग्यवृद्धिं पुत्रसौख्यं विनिर्दिशेत् ।
लग्ने केतुयुते जीवे तदीशे चन्द्रसंयुते ॥३५३७ ॥
सीतांशनाडिगे भाग्ये योगः कुसुमनामकः ।
अचरे कुसुमे योगे वित्ते चद्रे च संस्थिते ।
विंशोपरि महद्भाग्यं सप्तत्रिंशात् परं व्यथाम् ॥३५३८ ॥

3534 - 3538. (a) The sub period of Mercury in his own dasa, which is the 2nd dasa from birth, will commence one's education. During this time, much grief to paternal uncle will come to pass.

(b) Jupiter in the ascendant as Rahu is in the 7th will make one dirty and sinful.

(c) The Moon aspected by Saturn, or being with him, will cause poverty during childhood. He will be happy after the age of 20. His fortunes will increase in the 3rd dasa and he will be happy through his son. ("Eka Yogo Na Vidyate" in sloka 3536 is a corrupt ccopy.)

(d) With Ketu in the ascendant in the company of Jupiter, while their dispositor is with the Moon, Kusuma Yoga leading to prosperity is caused. In the said Yoga, if the Moon is placed in the 2nd, one's fortunes will expand after 20th year of age. But grief will strike him after 37.

सूर्यलग्ने तत्रिकोणे मकरान्ते च वा शनौ ।
विपद्दाये पित्ररिष्टमत ऊर्ध्वं न जीवति ॥३५३९ ॥

क्लीबे शनिस्थिते काले सम्पत्तारादशान्त्यगे।
अपमृत्युभयप्राप्तिः शान्त्या शान्तिं प्रयास्यति ॥३५४० ॥

3539 - 3540. Saturn moving in the natal Sun sign, a trine thereto, or in the end of Capricorn, will cause death of father when the native will be in his 3rd dasa. Father will not survive beyond this phase. But when Saturn moves in a weak sign coinciding with the end of the 2nd dasa, father will have fear of untimely death. Suitable remedies be adopted.

कन्यान्ते वृश्चिकादौ च मेषान्त्ये वृषभादिके।
स्फुटयोगं गते मन्दे पितृव्यस्य विनाशनम् ॥३५४१ ॥

3541. Destruction of paternal uncle will come to pass with Saturn moving in the beginning of Virgo, end of Scorpio, end of Aries or beginning of Taurus.

लाभेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ।
लाभेशदृष्टिराशौ तु मातृपीडां विनिर्दिशेत् ॥३५४२ ॥
निशाकरांशगे सूर्ये कीटलग्नोद्भवस्य च।
क्षेमदाये मध्यखण्डे मात्ररिष्टं विनिर्दिशेत् ॥३५४३ ॥

3542 - 3543. (a) Danger to mother will exist with Saturn's transit in the sign identical with the Navamsa occupied by 11th lord, a trine thereof, or the sign aspected by 11th lord at birth.

(b) Scorpio Ascendant: Should birth be in Scorpio ascendant (instead of any fixed sign discussed so far) and the Sun be in Nisakara Nadiamsa, the middle part of the 4th dasa will endanger mother.

सुतेशे सुतभावस्थे निधनाधिपसंयुते।
गर्भस्रावातुरा भार्या जातं जातं मृतप्रजा ॥३५४४ ॥

3544. Immovable Ascendant: The 5th lord in the 5th in the company of the 8th lord will cause abortion to the native's spouse. Else, children will be dead as they are born.

कुम्भे जीवे केतुयुक्ते सौम्ये भृगुसमन्विते।
निशाकरांशे जातश्च पुत्रवांश्च न संशयः ॥३५४५ ॥
स्वपित्ररिष्टतः पश्चान्मात्ररिष्टच्च पूर्वगे।
षट्त्रिंशाब्दे दारहानिः सूचिकावात रोगतः ॥३५४६ ॥
ततः पश्चान्महत् सौख्यं क्षिप्रेणोद्वाहमादिशेत्।
ग्रन्थान्तरे जीवयोगे चन्द्रांशे जनितस्य च ॥३५४७ ॥
ज्येष्ठभार्या द्विसन्ताना दीर्घमायुश्च विन्दति।
शेषं नाशमिति प्राहुः पुत्री चैका चिरायुषी ॥३५४८ ॥

3545 - 3548. (a) One will doubtless have progeny if the sign Aquarius is occupied by Jupiter and Ketu, as the two planets Mercury and Venus are together (elsewhere). Further, the native's mother will die following his father's end. The subject will lose his spouse in his 36th year due to haemorrhoids or windy diseases. After this phase, his happiness will be great and he will soon remarry.

(b) There is another authority to state that one born in the subject Nadiamsa with Jupiter's involvement as at "a" above will have two long-living children through his first wife. And the rest (of male issues) will be destroyed. One long-living daughter is also denoted.

योगनाडी फलाध्याये नाड्यान्तुवित्तपस्य च।
आयुर्योगं च पुत्रादेः फलं विस्तरमादिशेत् ॥३५४९ ॥

3549. In the chapter dealing with effects in the Yoga Nadi, using the 2nd lord, a lot of combinations have been cited in respect of life-spans of sons and others.

विपद्दाये सुपुत्राप्तिव्यापारप्रबलं सुखम्।
चरेशयोगे त्वचरे द्विसहस्रधनाढ्यवान् ॥३५५० ॥
द्वौ पुत्रौ कन्यके तस्य दीर्घमायुश्च विन्दतः।
कर्मेशांशे तत्रिकोणे स्फुटयोगं गते शनौ ॥३५५१ ॥
कर्मेशदृष्टिराशौ तु भगिन्याश्च मनोव्यथा।
चक्रसन्धौ दशासन्धौ क्लेशकालं विनिर्दिशेत् ॥३५५२ ॥
सोदरस्य विशेषेण क्लेशं सम्पद्दशान्त्यगे।
भाग्यारूढाधिपे जीवे कुसुमे योगसंस्थिते ॥३५५३ ॥
तस्य नाडी फलाध्याये विस्तरेणाद्भुतं फलम्।
चतुःपञ्चाशगे वर्षे कीटलग्नोद्भवस्य च ॥३५५४ ॥
निशाकरांशे जातश्च ह्यपमृत्युं च विन्दति।
षष्ठाधिपदशाकाले मीनान्त्ये मेषगे शनौ।
मीनकन्यालिके मासे शुक्लपक्षे मृतिं वदेत् ॥३५५५ ॥

3550 - 3555. (a) His 3rd dasa will cause excellent sons and business progress.

(b) The lord of a movable sign in an immovable sign will cause wealth exceeding 2,000.

(c) His two sons and daughters will be long-lived.

(d) Saturn moving in the sign identical with the Navamsa occupied by the lord of the 10th, a trine thereof, or the one in aspect to the 10th lord, will

cause distress to the native's sister. Especially grief will occur to her in the junction period of the dasa (i.e. the native's 2nd and 3rd dasas). 2nd Dasa ending will particularly cause troubles to co-born.

(e) The lord of the 9th Aroodha Pada being involved in Kusuma Yoga .... (incomplete).

(f) Effects have been wonderfully explained for this Nadiamsa in the Chapter on effects (in the work consulted by the author).

(g) One born in Scorpio ascendant, Nisakara Nadiamsa, will incur fear of untimely death in his 54th year. His death will occur in the dasa of the 6th lord (Mars) when Saturn in transit is found in the end of Pisces or in Aries. The Sun in transit will then be in Pisces, Virgo or Scorpio with the currency of bright lunar half.

Notes: (b) "The lord of a movable sign" is a faulty description. This doubtful aphorism is also an interruption between "a" and "c" above.

वृश्चिकलग्ने विश्वांशः

विश्वांशे वृश्चिके लग्ने गौरकान्तः सुलोचनः।
धार्मिकोऽत्यन्तमेधावी समगात्रो प्रगल्भवान् ॥३५५६ ॥
पित्तप्रकृति देही च वाताधिक्यशरीरवान्।
अल्परोगी भयार्तश्च शिरोरोगी च वा भवेत् ॥३५५७ ॥
विप्रजन्मा सुखी नित्यं प्राज्ञो विद्वान् विचक्षणः।
मितभाषी मातृ भक्तो बाल्ये पितृविनाशवान् ॥३५५८ ॥
ज्येष्ठभ्रातृवशात् सौख्यं ब्रह्मचर्यादिकर्मणि।
विदेशे भैक्षवृत्त्यासौ बाल्येऽध्ययनतत् परः ॥३५५९ ॥
वेदाध्ययनसंपन्नो नानाशास्त्रविशारदः।
बाल्ये दुष्टस्वभावश्च प्रसिद्धश्चैव यौवने ॥३५६० ॥

3556 - 3560. Scorpio Ascendant - Visva Nadiamsa: One born in this part of the zodiac will be fair in complexion and will have charming eyes. He will be righteous, exceedingly intelligent, even-bodied and proud. He will have predominantly bilious and windy physique. He will incur diseases of the head. His diseases will be limited, i.e. not very serious. By birth a Brahmin, he will be learned, discerning, will speak within limits and be devoted to his mother. He will lose his father in childhood, be happy through his older brother. He will go to a distant land, maintain celibacy and beg for alms in order to undertake study of the Vedas. He will be rich in Vedic studies, skilful in many branches of Sastras, wicked in boyhood and become famous in his youth.

बाल्ये शूद्रप्रभुः पीडां जीवनोद्वाहमादिशेत्।
अंशधिपतिदोषेण मसूरीज्वर भीतिमान् ॥३५६१ ॥
यदि जीवति पुण्येन जलभीतिस्ततः परम्।
भ्रातृस्थानाधिपे मन्दे नीचे रविसमन्विते ॥३५६२ ॥
पश्चाद्भ्रातृविहीनश्च सोदरीभ्रातृमान् भवेत्।
चत्वारः सोदराः पञ्चसप्त वा स्युर्यथा बलम् ॥३५६३ ॥
द्वौ ज्येष्ठौ पुत्रवन्तौ च भार्याद्वययुतौ तथा।
एकास्वसापुत्रवती किंचित्कालं सुमङ्गली ॥३५६४ ॥
पश्चाद्वैधव्यमाप्नोति सुचरित्रवती भवेत्।

3561 - 3564½. (a) The native will be troubled by a Soodra king in his childhood and will marry early. He will be Due to the blemish of lord of the Navamsa ascendant, he will incur fear of small-pox. If he survives this danger, he will be later endangered through water.

(b) Saturn, who is the lord of the 3rd joining the Sun and occupying the sign of his debility (Aries), will deprive one of younger brothers. However he will have younger sisters. If Saturn is strong, 4, 5 or 7 brothers will be possible depending on his strength.

(c) Two of his older brothers will have sons and will have two wives. One sister will have sons and will have her husband living for some time. Later she will be widowed. She will be endowed with a good history.

Notes: "Jeevana" in sloka 3561 should read as "Yauvana" denoting youth, and hence early marriage is indicated.

विश्वांशे वृश्चिके लग्ने चन्द्रे भानुनिरीक्षिते ॥३५६५ ॥
जलभीतिं विजानीयात् सोदरस्य तथैव च।
वापीकूपतटाकेषुं स्ववंश्यजननाशनम् ॥३५६६ ॥
लग्नाधियोगे जातस्य लग्ने यावत् फलैर्युते।
तावद्वर्षात् सर्वभाग्यं धनवाहनवान् भवेत्।
यावदायुष्यमाप्नोति तावद्भाग्यं विनिर्दिशेत् ॥३५६७ ॥

3565 - 3567. (a) For one born in the subject Nadiamsa, the Moon in aspect to the Sun will cause danger to brother through water. His family members will be destroyed through wells and tanks (i.e.

water).

(b) Note if Lagnadhi Yoga exists in the horoscope and if so the number of (Sarva) Ashtaka Varga Bindus obtained by the sign ascending. In the year denoted by that number, the subject will enjoy all kinds of fortunes, wealth and conveyances. His prosperity will last throughout his life.

Notes: (b) This can be applied to the Moon if there is Chandradhi Yoga.

वित्तेशे मदराशिगे बलयुते चन्द्रे कुटुम्बस्थिते ।
भौमक्षेत्रगतेन्दुजे रवियुते मीनस्थिते भार्गवे ।
दीर्घायुर्धनवान् द्विदारसहितो ग्रामधिपः पण्डितः
कामी भोगसमन्वितो दिवि भुवि प्रोद्दामकोलाहलः ॥३५६८ ॥
विद्याशाली युवतिमदनो भानुतेजाश्चिरायुः
विंशत्यब्दे परमशिवपदाम्बोज पूजाप्रवीणः ।
नानामन्त्रागमपरिचितो वार्धके पुत्रवांश्च
श्रीमान् यानप्रमुखविभवो जायते राजपूज्यः ॥३५६९ ॥

3568 - 3569. The 2nd lord (Jupiter) should be in strength in the 7th (Scorpio), as the Moon is in the 2nd (Sagittarius), Mercury is in the company of the Sun in a sign of Mars (Aries) and Venus is in Pisces (exaltation). As a result of this entire set-up, one born in Scorpio ascendant will be endowed with longevity, wealth, two wives, lordship over a village and scholarship. He will further be libidinous, endowed with enjoyment of pleasures. He will be educated, will attract women, will have the radiance of the sun, and long-lived. In his (read "from his") 20th year, he will be skilful in offering worship to the lotus feet of Lord Siva. He will have acquaintance with various Mantras and Agama Sastras. He will beget sons (or progeny) in his old age, be illustrious, will have an array of vehicles and be revered by the ruler.

षष्ठेशेऽष्टमगेऽरिपे निधनगे वान्योन्यदृष्टे पुमान्
जातस्त्रिकालवित् सुरूपवनितायुग्मप्रयुक्तः सुखी ।
हीनानन्तरजो विदेशगमनश्छिन्नाघ उन्मादवान्
विप्रश्चेद्धनीबाहुजो यदि धनी दाताचिरायुर्भवेत् ॥३५७० ॥

3570. Lords of Evil Bhavas: The lord of the 6th in the 8th while the 8th lord is in the 6th, or these two planets in mutual aspects, will act as under. The person will be a knower of the past, present and future (i.e. an astrologer). He will possess two charming wives and be happy. He will visit foreign lands, be mad (or alternatively extravagant), learned and will have self-made wealth. He will be liberal and long-lived.

विश्वांशे जनितः पुमान् सुनिपुणो यष्टाखिलश्रौतवित्
सद्विद्वानपरिग्रहैक निरतः सौन्दर्यलक्ष्मीयुतः ।
दारिद्र्येण च पीडितः कतिपयः त्कालं बहुक्लेशवान् ।
पश्चाद्भाग्यसमस्तभोगविभवः प्रख्यातकीर्त्या युतः ॥३५७१ ॥

3571. One born in the subject Nadiamsa will be highly skilful and will have a "second birth" (obtainable by a Brahmin) due to knowledge of the Vedas (i.e. versed in the Vedas). He will be a great scholar, a renouncer, and be endowed with beauty and wealth. After some time he will be in the grip of poverty and be in a lot of difficulties. Again later on, he will be blessed with all kinds of prosperity and enjoyments. He will have wide fame.

Notes: "Aparigraha" also means one destitute of a wife, i.e. unmarried; here it denotes a person who renounces everything including the utensils allowed for ascetics. Two marriages are indicated for the person vide sloka 3576 infra.

As far as one's wealth is concerned, it is evident, that there will be great swings.

विश्वांशे विष्णुभक्तश्च देवब्राह्मणपोषकाः ।
मध्ये यतिप्रसादेन बहुशिष्य प्रशिष्यवान् ॥३५७२ ॥
मीमांसान्यायतत्त्वज्ञो नानाविधिविशारदः ।
ग्रन्थकर्ता धनी श्रीमान्द्रव्यार्जन समर्थकः ॥३५७३ ॥
वेदान्तशास्त्रनिपुणो राजद्वारे सुपूजितः ।
यष्टा वैदिकमार्गेण विद्याजीवनवान् भवेत् ॥३५७४ ॥
देवालयप्रतिष्ठादितटाकोद्यानधर्मकृत् ।
अन्नदाता सुखी नित्यं पञ्चयज्ञपरायणः ॥३५७५ ॥
कलत्रद्वयवान् वाग्मी वार्धके बहुपुत्रवान् ।
सीमन्तपुत्रनाशः स्यात् कचिद्वन्ध्यापतिर्भवेत् ॥३५७६ ॥
दारान्तरे सुतप्राप्तिः पुत्रीपुत्रयुतो भवेत् ।
स्वमाता विधवा भूत्वा बहुकालं सुजीवति ॥३५७७ ॥

3572 - 3577. Further, he will be a devotee of Lord Vishnu and will honour gods and Brahmins. In the middle of his life he will receive the blessings of a saint and (thereby) will have students and students' students (i.e. numerous students). He will be well-versed in Meemamsa (examination of

the Vedic texts), justice, philosophy and various kinds of Commandments. He will be an author, be wealthy, illustrious and skilful in financial pursuits. He will be an expert in Vedanta (essence of the Vedas) and be honored by royal circles, will make sacrificial offerings (or worship) as prescribed by the Vedas and will eke out his livelihood through his learning. He will undertake charitable activities like construction of temple, tanks and gardens. He will have two wives, be an eloquent speaker and will have many sons (issues) in his old age. His eldest son will be destroyed. The native's (first) spouse will possibly be a barren woman. He will beget progeny through second wife. He will have sons and daughters. His mother will be widowed and be long-lived.

मात्ररिष्टात् परं भाग्यं पित्ररिष्टात् परं व्यथाम् ।
विवाहान्तरं सौख्यं क्षेमदायेऽग्निसिद्धिमान् ॥३५७८ ॥
वाजपेयादिकर्माणि क्षेमदाये भविष्यति ।
प्रत्यग्दायेऽथवाचैव देशान्तरसुभाग्यवान् ॥३५७९ ॥
द्वितीयोद्वाहमाप्नोति ब्राह्मणप्रभुसत्कृतः ।
स्वमतस्थापको नित्यं विद्यया नव्यभाषया ॥३५८० ॥
बाल्ये पुराणवृत्तिं च महाराजपुरे वसन् ।
विद्या वादे जयप्राप्तिर्द्वाविंशोपरि सौख्यवान् ॥३५८१ ॥
क्षेत्रलाभं च लभते ब्राह्मणप्रभुसौहृदात् ।
अग्निष्टोमादिकार्येषु सिद्धिर्भवति नित्यशः ॥३५८२ ॥
जन्मदाये त्वनावृष्टिर्लोके दुर्भिक्षजं भयम् ।
ज्येष्ठभ्रातृमनस्तापं जननीव्याकुलं तथा ॥३५८३ ॥
स्वदेहायासमाप्नोति बुधभुक्तौ न संशयः ।
तत्काले वृषभे मन्दे म्लेच्छप्राबल्यमादिशेत् ॥३५८४ ॥
परच्छिद्रं च लभते राज्ञामन्योन्ययुद्धजम् ।

3578 - 3584½. After the death of his mother, his fortunes will pick up. He will incur grief in the phase occurring after father's death. He will receive happiness following his marriage. In his 4th and 5th dasas, he will perform Fire Sacrifices including the one called "Vajapeyi" and will make his fortunes in a different country. He will have a second marriage and be honoured by a Brahmin ruler. He will firmly establish (the canons of) his religion with the help of a new language. During his childhood, he will have a profession related to the Puranas and will live in a city ruled by an emperor. He will beget success in learning and arguments. He will be happy after his 20th year of age. Through a Brahmin ruler, he will gain lands and will ever attain Siddhi through Agnishtoma sacrifice and others. During his first dasa, famine will strike his country(?) and his older brother will be destroyed. His mother will incur grief. In the sub period ruled by Mercury in the first dasa, his health will have setbacks. Saturn's movement in Taurus will cause strength to Mlechcha kings and kings will mutually fight(?)

Notes: "Vajapeya" is one of the seven Soma Sacrifices offered by kings or Brahmans to attain the highest position, preceding the "Rajasuya" and "Brihaspati Sava". One who has performed "Vajapeya" yagna is called "Vajapeyi". Kings attain strength required for a battle while Brahmins are blessed with Supreme Knowledge with this Yagna, so say Sastras.

सम्पत्ताराधिपे सूर्ये नीचग्रहसमन्विते ॥३५८५ ॥
क्लेशजीवनमाप्नोति ग्रामान्तरनिवासवान् ।
जीवान्तरे सौख्यफलं वदन्ति
ततोऽल्पसौख्यं च दरिद्रतां च ।
विपद्दशायां च नितान्तकष्ट
मतीव दुःखं गृहभूमिनाशम् ॥३५८६ ॥
सम्पत्तारदश्यत्यादौ विपद्दाये च यौवने ।
वेदाध्ययनसम्पन्नो भिक्षाशनवशात्सुखम् ॥३५८७ ॥

3585 - 3587. Other Dasas: (a) The Sun ruling the 2nd dasa and being with a debilitated planet will make one's life difficult. He will migrate to another village. In Jupiter's sub period he will receive happiness. Later, his happiness will be less and poverty will strike. (All these will occur in the 2nd dasa, of the Sun.)

(b) His 3rd dasa will cause endless difficulties and abundant grief. His home and lands will be destroyed.

(c) In the beginning and ending of 2nd dasa, and in the 3rd dasa, during his youth, he will be rich with Vedic studies and be happy obtaining alms by begging.

चोलदेशेऽपरिष्टं स्यात् संप्राप्ते राष्ट्रविप्लवे ।
सम्पद्दाये मध्यखण्डे चोलभूपतिविग्रहम् ॥३५८८ ॥

राज्यक्षोभवशात् क्लेशं पाड्यभूपतिहेतुना।
पश्चात् स्वस्थ समायुक्तः स्वदेशं पुनरेष्वपि ॥३५८९ ॥
नष्टराज्यात् सुभूषाप्तिश्चोलदेशाधिपस्य च।
विपद्दाये जातकश्च देशान्तरनिवासवान् ॥३५९० ॥
शास्त्राभ्यासं च लभते गृहस्थाश्रमसंयुतः।
विद्यार्थी नगरे ग्रामे ह्युहित्वा वारभोजनम् ॥३५९१ ॥

3588 - 3591. Chola kingdom will be subjected to evils including a national calamity (?). The native will incur enmity with the Chola king during the middle part of his 2nd dasa. He will incur grief due to national adversities and due to Pandya king. Afterwards he will recover and will return to his native land. The Chola king will gain ornaments through the lost kingdom(?) In the 3rd dasa, the native will have a change of country. He will learn Sastras and enter into family life. During his student days, he will eat in others' homes by turn on weekly basis (as was the practice in remote past in case of indigent students desirous of studying Sastras).

विपद्दाये राहु भुक्तौ भ्रातृसौख्यं धनागमम्।
ज्वरपीडामवाप्नोति स्वजनोद्वाहसंभ्रमम् ॥३५९२ ॥
कन्याशनिस्थिते काले विपद्दाये शुभाशुभम्।
राजर्षेस्तु प्रणाशश्च पाण्डयदेशे भविष्यति ॥३५९३ ॥
बहुसेनादि युक्तस्य राजपुत्रस्य चैवहि।
राज्यप्राप्तिः सुभूषाप्तिरल्पकालं भविष्यति ॥३५९४ ॥
तत्पुत्रश्च महासौख्यं राज्यलाभं धनागमम्।
विवाहोत्सवमाप्नोति जातकश्च प्रभोः समः ॥३५९५ ॥

3592 - 3595. In the 3rd Dasa, Rahu's sub period, his co-born will be happy and wealth will be acquired. The native will be troubled by fever. There will be a family marriage. Good and bad effects will occur with Saturn's transit in Virgo during the 3rd dasa. A sage-turned-king will be destroyed in Pandya kingdom(?) The prince will obtain a large army and ornaments, be greatly happy and will gain kingdom(?). In this dasa, the native's marriage will occur and he will be equal to a king.

कन्यान्ते च तुलादौ च मन्दे वक्रातिचारगे।
देशभङ्ग प्रजाक्षोभं लोके दुर्भिक्षजं भयम् ॥३५९६ ॥
अनावृष्टिहते देशे दुर्भिक्षं वत्सरद्वयम्।
पश्चात्सौख्यं प्रकुर्वीत विदेशे चान्तरे तथा ॥३५९७ ॥
काञ्चीपिनाकिनीमध्ये सैन्यनांशश्च जायते।
महायुद्धे भवेत्तत्र सेनाधिपतिनाशकृत् ॥३५९८ ॥
देशान्तरेऽप्यरिष्टं स्याद्ग्रामाधिपतिनाशनम्।
अशनाच्छादनेनैव ज्येष्ठभ्रातत्रादिनाशनम् ॥३५९९ ॥

3596 - 3599. Irrelevant: Saturn moving in the end of Virgo, or in the beginning of Libra in retrogression or accelerated motion, will affect the kingdom, cause troubles to populace and famine. For two years, there will be famine in the country due to lack of rains. Later on happiness will resume. The army chief and army will be destroyed. Evils will exist in another country also and the head of the village will incur destruction. Due to lack of food and clothes, elder brother will be destroyed.

विश्वांशे वृश्चिके लग्ने विपद्दाये शुभाशुभम्।
कृमिद्रुम फलप्राप्तिमल्पसौख्यं विनिर्दिशेत् ॥३६०० ॥
पूर्वार्धे च महत्कष्टमुत्तरार्धे शुभाशुभम्।
मध्यखण्डे त्वनावृष्टिर्दुर्भिक्ष च भविष्यति ॥३६०१ ॥

3600 - 3601. For a native of Visva Nadiamsa, Scorpio ascendant, the 3rd dasa will give good and bad effects. His happiness will be limited. The first half of the dasa will give great difficulties. 2nd half will give both evil and auspicious effects. In the middle of the dasa, lack of rains and will follow(?)

Notes: "Krumidruma" does not convey anything proper. It means "insects and trees". It should be "Kemadruma" meaning that due to such yoga, the native will receive checkered happiness.

बन्धुवर्गे मनस्तापं स्वदेहायाससंभ्रमम्।
पश्चादारोग्यमाप्नोति भ्रातृपीडा भविष्यति ॥३६०२ ॥

3602. Further, the native's kinsfolk will be under mental distress; his health will decline to recover after some time. His brother will incur evils.

लाभे शनिस्थिते काले पाण्ड्यदेशे जनावधि।
तद्वारि प्रमुखे क्लेशं राजोपद्रवामादिशेत् ॥३६०३ ॥
ब्राह्मणप्रभुसन्तापः पाण्ड्यदेशे भविष्यति।
यवनाधिपतेर्मृत्युस्तत्पुत्रप्रबलो भवेत् ॥३६०४ ॥
तद्राज्ये न्यायनाशश्च महायुद्धं भविष्यति।
विंशोपरि शरे वर्षे वृश्चिकान्ते शनौ स्थिते ॥३६०५ ॥

प्रकृतेः कर्मदोषेणे ह्यार्यावर्तजनावधि।
काशीप्रयागनगरीदेवब्राह्मणक्षोभकृत् ॥३६०६ ॥
म्लेच्छाक्रान्ते च नगरे शिवद्रोहं विनिर्दिशेत्।
तद्वार्ताश्रवणं चैव दशासन्धौ भविष्यति ॥३६०७ ॥

3603 - 3607. Irrelevant: Saturn moving in the 11th (in Virgo) will cause difficulties to men of importance in royal circles and cause royal wrath. Brahmin ruler in Pandya country will be grieved. Yavana king will die and his son will become powerful. Justice will incur destruction in that country. Four years later, after 20th year of age, Saturn moving in the end of Scorpio, troubles to men in Arya kingdom will come to pass. Brahmins and gods in Kasi and Prayaga will be troubled. These towns will be seized by Mlechchas and atrocities and on Siva temple will occur. The native will hear of all these events in the junction of the 3rd and 4th dasas.

विपद्दशान्त्यमारभ्य क्षेमदाये सुसौख्यवान्।
शूद्रप्रभुवशाल्लाभं क्षेत्रगोधान्यसङ्कुलम् ॥३६०८ ॥
स्वबुद्धिप्रबलं सौख्यं महाराजावलम्बनम्।
यत्नकार्यार्थसिद्धिं च राजमन्त्रीप्रसादजम् ॥३६०९ ॥

3608 - 3609. In the beginning and end of the 3rd dasa, and in the 4th dasa, the native will be happy. He will gain through a Soodra king and will gather lands, quadrupeds and wealth. His intelligence will grow and he will be happy following the footsteps of an emperor. The undertakings attempted by him will end in success. He will earn the favours of the king and his ministers.

लग्नाधिपदशाकाले पाण्ड्यदेशे महत्सुखम।
राजद्वारे जनस्नेहं धनवान्याम्बरादिकम् ॥३६१० ॥
निधनस्थानदोषेण शुभभुक्तौ मनोव्यथाम्।
पापभुक्तौ महत्सौख्यं गृहे गोधनसंकुलम् ॥३६११ ॥
भ्रातृपीडामवाप्नोति राजसन्मानमादिशेत्।
लग्नाधिपदशाकाले जीवे पञ्चगवत्सरे ॥३६१२ ॥
सप्तमे वाष्टमे वापि यज्ञकर्मरतः सुखी।
पश्चाद्भवति सन्तोषश्चाल्पलाभो धनागमं ॥३६१३ ॥
भ्रातृद्वेषमवाप्नोति गृहच्छिद्रं विनिर्दिशेत्।
पश्चिमां दिशमाश्रित्य गमन धनलाभदम् ॥३६१४ ॥
ग्रामान्तरे निवासी च शिवार्चनरतः सदा।
मृष्टान्नदानसन्तोषं राजदर्शनसंभ्रमम् ॥३६१५ ॥
अयत्नेन फलं चैव दारसौख्यं विनिर्दिशेत्।
द्वाविंशाब्दात् परं चैव योगः स्याद्वसुवत्सरे ॥३६१६ ॥
तन्मध्ये शुभकर्मणि कृत्वा पुण्यानि भूरिशः।

3610 - 3616½. (a) Mars' Dasa: The native of Scorpio ascendant, Visva Nadiamsa, will be greatly happy in the Pandya kingdom, during his ascendant lord's dasa. He will befriend people in royal circles and will acquire grains, clothes, wealth and the like.

(b) Mercury's Dasa: (During the dasa of Mercury) because of his 8th lordship, the sub period of a benefic will cause mental distress while that of a malefic will bring forth much happiness, royal honour and cause acquisition of quadrupeds and wealth for the family, anyway followed by adverse effects viz. evils to brothers.

(c) Mars' Dasa: In the dasa of the lord of the ascendant, during the 5th, 7th or 8th year of age, the native will be fond of performing deeds related to Yagna (Vedic sacrifices). He will have enmity with his co-born in this dasa and evils to family will occur. He will acquire wealth by resorting to journeys to the western part of the country. He will live in a different village, be fond of worshipping Lord Siva, will enjoy happiness serving needy people with sweet food and will meet a king. He will obtain fruits of his labour effortlessly and be happy with wife (i.e. will beget married). His prosperity will commence from the age of 22 and may exist for 8 years. In between this time, he will perform auspicious deeds and earn a lot of merits.

Notes: (a) This belongs to the dasa of ascendant lord Mars.

(b) Reference to Mercury dasa is an interruption, but is an independent and useful clue.

(c) In sloka 3612, reference to Jupiter occurs without a proper connection. Whether it is in place of some other useful word remains unknown.

मीनेऽर्कनन्दने काले एकोनत्रिंशवत्सरे ॥३६१७ ॥
चोलदेशेऽप्यरिष्टंऽस्यात् पाण्ड्यभूपतिहेतुना।
मण्डलाधिपतेर्मृत्युः समरे च भविष्यति ॥३६१८ ॥
तस्य पुत्रस्य भार्यादेः सङ्घातमरणं भवेत्।
चोलभूपतिमूलेन देशधान्यफलं विदुः ॥३६१९ ॥

3617 - 3619. Irrelevant: During the 19th year with transit Saturn in Pisces evils will occur in the Chola kingdom, perhaps on account of the ruler of Pandya kingdom. The king of Chola will die in the war and his son and daughter-in-law will be hit to death.

अष्टविंशे दशासन्धौ सामान्यफलमश्नुते ।
देहायासं च लभते स्वजनामयशोकवान् ॥३६२० ॥
पश्चादारोग्यसन्तोषं नित्यं मृष्टान्नभोजनम् ।
क्षेत्रलाभं समाप्नोति पश्चादाप्तजनावधि ॥३६२१ ॥

3620 - 3621. During the native's 28th year, the junction of the dasa will give ordinary effects, physical illness to self and he will experience grief due to his men being troubled by diseases. Later on, health will be recovered and he will enjoy good food and will gain lands.

क्षेमाधिपदशाकाले स्वभुक्तौ सौख्यमश्नुते ।
स्वान्तभुक्ति विना भाग्यं मध्ये किंचिदृणं भवेत् ॥३६२२ ॥
त्रिंशब्दे राहुदोषेण मित्रप्रभुवशादृणम् ।
अन्त क्लेशं मनस्तापं राहुभुक्तौ शुभाशुमम् ॥३६२३ ॥

3622 - 3623. The first sub period of the 4th dasa will cause happiness. Its concluding sub period will go without granting fortunes. In between (the dasa), one will be in debts. During his 30th year, he will fall in debts due to a friendly king due to ill-placed Rahu. In the end, he will be grieved and feel distressed. Rahu's sub period will cause good and bad effects.

सेनाधिपतिनाशश्च पाण्ड्यदेशे भविष्यति ।
पाण्ड्यभूपतिसन्तापो चोलदेशे तथैव च ॥३६२४ ॥
अन्याक्रान्तंभवेच्चापि चोळराज्यं नसंशयः ।
मेषे शनिस्थितेकाले पाण्ड्यदेशे जनावधि ॥३६२५ ॥
स्वबन्धु व्ययंमाप्नोति तद्राज्याधिपतेर्विपत् ।
स्वयं कृतादनर्थः स्यात्पाण्ड्यदेशाधिपस्य च ॥३६२६ ॥
मेषेशनिस्थिते काले फलमेवमुदाहृतम् ।
तद्वारि प्रमुखैः क्लेशं संचितार्थविनाशनम् ॥३६२७ ॥
राजद्वेषाणि कार्यणि तन्मूलाद्वेधमाप्नुयात् ।
उत्तरां दिशमाश्रित्य बहुसेनागमं तथा ।
परचक्रं प्रकुर्वीत काञ्चीदक्षिण भागके ॥३६२८ ॥
अन्योन्ययुद्धं क्षितिपालकाना–
माकस्मिकं भूपतिवेधमाहुः ।
पाश्चात्यकांश्चाप्यवान् एति ।
क्लेशं वदेद्भूपतिसैन्य नाशात् ॥३६२९ ॥

3624 - 3629. Irrelevant: The army-chief will be destroyed in the Pandya kingdom causing grief to the king and the kingdom. The Chola kingdom will be seized by other kings. During the transit of Saturn, the people of Pandya will be troubled. Relatives will disappear and the Pandya king will be endangered which will be due to his own fault. With Saturn moving in Aries, chief men in royal circles will be troubled and wealth gathered will be destroyed. Due to activities that will displease the king, the native will face obstacles. Huge army will arrive in the northern direction. The southern part will be seized by others. All of a sudden, kings will fight among themselves. During the march towards western direction, humiliation will occur. The king's army will be destroyed.

वृषे शनिस्थिते काले जातकस्य महत् सुखम् ।
धनलाभं च लभते नरवाहनसंयुतम् ॥३६३० ॥
प्रत्यक्ताराधिपे राहौ दशाकाले विलग्नगे ।
राजप्रसादमाप्नोति देशान्तरफलं वदेत् ॥३६३१ ॥
वनान्तरप्रभुद्वारे राहुभुक्तौ श्रियं वदेत् ।
विद्याविनोदगोष्ठी भिर्वस्त्रलाभं विनिर्दिशेत् ॥३६३२ ॥
प्रत्यकारदशाकाले मिथुनान्तेऽष्टमे शनौ ।
मात्ररिष्टं विजानीयाच्छनि भुक्तौ न संशयः ॥३६३३ ॥
द्वात्रिंशे चोत्तरं गत्वा सकुटुम्बः सबान्धवः ।
शिष्यैः परिवृतश्चापि राजामात्यप्रपूजितः ॥३६३४ ॥
आर्जयित्वा धनं भूरि ग्रामांश्चावाप्यभूरिशः ।
आहर्ता सर्वयज्ञानां कर्तान्येषां च कर्मणाम् ।
सर्वसम्पत्समृद्धश्च योगः स्याद्दशवत्सरे ॥३६३५ ॥
मध्ये वयो वा यदि राहुपाके
विश्वांशयोगे भवति प्रसूतः ।
प्राकारतो मन्दरचित्रकूटः
पर्यङ्कशय्यामणिवस्तुलाभः ॥३६३६ ॥
चित्राम्बरो भूषणमाल्यहारो
चीनाम्बरो वा यदि स्वर्णपात्री ।
संबन्धियुक्तः स च बन्धुभोग्यो
दिवा च रात्रो यदि राहुपाके ॥३६३७ ॥

3630 - 3637. (a) The native will enjoy much happiness with Saturn's stay in Taurus in transit.

He will gain wealth and conveyances.

(b) 5th Dasa: Should Rahu be in the ascendant, and his Dasa be the 5th in order, one will earn the mercy of the ruler and will migrate to another kingdom. Due to a king ruling a forest region, he will make wealth in the sub period of Rahu and will gain knowledge, entertainment, robes and the company of the learned men. In the sub period of Saturn under the said 5th dasa, his mother will be endangered with Saturn moving in the 8th (Gemini). After the age of 32, he will be surrounded by his family members, kinsfolk and students, and will beget royal mercy. He will earn plenty of money. For ten years he will be endowed with prosperity and all kinds of wealth. Rahu dasa occurring in the middle of life will grant beds, gems and other articles. He will gain wonderful robes, ornaments, garlands, silken clothes, golden and vessels, be with his relatives and will enjoy pleasures day and night.

प्रत्यक्ताराधिपे केन्द्रे स्वोच्चांशे शुभदायके।
वाहनानि धनं भूरि गृहे लक्ष्मीकटाक्षवान् ॥३६३८ ॥
नित्योत्सवादिसन्तोषं शुभशोभनसंभ्रमम्।
कलांशकवशाद्भाग्यं भ्रातृसौख्यं शुभाधिकम् ॥३६३९ ॥
त्रिंशोपरि विशेषेण प्रत्यग्दाये शुभं वदेत्।
क्षेमदायान्तमारभ्य योगः स्यान्मनुवत्सरे ॥३६४० ॥
सोदरस्य विशेषेण पुत्रोत्सवफलं वदेत्।
जातकस्य कलांशेन सन्तानप्रतिबन्धकम् ॥३६४१ ॥
तन्मूलाद् व्याकुलं चैव भाग्यकालं विनिर्दिशेत्।
षष्ट्यंयशाधिपदोषेण प्रत्यग्दाये शुभान्तरे ॥३६४२ ॥
समानजनशत्रुत्वं पापभुक्तौ मनो व्यथाम्।
प्रत्यग्दाये मध्यखण्डे प्रथमान्त्यादि भागके ॥३६४३ ॥
शाक्तेयजनशत्रुत्वं राजद्वारे भविष्यति।
राजामात्यविरोधी च यत्नकार्यार्थविघ्नवान् ॥३६४४ ॥

3638 - 3644. (a) If the 5th dasa lord is in an angle or in his own Navamsa, he will prove auspicious granting conveyances, plenty of money, and the blessings of goddess Lakshmi. He will enjoy happiness everyday and auspicious events.

(b) If the said planet is in Kala Nadiamsa, one will be endowed with prosperity (in the 5th dasa), happiness for co-born and exceedingly auspicious effects.

(c) The 5th dasa will specially give auspicious effects after the age of 30.

(d) The beginning and ending portions of the 4th dasa will give prosperity, perhaps, for 8 years. His co-born will particularly obtain progeny.

(e) The native will face obstacles in begetting progeny as a result of the position mentioned at "b" above. Because of that he will be distressed.

(f) Due to the blemish caused by Shashtiamsa position for the 5th dasa lord, one will incur enmity with men equal to him, in the sub period ruled by a benefic. An evil planet's sub period will cause mental distress and enmity with people in royal circles and with the king and the minister. His undertakings will face obstacles.

दशेशांशपयोगेन स्वकार्यविजयी भवेत्।
कलांशाधिपतौ शुक्रे लग्नात् केन्द्रत्रिकोणगे ॥३६४५ ॥
प्रत्यग्दाये तत्फलं स्यादेकत्रिंशाब्दतः परम्।
कृष्णागोदावरीमध्ये यवनप्रभुपट्टणे ॥३६४६ ॥
तद्द्वारि सचिवस्नेहाद् ग्रामभूम्यर्थ लाभवान्।
यवनप्रभुसन्मानं ब्राह्मणप्रभुहेतुना ॥३६४७ ॥
कार्यसिद्धिं सुखप्राप्तिं गजान्तैश्वर्यमाप्नुयात्।
विचित्रमणिमाप्नोति स्वर्णभूषणमेव वा ॥३६४८ ॥
प्रत्यग्दाये फलप्राप्तिर्मध्यखण्डे विशेषतः।
द्वात्रिंशाब्दे धनं भूरि मध्यदेशे फलाधिकम् ॥३६४९ ॥
तत्रापि वसतस्त धनलाभो महान् भवेत्।
देशान्तरे निवासः स्यात् सुखतो दश वत्सरान् ॥३६५० ॥
तद्राज्ये त्रिचतुर्वारं गमनागमनं शुभम्।
दूरयात्राफलप्राप्ति र्दक्षिणायां भविष्यति ॥३६५१ ॥

3645 - 3651. Scorpio Ascendant: (a) Venus being the lord of the Shodasamsa ascendant and being in an angle or trine from the ascendant will give the said results(?) in the 5th dasa, perhaps after the 21st year. Due to friendship of a minister in the kingdom of the Yavana region situated between the rivers Krishna and Godavari, the person will gain villages, lands and wealth. He will be honoured by the Yavana king. His undertakings will be fruitful. He will gather wonderful gems and golden ornaments.

(b) The 5th dasa will specially reveal good effects in its middle part. In the 32nd year, one will make a lot of money and obtain more good effects

in the middle part of the country and will reside there. He will gain much wealth, will live in a foreign country happily for ten years, will travel in that country for 3 or 4 weeks and beget auspicious effects. He will undertake long distance trips to the southern part of the country.

Notes: (a) "Kalaamsa" is another name for Shodasamsa, according to sage Parasara. But the mention "above results" is not clear as the relevant portion is not present in our version.

अष्टमे शनिदोषेण क्रूरमासे ज्वराद्भयम् ।
मित्रशुत्रत्व कार्येण ह्यन्तःक्लेशं विनिर्दिशेत् ॥३६५२ ॥
प्रत्यग्दाये तृतीयांशे सत्कर्मफलमश्नुते ।
मध्यखण्डान्तमारभ्य तृतीयांशे त्रिवत्सरे ॥३६५३ ॥
अतीव सौख्य कार्यं च विशेषकृतसिद्धिदम् ।
दारान्तरं च लभते महानृपतिसत्क्रियाम् ॥३६५४ ॥
अतीव श्रियमाप्नोति महादेवीप्रसादतः ।
प्रत्यग्दाये द्वादशाब्दे नित्यश्रीर्नित्यमङ्गलम् ॥३६५५ ॥
राजप्रसादमाप्नोति ह्यधियोगवशात् सुखम् ।

3652 - 3655½. (a) When Saturn journeys in the 8th from the ascendant, one will be troubled by (serious) fever while his undertakings will bring forth enmity with friends and he will be inwardly hurt.

(b) In the last one 3rd part of the 5th dasa, he will indulge in good deeds. He will be extremely happy for three years in the beginning and ending parts of the middle of the said dasa. He will have another marriage and will obtain the mercy of a great ruler. Much wealth will be possessed by him due to the blessings of a goddess. In the 12th year, in the 5th dasa, he will ever have wealth and auspicious effects. The ruler will be kind to him. He will be happy due to Adhi Yoga.

Notes: (b) "Maha Nrupati Satkriyaam" should read as "Maha Nrupati Satkripaam".

प्रत्यग्दाये मध्यखण्डे गोचरे नवमे शनौ ॥३६५६ ॥
पाण्ड्यदेशेऽत्यरिष्टं स्यात्पश्चिमपुराधिपात् ।
कुलीरान्त्ये च सिंहादौ पाण्ड्यदेशे जनावधि ॥३६५७ ॥
तद्द्वारि प्रमुखैः क्लेशमन्तश्छिद्रवशाद्भयथा ।
औत्तर्यकलहं किंचित् कावेरीतीर एव च ॥३६५८ ॥
तद्राज्याधिपतेः सौख्यं नष्टराज्यधनागमम् ।
तत्पश्चिमपुराधीशसैन्यानाशश्च जायते ॥३६५९ ॥
सेनाधिपसुसन्तान योगभङ्गं विनिर्दिशेत् ।
तद्वार्ता श्रवणेनैव पाण्ड्यभूपतिनाशनम् ॥३६६० ॥
चोलपाण्ड्यपुराधीशवन्योन्यस्नेहमाश्रितौ ।
लभते तावुभौ मृत्युं कालगत्यानुसारतः ॥३६६१ ॥
सिंहे शनिस्थिते काले ह्यवन्त्यां यवनाधिपः ।
योगप्राबल्यमाप्नोति नानादेशाधिपत्यवान् ॥३६६२ ॥
प्रत्यग्दये परार्धेति सिहान्त्यादित्रिराशिषु ।
म्लेच्छः प्राबल्यमाप्नोति शनिचारवशात् फलम् ॥३६६३ ॥
शाखाभूपतियोगेन लोके दुर्भिक्षजं भयम् ।
ब्रह्मण्य क्षोभकार्येण बहुदेशजनावधि ॥३६६४ ॥
देवब्राह्मणसन्तापं देशत्यागं सुखक्षयम् ।

3656 - 3664½. Irrelevant: In the 5th dasa's middle part, when Saturn arrives in the 9th, evils in Pandya kingdom will occur due to a king of a town situated in the west. When Saturn moves in the end of Cancer or in the beginning, people will be in trouble. Important people in royal circle will be grieved, and will be distressed due to internal strife. There will be quarrels in the northern part and also on the banks of the river Kaveri. The kings of these regions will be happy and will recover lost kingdoms. The happiness of the ruler of the western part thereof will be destroyed. The prosperity of the progeny of the army chief will also be destroyed. After hearing this, the king of Pandya will collapse. The kings of Chola and Pandya regions will become mutual friends. Both of them will die in the course of time. When Saturn reaches Leo, the rulers of Avanti and Yavana will enjoy increased prosperity. In the 2nd half of the 5th dasa Saturn moving in the three signs from the end of Leo will cause prosperity of Mlechchas. These are the effects of Saturn;s transit. There will be famine in the world. Due to strife caused to Brahmins, people of many regions of the world will be in trouble. Gods and Brahmins will be destroyed, will leave the country and lose happiness.

जातकस्य विचारः स्याच्चत्वारिंशात् परं व्यथा ॥३६६५ ॥
प्रत्यग्दाये तृतीयांशे त्वेकचत्वारिवत्सरे ।
द्विचत्वारिंशगे चैव शुक्रभुक्तिवशाद्विपत् ॥३६६६ ॥
मित्राप्तप्रभुसन्तापं म्लेच्छमूलादुपद्रवम् ।
सर्वस्वनाशमाप्नोति जातकश्च विचारवान् ॥३६६७ ॥

कलहेन विनिर्गत्य स्वदेशाभिमुखे वसन्।
शुक्रांशकस्य दोषेण नानाव्याकुल संभ्रमम् ॥३६६८ ॥
मार्गमध्ये मनस्तापं चोरशस्त्रेण पीडनम्।
प्राणसंशयमाप्नोति सर्वाभरणनाशनम् ॥३६६९ ॥
पश्चात् स्वप्राप्तनगरे किंचिद्राज्ञा च सत्कृतः।
अशनासदनं प्राप्यमारायोः द्वयमावसेत् ॥३६७० ॥
पश्चादल्पसुखप्राप्तिः पुनरेति स्वमन्दिरम्।
तद्राज्याधिपतिस्नेहं विद्यागोष्ठीधनागमम् ।३६७१ ॥
धनं बहुविधं प्राप्यद्विजेभ्यः संप्रयच्छति।
परोपकार कार्येषु श्रद्धा च द्वययत्सरम् ॥३६७२ ॥
द्वादशांशवशात् सौख्यं हेमाम्बरसुवाहनम्।

3665 - 3672½. Venus' Sub-period: In the said 5th dasa, the native will have a change of place. He will be distressed after his 41st year. In the last one third part of the 5th dasa, in 41st or 42nd year, in Venus' sub period, he will be endangered. He will be in grief due to a ruler, a close friend of his, and be troubled through a Mlechcha king. Everything of his will be lost and he will have a change of place. He will be extinct in a quarrel and will come back to his own place. Due to the Navamsa blemish of Venus, he will incur various kinds of distresses and will wander. He will be grieved on his way and be endangered through thieves and weapons. All his ornaments will incur destruction and his mundane journey will be doubtful. Following these, he will come back to his home town and will somewhat undertake royal assignment. He will obtain food and shelter and will beget some happiness. He will befriend the ruler of the region and will acquire learning and wealth. He will help others for two years.

ब्राह्मणप्रभु योगेन लभते वाञ्छितं फलम् ॥३६७३ ॥
पुनश्चैवोत्तरं गत्वा प्रयाणे विघ्नमाप्नुयात्।
सर्वेषां जातके मन्दे कन्याराशित्रिकोणगे ॥३६७४ ॥
देशकालविपर्यासं मुनिभिः परिकर्तितम्।
परचक्रं च लभते म्लेच्छप्राबल्यमादिशेत् ॥३६७५ ॥
जातकस्यज्वरं किंचित् प्रत्यग्दाये शुभान्तरे।
बन्धुक्लेशफलप्राप्तिः स्वजनादिप्रपीडया ॥३६७६ ॥

3673 - 3676. With the Dvadasamsa position of Venus he will gain happiness, gold, robes and conveyances. His desires will be fulfilled due to a Brahmin king. He will again proceed to the north and will incur obstacles in journey with Saturn moving in the 3 signs commencing Virgo. Mlechchas will prosper. In the 5th dasa, in a benefic's sub period, the native will incur fever. His relatives will be troubled and be subjected to evils.

प्रत्यग्दाये तृतीयांशे मध्यभागे मनोव्यथा।
विप्लवेनविनिर्गत्य दक्षिणां दिशमेष्यति ॥३६७७ ॥
तृतीयांशस्य योगेन द्विचत्वारिंशतः परम्।
जन्मदेशे महत् सौख्यं राजामात्यप्रसादनम् ॥३६७८ ॥
धनधान्यसुभूषाप्तिः पाण्ड्यदेशे क्वचिद्भवेत्।
पुरा सत्कृतराज्ये च फलं ब्रूयात् क्वचित् क्वचित् ॥३६७९ ॥
तीर्थयात्रापदेशेन दक्षिणां दिशमेष्यति।
तत्रासौ सत्कृतो राज्ञा प्रत्यग्दाये शुभान्तरे ॥३६८० ॥
शाक्तीकराजसन्मानं नववस्त्रादि संयुतम्।
स्त्रीसौख्यं नित्यसन्तोषमीया ज्ञ्येष्ठदिमास्सु च ॥३६८१ ॥
पश्चात् स्वेशमासाद्य मुदैकाब्दं द्वयं च वा।
कलांशकस्य दोषेण विद्यावादकलापवान् ॥३६८२ ॥

3677 - 3682. In the last part of the 5th dasa, he will be mentally disturbed and be extinct. He will proceed towards the south. After the age of 42, he will prosper. He will enjoy much happiness in his country due to the mercy of the king and the minister, will obtain wealth, grains and ornaments. These will be to some extent in the Pandya kingdom. He will move towards the south on a pilgrimage. There, the native will be honoured by a king and be endowed with new robes etc. in a benefic's sub period. He will enjoy happiness through his wife and be happy in the month of Jyeshta and others (i.e. onwards). Afterwards he will return to his country. Due to the blemish of Shodasamsa(?) he will have quarrels in respect of education and learning.

प्रत्यग्दाये तृतीयांशे मध्यभागे तुलाशनौ।
कन्यान्त्यादिं समारभ्य वनस्थलगतः सुखी ॥३६८३ ॥
तत्र राजप्रसादेन कुटुम्बभरणे सुखम्।
क्षेत्रलाभसुखं नित्यं नदीप्रान्त्ये निवासवान् ॥३६८४ ॥

3683 - 3684. With Saturn's movements in the end of Virgo or in Libra, the subject will migrate to a forest region and be happy, during the last part of

5th dasa. There he will maintain his family with the mercy (patronage) of a ruler. He will gain landed properties and reside in a river region.

सुतेशांशकयोगेन सन्तानोत्पत्तिनाशनम् ।
पुनश्चैवोत्तरं गत्वा दूरदेशं प्रयास्यति ॥३६८५ ॥
पूर्वाश्रितवशाल्लाभं हेमाम्बरधनादिकम् ।
पश्चात् स्वदेशमाप्नोति धनलाभं विनिर्दिशेत् ॥३६८६ ॥

3685 - 3686. Venus joining the Navamsa owned by the 5th lord will cause destruction of progeny. He will again proceed to a bad kingdom situated in the north and seek patronage from his earlier sources, and will gain gold, ornaments and wealth.

प्रत्यग्दशान्ते परमोच्चभागे ॥
मन्दे सुवस्त्राभरणादिलाभम् ।
जनान्तरग्रामपुरीश मूलात् ।
सौख्यं सदा जीवनमाहुरार्याः ॥३६८७ ॥

3687. During the end of the 5th dasa, Saturn in transit attaining the degree of his deep exaltation, will grant the native quality robes, ornaments etc through a ruler. The native will be ever happy.

सुतादिपशाकाले जीवे पञ्चमसंस्थिते ।
स्वभुक्तौ पुत्रलाभः स्याद् गृहे गोधान्यसंकुलम् ॥३६८८ ।

3688. During the dasa of the 5th lord (i.e. Jupiter's dasa), and in his sub period, he will bless the native with a son quadrupeds and wealth, with his transit in Pisces.

प्रत्यग्दशासंधिकाले मित्रादिप्रभु विग्रहम् ।
महानृपति नाशश्च पाण्ड्यदेशे भविष्यति ॥३६८९ ॥
अराजकमिति प्राहुः स्त्रीमूलात् पोडशाब्दकम् ।
ब्राह्मणः प्रबलं चैति पश्चाद्राजसुतोऽपि च ।३६९० ॥
कुलटा राजपत्नी च विप्रान् सा घर्षयिष्यति ।
काममोहवशापन्ना राज्यं स्वं पालयिष्यति ॥३६९१ ॥
तत्पौत्रो लभते पश्चात्तद्राज्यं वञ्चयिष्यति ।
विश्वांशे च तत्फलं स्यात् शेषमन्यद्विचार्यताम् ॥३६९२ ॥

3689 - 3692. (a) The junction period of 5th dasa (with the 6th dasa), the native will have enmity with a king.

(b) Irrelevant: The ruler of Pandya kingdom will face destruction. For a period of 16 years, anarchy will spread on account of a female. Brahmins will grow in strength, so also the princes in a later period. The queen will be immoral. The kingdom will be destroyed due to lust for pleasures. Her grand-son will later recover the kingdom. These are the effects for Visva Nadiamsa. Rest should be guessed with the help of other books.

षष्ठाधिपदशाकाले स्वभुक्तौ सौख्यमाप्नुयात् ।
चन्द्रलग्नाद्भाग्यलाभदशायां भाग्यमश्नुते ॥३६९३ ॥
ज्येष्ठभ्रातृकलत्रस्य देहजाड्यं भविष्यति ।
पुत्रवृद्धि करा चैव धनधान्याम्बरप्तिदा ॥३६९४ ॥
जातकस्य महत् सौख्यं राजामात्यप्रसादजम् ।
शुभशोभनकार्याणि भ्रातृपुत्रश्च सौख्यवान् ॥३६९५ ॥
सुताधिपदशाकाले पापभुक्तौ भवेत्तथा ।
दुस्थे शनिस्थिते काले ज्येष्ठभ्रातृविनाशनम् ।
तन्मूलाद्व्याकुलं चैव तत्पूर्वं पुत्रलाभवान् ॥३६९६ ॥

3693 - 3696. (a) In the dasa of the 6th lord (Mars) and in the sub period of Mars, happiness will prevail.

(b) The dasa of the (lords) of the 9th and 11th from the Moon sign will produce prosperity. His older sister-in-law will be physically ill. His progeny will incur prosperity, wealth, corn and clothes. The native will be exceedingly happy through the mercy of the ruler and the minister.

(c) His brother's son will be happy on account of auspicious functions in a malefic's sub period during the dasa of Jupiter.

(d) Saturn moving in an evil house will cause destruction of elder brother and the native will be grieved on account of this. Earlier he will gain birth of a son.

विश्वांशयोगे मकरांशजातः
प्रत्यग्दशायां च सुतेशदाये ।
पापान्तरान्त्ये धनभूमिलाभं
महानदीप्रान्त इति ब्रुवन्ति ॥३६९७ ॥
महानृपतिसन्मानं ब्राह्मणप्रभुमित्रताम् ।
ग्रामलाभमवाप्नोति नदीप्रान्त्ये विशेषतः ॥३६९८ ॥
जीवपाके मध्यखण्डे बहुधान्यधनागमम् ।
शुभशोभनकार्याणि पुत्रस्यैव विनिर्दिशेत् ॥३६९९ ॥
जीवांशकस्य दोषेण पुत्रिकाक्लेशसंभवम् ।
पश्चात् सन्तानमाप्नोति योगं वै पञ्चवत्सरम् ॥३७०० ॥

3697 - 3700. (a) One born in Scorpio ascendant, Capricorn Navamsa will, in the 5th dasa or in

Jupiter's dasa, gain wealth and lands in a river region, during the operation of a malefic's sub period. He will be honoured by a great king and will befriend a brahmin ruler.

(b) He will specially gain of villages in the region of a river. In the middle of Jupiter's dasa, he will gain plenty of wealth and grains and celebrate auspicious functions relating to his son.

(c) His daughter will cause grief due to (bad) Navamsa position of Jupiter. He will obtain progeny later and will enjoy prosperity for five years.

Notes: (a) "Visvamsaka yogena" reads as "Shashtadhi Yoge" in another version, obliquely pointing to Adhi Yoga.

धनाधिपदशाकाले दुस्थाने रविनन्दने ।
मित्रप्रभु विनाशः स्यात्तत्पुत्रोऽल्पसुखी भवेत् ॥३७०१ ॥
दायादिवशमापन्नः क्लेशं प्राप्नोतिभूरिशः ।
देशान्तरे महत् सौख्यं तत्काले जातस्कय च ॥३७०२ ॥
धर्मसिद्धिमवाप्नोति पूर्वार्धे सौख्यदो गुरुः ।
शत्रुक्षेत्रवशात् क्लेशं भ्रातृद्वेषकलापनम् ॥३७०३ ॥
विभागयत्नमाप्नोति स्वकार्यप्रबलो भवेत् ।
जीवपाके मध्यखण्डे पूर्वार्धे शुक्रभुक्तिषु ॥३७०४ ॥

3701 - 3704. (a) During the operation of the dasa of the 2nd lord (Jupiter), transit Saturn reaching the 6th (Aries) will destroy a king with whom the native is acquainted. His son will enjoy reduced happiness. He will be endangered through his relatives and be in much grief. He will be happy in another country during this transit.

(b) In the dasa of Jupiter, the subject will gain knowledge of law. In the first half of the dasa, happiness will prevail. He will be troubled by enemies and misunderstandings with co-born. Attempts to family division will be made, His undertakings will grow in the middle portion of the first half of Jupiter's dasa.

कुम्भे शनिस्थिते काले राजद्वारे भविष्यति ।
स्थानच्युतिर्मनस्तापो. मित्राप्तजनविग्रहः ॥३७०५ ॥
प्रभुवर्गेऽपचारंच तन्मूलाद् व्याकुलं भवेत् ।
जीवपाके परार्धे च मध्यखण्डान्त एव च ॥३७०६ ॥
पुत्रोत्सवादिसन्तोषं गृहेचोद्वाहसंभ्रमम् ।
मीने शनिस्थिते काले व्याकुलं च फलं वदेत् ॥३७०७ ॥
पाण्ड्यदेशेप्यरिष्टं स्यात् सेनाधिपतिनाशनम् ।
चोलदेशे विशेषेण स्वशत्रुजननाशनम् ॥३७०८ ॥
गुरुचारवशात् सौख्यं जातकस्य धनागमम् ।
शुभशोभनकार्याणि कृत्वा धर्माश्च भूरिशः ॥३७०९ ॥
पूर्वाश्रितराजमूलात् क्षेत्रलाभं शुभाधिकम् ।
भ्रातृक्लेशमवाप्नोति ह्युत्तरार्धे फलं तथा ॥३७१० ॥
पूर्वार्धे बुधभुक्तौच करपादेषु रोगवान् ।
देहायासमवाप्नोति शान्त्या शान्तिं प्रयास्यति ॥३७११ ॥
जीवपाके तृतीयांशे नवांशकफलं शुभम् ।
पश्चिमां दिशमाश्रित्य प्रयाणे राजदर्शनम् ॥३७१२ ॥
विशेषधनवस्त्राप्तिं क्षेत्रलाभं विनिर्दिशेत् ।
नूतनप्रभुसन्मानं मित्रप्रभुविनाशनम् ॥३७१३ ॥
शुभशोभनकार्याणि गृहे सन्तानलाभवान् ।
तृतीयांशे मध्यखण्डे विशेषफलमश्नुते ॥३७१४ ॥
धनधान्याम्बर प्राप्तिं धर्मसिद्धिं विनिर्दिशेत् ।

3705 - 3714½. (a) During Saturn's transit in Aquarius, the native will lose his position in royal circles, be distressed and will incur enmity of friends and relatives. Offenses will occur in royal family and the native will be distressed in the 2nd half of Jupiter's dasa. There will be birth of son, and marriage in the family circles.

(b) Saturn journeying in Pisces will produce distress. Evils in the kingdom of Pandya and destruction of the army chief will also take place. Especially enemies in the Chola kingdom will face destruction.

(c) The transit of Jupiter(in favourable places) will cause happiness (with the above adverse transit of Saturn). The subject will incur wealth and he will perform auspicious and charitable deeds. He will gain lands from the king patronising him earlier.

(d) In the 2nd half of Jupiter's dasa, the subject will incur grief on account of brother.

(e) In the first half of the said dasa, the person will have bodily diseases including those of hands and legs.

(f) The last part of Jupiter's dasa will give auspicious effects due to his (good) position in Navamsa. He will journey towards the west and meet a king. He will gain much wealth, robes and landed properties. He will be honoured by a new

king. The friendly king will be destroyed. He will have gain of a son and auspicious family functions. The middle portion of the last one 3rd part of the dasa will give specially good effects in terms of wealth, grains, clothes and knowledge of law.

मेषे शनिस्थिते काले वृषभे च तथैव च ॥३७१५ ॥
क्रूरमासे ज्वरं चैव स्वभार्यापुत्र पीडनम् ।
सुताधिपदशाकाले राहुभुक्तौ मनोव्यथा ।
ज्येष्ठभ्रातृसुतक्लेशो भविष्यति न संशयः ॥३७१६ ॥
स्वर्भानुभुक्तौ गुरुदायकाले
भूपालसन्मानमतीव सौख्यम् ।
ग्रामाधिपत्यं धनलाभमेति
पूर्वाश्रितब्राह्मणमन्त्रिमूलात् ॥३७१७ ॥
शालीवाहशके लङ्कद्वितर्काद्यकतेः परम् ।
यवनाधिपतेर्मृत्युस्तत्पौत्रः प्रबलो भवेत् ॥३७१८ ॥
उत्तरायणगे सूर्ये सिंहस्थे देवपूजिते ।
अन्योन्ययुद्धं कुरुतः चोलपाण्ड्यपुराधिपौ ॥३७१९ ॥
नर्मदोत्तरगे भागे बहुसेनाश्वनाशनम् ।
जीवे केतुयुते काले तत्त्रिकोणे शनिस्थिते ॥३७२० ॥
फलमेवं प्रशंसन्ति लोके दुर्भिक्षजं भयम् ।
पाण्ड्यदेशेऽप्यरिष्टं स्याद्राजामात्यविनाशनम् ॥३७२१ ॥
यस्मिन् देशे पुरे ग्राम द्वितीयाष्टमजन्मगे ।
चतुर्थे दशमे वापि मन्दे स्वर्भानुसंयुते ॥३७२२ ॥
तद्राज्ये कलहः क्षोभं शुत्रराजभयं वदेत् ।
सैन्यनाशमवाप्नोति सेनाधिपति विग्रहम् ॥३७२३ ॥
शाखभूपतियोगेन देशकालफलं विदुः ।

3715 - 3723½. (a) The above will happen with the transit of Saturn in Aries and Taurus. With adverse solar movements during the said transits of Saturn, the person will incur fever. His wife and progeny will also be subjected to evils.

(b) In Rahu's period of Jupiter's dasa, mental distress will come to pass. His older brother will lose his son.

(c) **Irrelevant:** In the said Rahu's sub period, the king's progeny will be exceedingly happy, will gain lordship over villages and acquire wealth due to a Brahmin-minister. The Yavana king will die and his grand-sons will become strong. With the Sun in his northerly course, and Jupiter in Leo, kings of Pandya and Chola will mutually fight. Huge army will be destroyed in the northern part of Narmada. When Jupiter joins Ketu in a trine to Saturn, the country will reel under famine conditions; evils will occur in the Pandya region and the king and minister will be destroyed. In the said country, its towns and villages, there will be strife, and fear from inimical kings, with Rahu joining Saturn in 2nd, 8th, 1st, 4th or 10th. Army will be destroyed and enmity with army chief will occur.

षष्ठाधिपदशाकाले स्वभुक्तौ दक्षिणायने ॥३७२४ ॥
मनश्चापल्यमाप्नोति पुत्रपीडा भविष्यति ।
देहायासं मनस्तापं कलहेन विचारवान् ॥३७२५ ॥
क्रूरमासे फलं ब्रूयादल्पलाभं विनिर्दिशेत् ।
लग्नाधियोगराशिस्थे शनौ कर्मेश संयुते ॥३७२६ ॥
राजयोगफलप्राप्तिर्गृहे लक्ष्मीकटाक्षवान् ।
लग्नेशेनेक्षितो मन्दो दशाकाले फलप्रदः ॥३७२७ ॥
राजवंशे तु राज्याप्तिरितरश्चेच्छु भान्वितः ।
षष्ठाधिपदशाकाले स्वभुक्तौ चोत्तरायणे ॥३८२८ ॥
धनधान्यसमृद्धिश्च शुभशोभनसंभ्रमः ।
उत्कृष्टधर्मसिद्धिश्च विश्वांशे प्रबलो शनिः ॥३७२९ ॥
अग्निष्टोमफलप्राप्तिः पुत्रस्य फलमादिशेत् ।
ग्रन्यान्तरे विशेषेण स्वपुत्रश्शुभशोभनम् ॥३७३० ॥
लक्ष्मीकटाक्षमाप्नोति जातकस्य फलं वदेत् ।
पश्चिमां दिशमाश्रित्य बन्धुमूलाच्छुभाधिकम् ॥३७३१ ॥
वाहनाम्बर भूषाप्ति पुत्रस्तु श्रियमश्नुते ।
विश्वांशे वृश्चिके लग्ने पापी मन्दोऽपि सौख्यकृत् ।
स्वभुक्तौ श्रियमाप्नोति गृहे कल्याणसंभ्रमम् ॥३७३२ ॥
विश्वांशयोगे रविजस्य दाये स्वभुक्तिकाले शुभशोभनाप्तिम् ।
राजप्रसादेन सुवस्त्रलाभ मिष्टार्थसिद्धिं मुनयो वदन्ति ॥३७३३ ॥

3724. - 3733. (a) One will be mentally distressed and will incur evils to progeny during the Sun's southerly course, in the sub period of Mars, and the dasa of 6th lord (Mars). He will also fall sick and be troubled by strife. His gains will be reduced with adverse Sun's transits.

(b) Saturn occupying the sign causing Lagnadhi Yoga, in the company of the 10th lord, will cause a Raja Yoga and abundant prosperity.

(c) Saturn dasa will give good results if Saturn is aspected by the lord of the ascendant (Mars). With this, one born in royal family will acquire a

kingdom. Others will beget auspicious effects.

(d) With the Sun's northerly course in the dasa and sub period of Mars, the 6th lord, one will have plenty of wealth, and grains and will be busy with auspicious functions. He will obtain excellent moral wisdom, will perform Agnishtoma sacrifice and experience good effects for his son. There is another authority to stress specially auspicious effects for the native's son. The subject will obtain abundant wealth, and also much auspicious effects through his kinsfolk from the western direction. His son will gain wealth, conveyances, robes and ornaments.

(e) Although Saturn is a malefic for Scorpio ascendant, he will give happiness (in his dasa). In his sub period, wealth and auspicious functions will result. Due to the mercy of the king, he will gain quality robes and his desires will be fulfilled.

नीचराशिगते मन्दे निधनाधिपसंयुते।
देहजाड्यं च लभते क्रूरमासे रुजाधिकम् ॥३७३४॥
स्वजनाप्तजनक्लेशं भृत्यवर्गे मनोव्यथाम्।
बन्धुक्लेशफलप्राप्तिर्बुधसूर्यान्तरान्तरे ॥३७३५॥

3734 - 3735. When the 8th lord Mercury joins Saturn in Aries (both in transit) one will fall sick. His illness will increase with the adverse Sun's transits. His kinsfolk will be in grief and his workforce be distressed. The sub periods of Mercury and the Sun will cause grief to kinsfolk.

त्रिषष्ठनाथौ कुरुतोऽशुभं च
मन्दांशयोगे तु महत् सुखं च।
हेमाम्बरं स्वर्णसुभूषणाप्ति
पुत्रादिलाभं बहुभाग्ययुक्तम् ॥३७३६॥

3736. The lords of 3rd and 6th are evil. Great happiness will prevail because of the conjunction with Saturn's degree (or Navamsa). Golden ornaments and robes will be obtained apart from progeny and abundant prosperity.

Notes: "Mandamsa Yoge" is not explicit enough to obtain a clear meaning. For Scorpio, 3rd lord Saturn and 6th lord Mars are discussed here.

शनिभुक्तौ पाण्ड्यदेशे हताश्वो सैनिकेश्वरः।
शूद्रः प्राबल्यमाप्नोति राजपुत्रस्य विग्रहः ॥३७३७॥
चोलपाण्ड्य पुराधीशावन्योन्यद्वेषमाश्रितौ।
समयुद्धं भवेत्तत्र सैन्यनाशश्च जायते ॥३७३८॥
वृषभांश गते मन्दे गोचरे मिथुने स्थिते।
सेतुप्रान्ते विशेषः स्यात्तद्राज्याधिपतेर्विपत् ॥३७३९॥
उत्तरां दिशमाश्रित्य कलहः समुपैष्यति।
परचक्रं भवेत्तत्र शनिभुक्तौ न संशयः ॥३७४०॥
पूर्वाश्रितस्य शूद्रस्य प्राबल्यं शनिभुक्तिषु।
पाण्ड्यदेशे फलप्राप्तिरमात्यजन युद्धदा ॥३७४१॥
यद्भावस्याष्टमे मन्दे यद्भावस्याष्टमेक्षिते।
तद्भावः क्लेशमाप्नोति व्याधिना नाशमेव वा ॥३७४२॥
द्राविडान्ध्रप्रदेशेषु राज्ञामन्योन्यविग्रहः।
कर्णाटककोङ्कणे देशे त्वमात्यजनविग्रहः ॥३७४३॥

3737 - 3743. Irrelevant: In Saturn's sub period, the army chief of the Pandya kingdom will be destroyed. Soodras will grow in strength. The kings of Chola and Pandya will be destroyed and army will be destroyed in the war. When Saturn moves in Taurus and Gemini, the king of Setu will be destroyed. Quarrels will occur in the northern direction. Soodras will grow in strength. Ministers will fight in the Pandya region. From a Bhava, Saturn's aspect to or position in the 8th thereof will destroy that bhava. The kings of Dravida and Andhra will turn mutually inimical. The ministers of Karnataka and Konkana will have enmity.

सुखस्थानाधिपो मन्दो स्वभुक्तौ देहजाड्यकृत्।
क्रूरमासं परित्यज्य देहारोग्यं धनागमम् ॥३७४४॥
क्रूरमासे मनस्तापं देहायासं धनव्ययम्।
राजामात्यविरोधेन क्लेशं बन्धुविनाशनम् ॥३७४५॥
पशुधान्यव्ययं चैव विप्लवेन मनोव्यथाम्।
पुत्रदारादिपीडां च दुर्निमित्तं वदेत्तदा ॥३७४६॥
स्वप्रभोश्च मनस्तापं तद्द्वारस्थजनावधि।
राजकार्यविरोधेन धनधनायमुदीरयेत् ॥३७४७॥

3744 - 3747. Saturn as the lord of the 4th will in his sub period cause physical sickness. Health and wealth will accrue when the Sun is not in adverse transits. But with the Sun's bad transits, mental distress and loss of relatives, of quadrupeds and of grains will come to pass. His spouse and progeny will be subjected to evils. The king and his men will be distressed. The native will undertake royal deeds ("Rajakarya prakurvanti" is another

reading, which is right). He will gain wealth and corn.

चन्द्रलग्नाधिपे मन्दे दशायां च स्वभुक्तिषु।
लग्नात् सुखेश्वरो यस्य कालमृत्युर्न संशयः॥३७४८॥
सुखाधिपदशाकाले पापभुक्तिर्यदा भवेत्।
पित्ररिष्टं विजानीयान्मित्रप्रभुविनाश नम्॥३७४९॥
ह्रद्रोगादिमनस्तापं क्षेत्रगोधान्यनाशनम्।
चन्द्र लग्नेशदोषेण फलानि परिचिन्तयेत्॥३७५०॥

3748 - 3750. Saturn, who is the 4th lord, will cause death in his sub period (in his own dasa) if he becomes the lord of the Moon sign. The relevant sub period can also be of another malefic. Danger to father and to a friendly king will also follow. The native will incur cardiac diseases, distress and loss of lands, quadrupeds and grains. These evil results are due to Saturn's acquisition of Moon sign lordship.

पूर्वाषाढे च शन्यंशे विश्वांशे जायते नरः।
मन्ददाये मन्दभुक्तौ पितृभाग्यं विनिर्दिशेत्॥३७५१॥
अग्निष्टोमादिसत्कर्म गृहे कल्याणसंभ्रमम्।
पुत्रश्च फलमाप्नोति जातकस्तु महत् सुखम्॥३७५२॥
ज्येष्ठभ्रातृ सुतादीनां सन्तानोत्पत्तिसंभ्रमः।
धनधान्याभिवृद्धिः स्याद्गृहे लक्ष्मीकटाक्षवान्॥३७५३॥
शनिभुक्तौ तुलाजीवे मध्यखण्डे धनागमम्।
पुत्रप्राबल्यमाप्नोति पितृसौख्यं विनिर्दिशेत्॥३७५४॥
शनौ पश्चिमदिग्भागे स्वभुक्तौ फलप्रदः।
राजपुत्रप्रसादेन लभते भूरिशो धनम्॥३७५५॥

3751 - 3755. (a) Father: In case of birth in Scorpio ascendant, Capricorn Navamsa, with the Moon in Poorvashadha Nakshatra, the native's father will attain fortunes in Saturn's sub period (of Saturn dasa). He will perform Agnishtoma sacrifice. There will be a family marriage. The native will be very happy. His father's elder brother's son will obtain progeny and increased wealth and grains. Mercy of goddess lucre will prevail in the native's family.

(b) During the middle part of Saturn's sub period, Jupiter transiting in Libra will give wealth. One's son will obtain prosperity and his father will be happy. Good effects will emanate for the native from western direction. He will make much wealth through royal favours.

सुताधिपदशाकाले स्वभुक्तौ सप्तमे शनौ।
गोचरे फलमाप्नोति गजान्तैश्वर्य संयुतम्॥३७५६॥

3756. During the dasa of the 5th lord (i.e. in Jupiter's dasa), note the sub period of Saturn in currency. As a coincidence, if Saturn moves in the 7th (Taurus), he will be capable of giving (good) effects in the form of huge wealth.

Notes: Some may like to interpret the term "Swabhukti" as the sub period of the dasa lord, Jupiter. But in my opinion it refers to Saturn's sub period.

नीचराशिगते मन्दे तदीशे चन्द्रकेन्द्रगे।
नीचभङ्गफले प्राप्ति दशायां योगमाप्नुयात्॥३७५७॥
शनिभुक्तौ चोत्तरार्धे गजान्तैश्वर्यभाग्यवान्।
महाराजप्रसादेन स भूरिश्रियमश्नुते॥३७५८॥
विचित्रवस्त्राभरणार्थलाभं
राजप्रसादेन च भाग्यलाभम्।
विश्वांशयोगे त्वचरोद्भवस्तु
भाग्यं लभेत् स्पष्टदशाफलं च॥३७५९॥

3757 - 3759. If at birth Saturn is in his debilitation Navamsa, while his (Navamsa) dispositor (i.e. Mars) is in an angle from the Moon, it amounts to neecha Bhanga. As a result, Saturn's dasa will grant prosperity. The 2nd half of Saturn's sub period will give huge wealth, superior clothes, ornaments and fortunes through the mercy of a great king. These apply to birth in Visva Nadiamsa of an immovable ascendant.

Notes: Here the author resorts to identifying a cancellation of debility occurring in Navamsa. This is an important clue and worth putting to practical use in a general context.

The angular position of Mars (or the planet concerned) is better noted only in the Rasi chart.

जीवे सप्तमपर्याये कन्यादित्रयमासगे।
भाग्यकाल इति प्रोक्तो विश्वांशे जनितस्य च॥३७६०॥
उत्कृष्टधर्मसिद्धिः स्यात् पुत्रस्य शुभशोभनम्।
अतीव श्रियमाप्नोति गुरुभुक्तिवशात् फलम्॥३७६१॥
जीवास्तमनमासे च क्रूरमासे च वा यदि।
शनिभुक्तौ विचारं च देहायासं क्वचित् क्वचित्॥३७६२॥
चतुष्पष्टिसमान्त्या दौ राजामात्यप्रसादवान्।

कर्मसिद्धिमवाप्नोति पुत्रस्य फलमादिशेत् ॥३७६३ ॥
वसन्तकाले रविजस्य भुक्तौ
विश्वांशयोगे शुभकर्म सिद्धिम् ।
म्लेच्छादिसेवाफलमाकरोति
तुलागुरौ भाग्य विभूषणाप्तिम् ॥३७६४ ॥

3760 - 3764. (a) Jupiter's Sub-period: When Jupiter is in his seventh round of transit, the Suns' movements in the three signs commencing from Virgo will be a period of fortunes. The native will attain excellent moral merits. Auspicious effects concerning his son will take place. Much wealth will prevail in his family. These are during the operation of Jupiter's sub period (in the dasa of Jupiter).

(b) Saturn's Sub-period: When the planet Jupiter attains combustion, or with adverse solar transits, the sub period in question will cause a change of place and some physical illness. in the 64th year, one will gain the mercy of the king and minister. His son will perform final rites. In the spring season, the native will perform auspicious deeds and will serve a Mlechcha king. With Jupiter's transit in Libra, he will enjoy fortunes and ornaments.

कुम्भे राहुस्थिते काले मीनादित्रयमासगे ।
राजसन्मानसन्तोषं विद्यागोष्ठीप्रसङ्गतः ॥३७६५ ॥
पञ्चषष्टितमे वर्षे कारकांशे शुभाशुभम् ।
पूर्वाश्रितप्रभुप्रीत्या पश्चिमे फलमादिशेत् ॥३७६६ ॥
श्वेतवर्णस्वभूषादिलाभो भवति नित्यशः ।
स्वपुत्रस्य सुवाहाप्ति स्त्रीसौख्यं शुभशोभनम् ॥३७६७ ॥
मीनशुक्रवशाच्चैव त्विदं फलमुदाहृतम् ।
कुम्भे राहुस्थिते काले तत्त्रिकोणे शनिस्थिते ॥३७६८ ॥
स्वमित्रनृपतिक्लेशं तद्द्वारस्थजनावधि ।
पाण्ड्यदेशे विशेषं च देशाधिपतिविग्रहम् ॥३७६९ ॥
अमात्यजनसन्तापं शूद्रः प्राबल्यमश्नुते ।
युग्मे शनिस्थिते काले कीट लग्नसमुद्भवः ॥३७७० ॥
देहायासं च लभते वातपैत्यरुगुद्भवम् ।
अन्नद्वेषं गृहच्छिद्रमादायाधिकव्ययम् ॥३७७१ ॥
देहकार्श्यं च लभते दारपुत्रप्रपीडितः ।
लोके धान्यक्षयेणैव प्रजाक्षोभं शुभाशुभम् ॥३७७२ ॥

3765 - 3772. (a) Rahu's Transit: Rahu journeying in Aquarius while the Sun is in transit in the 3 signs from Pisces will bring forth royal honours, happiness, learning and association with men of letters. Good and bad effects will come to pass in the 65th year. Good effects will be through the earlier known ruler in the western direction. He will ever gain ornaments etc. His son will obtain conveyances and will enjoy auspicious effects.

(b) Venus in Pisces: With Venus in transit in Pisces (as Rahu is in Aquarius), the native will continue to gain golden ornaments. His son will beget an excellent conveyance, happiness through spouse and auspicious events.

(c) Irrelevant: Should transit Saturn be in a trine to transit Rahu in Aquarius, a king friendly to the native will be in trouble. Men in royal circles will be in grief. Ministers will be in grief. Soodras will prosper.

(d) Saturn in Gemini: With Saturn's transit in Gemini (while Rahu's transit is in Aquarius), the following effects will occur for one born in Scorpio ascendant. He will suffer from physical diseases caused by imbalances of wind and bile. He will hate food and incur family strife. His expenditure will cross his income limits. He will be bodily emaciated. His spouse and progeny will be subjected to evils.

(e) Irrelevant: Grains in the country will perish; people will be in grief. Good and bad effects will come to pass.

विश्वांशे वृश्चिके लग्ने पूर्वभाग समुद्भवः ।
मन्दपाके मन्दभुक्तावपमृत्युर्भविष्यति ॥३७७३ ॥
माताब्दे च महत् क्लेशं पित्ताधिक्यवशाद्भुजम् ।
महादेवप्रादेन देहारोग्यं विनिर्दिशेत् ॥३७७४ ॥

3773 - 3774. Death: The native of former half of Visva Nadiamsa, Scorpio ascendant, will face fear of untimely death in the dasa and sub period of Saturn. In his 25th year, he will be greatly anguished and will incur diseases of bilious excesses. Due to the kindness of Lord Siva, he will recover his health.

नैधनेशदशासन्धौ पुत्रश्च सुखमश्नुते ।
सन्तानोत्पत्तिसन्तापं खेदमोदं विनिर्दिशेत् ॥३७७५ ॥

3775. In the 7th dasa, his son will receive

happiness. He will be distressed on account of birth of a son and will experience happiness as well as grief.

विश्वांशे वृश्चिके लग्ने मन्दे बुधसमन्विते।
आपत्संन्यासवांश्चैव षष्ठाधिपदशासु च ॥३७७६ ॥
षष्ठाधिपदशाकाले विश्वांशे जनितस्तथा।
आपत्संन्यासमाप्नोति बुधभुक्तौ न संशयः ॥३७७७ ॥

3776 - 3777. For a native of Scorpio ascendant in Visva Nadiamsa, the conjunction of Saturn and Mercury at birth will cause ascetic order following a family calamity in the dasa of the 6th lord (Mars). This will be in Mercury's sub period in the dasa of the 6th lord.

यवन :-

शनिभुकत्यन्त्यमारभ्य मन्दे सौम्यान्तरान्तरे।
आश्रमान्तरमाश्रित्य नदीप्रान्ते मृतिं लभेत् ॥३७७८ ॥

3778. According to Yavana, in the sub periods of Saturn and Mercury, in the dasa of Saturn, one will live in a hermitage. He will die in the region of a river.

ग्रन्थान्तरे-

विश्वांशे वृश्चिके लग्ने ह्युत्तरांशसमुद्भवः।
शंभुपर्वतमासाद्य गुहायां निवसिष्यति ॥३७७९ ॥
पञ्चषष्टिसमे मृत्युरुत्तरायणगे रवौ।
नक्रे सूर्ये स्थिते काले कृष्णपक्षे मृतिं वदेत् ॥३७८० ॥

3779 - 3780. There is another authority to state that one born in the 2nd half of Visva Nadiamsa, Scorpio ascendant, will live in a cave in the region of Sambhu Hills. He will quit the world in his 65th year with the Sun's northerly sojourn, in the sign Capricorn, in dark lunar half.

निधनाधिपसंयुक्ते भद्रायां च तिथौ तथा।
विश्वांशे चोत्तरे भागे स्थिरलग्ने दिवं गतः ॥३७८१ ॥

3781. The death of the native of 2nd half of Visva Nadiamsa in an immovable ascendant will occur on a Bhadra Thithi.

Notes: "Nidhanadhipa Samyukte" means "joining the 8th lord". It is not clear who should join Mercury. Perhaps, the Sun in transit in Capricorn will be with Mercury. From this sloka, we have to take only the Thithi and Mercury joining the Sun, and then read with dark lunar half & C, vide the above two slokas.

पूर्वभागे प्रजातस्य संन्यासश्च न विद्यते।
षष्ठाधिपदशामृत्युं निधनाधिपभुक्तिषु ॥३७८२ ॥
द्विपञ्चाशात् परं वापि पञ्चपञ्चाशवत्सरे।
अथवा सप्तपञ्चाशे शुक्लपक्षे मृतिं वदेत् ॥३७८३ ॥

3782 - 3783. One born in the 1st half of the subject Nadiamsa will not take to ascetic order. In the sub period of the 8th lord (Mercury) and in the dasa of the 6th lord (Mars), his death will come to pass, in the 52nd year or in the 55th year, or in the 57th year, in a bright lunar half.

व्ययेशे स्वोच्चराशिस्थे विश्वांशे ब्रह्मलोक्रवान्।
कैवल्यं लभते चैव पूर्वभागे न विद्यते ॥३७८४ ॥

3784. Should the lord of the 12th (Venus) be in his exaltation sign, the native of Visva Nadiamsa will attain Brahma Loka and freedom from transmigration for his soul. But this will not happen in case of the 1st half of the said Nadiamsa.

विपत्ताराधिपे जीवे त्वैन्दवांशसमुद्भवः।
तृतीयांशे मनस्तापं सञ्चितद्रविणव्ययम् ॥३७८५ ॥
चन्द्रभुक्तौ देहजाड्यमग्निमान्द्यमरोचकम्।
सदा व्याकुलकार्यं च राजन्यद्वेषमादिशेत् ॥३७८६ ॥
राज्येऽपि स्वात्माश्रित भूपतेश्च
तत् द्वारिमुख्यप्रबलैश्च हानिम्।
कुजान्तरे क्लेशफलं तथैव
ह्यमात्ययोगार्थविनाशमाहुः ॥३७८७ ॥
चन्द्रान्तरान्त्यादि विपद्दशायां
कुजान्तरे बन्धुविरोधमेव।
स्वराजसौख्यं मुनयो वदन्ति
स्वग्रामकार्यार्थकलापनं च ॥३७८८ ॥
यवनप्रभुमूलेन कुजभुक्तौ धनव्ययम्।
ग्रामलाभमवाप्नोति ह्यल्पसौख्यं विनिर्दिशेत् ॥३७८९ ॥

3785 - 3789. Libra Ascendant: (a) For a native of Indava Nadiamsa, Libra ascendant, the last one third part of Jupiter's dasa, which is the 3rd from birth (i.e. for one born in Rahu dasa), mental anguish and loss of accumulated wealth will come to pass.

(b) In the sub period of the Moon (in Jupiter's dasa), he will incur illness, troubles of indigestion and loss of appetite. He will be ever in distress in respect of his undertakings and will incur the wrath of the ruler. The king and chief men in his circles

will be harmed(?).

(c) The sub period of Mars will cause anguish apart from destruction of wealth and friendship in ministerial circles.

(d) The beginning and end parts of the Moon's sub period, and the sub period of Mars, in the 3rd dasa (of Jupiter), one will have enmity with kinsfolk. His ruler will receive happiness(?) and the native will face impediments in the undertakings related to his village. He will spend his money on account of a Yavana king, and will gain villages but less happiness.

Notes: Slokas from 3785 to 3789 occur under "Scorpio ascendant - Visva Nadiamsa" in the original. But these belong to Libra ascendant, Indava Nadiamsa, as the following ones.

All of a sudden discussion on Jupiter's dasa, the 3rd from birth, suggests missing of a number of introductory slokas, which introduction is otherwise characteristic of Nadi literature.

तुलालग्ने ऐन्दवांशः

नीचराशिंगते भौमे तुलालग्नोद्भवस्य च।
विपद्दाये धनच्छेदः कुजभुक्तौ न संशयः ॥३७९० ॥
स्वप्रभोश्च स्वभार्यायां सन्तानोत्पत्तिनाशनम्।
कुजभुक्त्यन्तमारभ्य राहुभुक्ताविदं फलम् ॥३७९१ ॥
कुजभुक्तौ क्रूरमासे ह्यादायादधिकव्ययम्।
ग्रामकार्यकलापेन सदा व्याकुलमादिशेत् ॥३७९२ ॥
अनावृष्टिहते देशे लोके दुर्भिक्षजं भयम्।
चन्द्रभुक्त्यन्तमारभ्य कुजभुक्तौ फलं वदेत् ॥३७९३ ॥
राजद्वारे जनद्वेषं कुजभुक्तौ पशुक्षयम्।
देशान्तरे ग्रामलाभं क्रयमूलात् फलं वदेत् ॥३७९४ ॥
जीवे भौमान्तरे काले राजद्वारे कलापनम्।
राजन्यद्विजमूलेन यत्नरकार्यार्थ नाशनम् ॥३७९५ ॥
देवतादर्शनं यात्रां कुटुम्बसहितस्तथा।
ज्ञानसिद्धिमवाप्नोति धर्ममूलाद्धनव्ययम् ॥३७९६ ॥
द्विजहोमान्तमारभ्य क्रत्वन्ते धर्मसिद्धिमान्।
कुजभुक्तौ शुभं किंचिच्छुभमासे धनागमम् ॥३७९७ ॥
पूर्वग्रामविनाशश्च जीवे चन्द्रान्तरान्तरे।
इतरग्रामलाभादि कुजभुक्तौ विशेषतः ॥३७९८ ॥
शन्तिकांशे विपद्दाये द्यूनाधिपतिभुक्तिषु।
खेदमोदं च लभते क्रूरमासे विना शुभम् ॥३७९९ ॥
मित्राप्तजनसन्तापमादायादधिकव्ययम्।
गृहच्छिद्रकलापेन प्रवासं चापि निर्दिशेत् ॥३८०० ॥
कुजान्तरान्तमारभ्य राहुभुक्तौ महाविपत्।
सुतेशे वृश्चिकांशस्थे भूसुतेन समन्विते ।
पितामहः प्रसिद्धश्च शूद्रग्रामाधिपत्यवान् ॥४४८० ॥
तदभावे म्लेच्छसेवी ह्यन्नदानद्विजप्रियः ।
लग्नेशांशाधिपे शुक्रे नीचांशे चन्द्रसंयुते ॥४४८१ ॥
म्लेच्छराज्ये शूद्रसेवी स्वपिता भाग्ययोगवान् ।
पितामहस्तथैव स्यान्म्लेच्छग्रामाधिकारवान् ॥४४८२ ॥
स्वसमानद्विजः शत्रुस्तन्मूलाद्वयाकुलं महत् ।
कारागृह प्रवेशं च सुरांशे स्वपितामहः ॥४४८३ ॥
पश्चाद्भाग्यभिवृद्धिः स्यात् सेवकावृत्तिजीवकः ।
लग्नेशाल्लाभगे शुक्रे नीचांशे शत्रुराशिगे ॥४४८४ ॥
ज्ञातिवर्गे विरोधेन क्लेशवान् स्वपितामहः ।
कुग्रामबासी स्वपिता नीचांशे भाग्यनायके ॥४४८५ ॥
निशाकरेण संयुक्ते म्लेच्छराज्ये सुभाग्यवान् ।
धनदांशे पूर्वभागे सुरांशे लग्ननायके ॥४४८६ ॥
आयुष्मन्तौ च पितरौ धनधान्यसमृद्धिमान् ।
चित्रयोगे धने सौम्ये सुरांशे बहुवित्तवान् ॥४४८७ ॥
राजद्वारे प्रसिद्धश्च स्वपित्रधिक योगवान् ।
भ्रातृत्रययुतो मानी भगिनीद्वयवान् सुखी ॥४४८८ ॥
शेषं नाशमिति प्राहुर्वसुसंख्याः सहोदराः ।
सुरांशगे चित्रयोगे धनदांशोद्भवस्य च ॥४४८९ ॥
सोदराः पञ्च तेषां द्वौ प्रथितौ भाग्यशलिनौ ।

4480 - 4489½ (a) Grand-father: The 5th lord (Saturn) in Scorpio Navamsa in the company of Mars denotes that the native's paternal grand-father would be a famous man, heading a village resided by Soodras. Or else he would be serving a Mlechcha king.

(b) Father & Grand-father: With Venus and the Moon in Virgo Navamsa, as Mercury is in a Navamsa of Venus, the person's father will serve Soodras in Mlechcha kingdom and will enjoy prosperity. So also would be his paternal grand-father who would be the head of a village tenanted by Mlechchas. He would be greatly anguished due to enmity with Brahmins equal to him. He would also be jailed. Afterwards, his prosperity would increase but he would live by servitude.

(c) Venus should be in the 11th place with reference to Mercury and be in an inimical sign with Virgo Navamsa. As a result, the native's paternal grand-father would be grieved acquiring enmity with his kinsfolk.

(d) If the 9th lord (Venus) is in debilitation Navamsa, father will live in a small village. If Venus joins the Moon, father's prosperity will be in a Mlechcha kingdom.

(e) In case of birth in the former half of Dhanada Nadiamsa, Mercury's position in Sura Nadiamsa will cause long-living parents. The family will have increase of wealth and grains. Mercury causing Chitra Yoga (being in Libra as above) will give a lot of wealth to the subject. He will be famous in royal service and will earn prosperity exceeding that of father. He will have three brothers and two sisters and be honourable. Rest of the co-born will be destroyed. There may be a possibility of 8 co-born (out of whom 3 may die prematurely). He will have five brothers two of whom will be well-known and prosperous.

Notes: (e) There is some confusion in the text about number of co-born.

लग्नांशगे तत्त्रिकोणे स्फुटयोगं गते गुरौ ॥४४९० ॥
सोदरोत्पत्तिकालः स्यात् सम्पद्दाये पिता सुखम् ।
एका स्वसा सौख्यवती भूषिता कनकप्रभा ॥४४९१ ॥
मकरे पतिभक्ता स्यात् क्लेशिता च तथापरा ।
लग्नेशाद्भाग्यगे मन्दे भूसुतेन समन्विते ॥४४९२ ॥

पश्चात् सोदरहानिः स्यादल्पायुर्दायमादिशेत् ।
लग्नाधिपे तुलांशस्थे सोदरीभ्रातृसंयुतः ॥४४९३ ॥
दीर्घायुर्योगमित्याहुर्जयेष्ठभ्राता सुकीर्तिमान् ।
भाग्यस्थानाधिपे शुक्रे कर्मनाथेन संयुते ॥४४९४ ॥
भाग्ययोगमिति प्राहुः सत्कर्माचारबुद्धिमान् ।
धनदांशे पूर्वभागे सम्पद्दाये पिता सुखम् ॥४४९५ ॥
धनाधान्यसमृद्धश्च स्वपिता हृदि शुद्धिमान् ।
सुरांशगे विलग्नेशे विप्रनाडयुद्भवस्य च ॥४४९६ ॥
धनाधिपदशाकाले विवाहोत्सवमादिशेत् ।
पञ्चमाब्दात् परं चैव द्विवर्षे चोत्तरायणे ॥४४९७ ॥
ब्रह्मोपदेशकर्माणि मेषादित्रयमासगे ।
गुरुप्रथमपर्याये मेषान्ते वृषभे तथा । ४४९८ ॥
धनदांशे ज्येष्ठभ्रातृविवाहोत्सवमादिशेत् ।
जन्मतारदशान्त्यादि सम्पद्दाये स्वभुक्तिषु ॥४४९९ ॥
ज्येष्ठभ्रातृशुभं चेति मौञ्जीबन्धनमादिशेत् ।
धनदांशे पूर्वभागे चेङ्गितज्ञो भवेत् पिता ॥४५०० ॥
सुमुखः कुशली मन्त्री वेदतज्ञानतत्त्ववान् ।

4490 - 4500½. (a) Jupiter in transit in the sign equal to the Navamsa ascending, or a trine thereof, will cause birth of co-born. The 2nd dasa will cause happiness to father.

(b) The native will have one sister who will be happy possessing the splendour of gold and decorated with ornaments. (In Capricorn?) she will be devoted to her husband and will after some time be anguished.

(c) Saturn in the 11th (Cancer) in the company of (debilitated) Mars will deprive one of after-born. If they are born, they will be short-lived. His elder co-born will be endowed with longevity and wide fame.

(d) Should the 9th lord Venus be in the company of the 10th lord (Mercury), he causes Bhagya Yoga - one for prosperity. As a result, the person will undertake a path of good deeds and good conduct.

(e) If birth be in the 1st half of the subject Nadiamsa, father will be happy in the 2nd dasa, will have increased wealth and grains and a pure heart.

(f) Birth in the 1st quarter of the subject Nadiamsa, as Mercury is in Sura Nadiamsa will cause marriage in the dasa of Venus. His spiritual initiation will occur within 2 years after the 5th year. Then the Sun will be in his northerly course. Elder brother's marriage will occur with Jupiter in his first round of transit in the end of Aries or in Taurus, when the Sun is anywhere from Aries through Gemini. Elder brother's thread ceremony will occur in the end of the native's 1st dasa, or in the 1st sub period of 2nd dasa. His father will be a knower of others' minds, will have an attractive face, be skilful, a minister and an expert in Vedanta and Wisdom.

जातकस्य गुणं वक्ष्ये श्यामवर्णः सुबुद्धिमान् ॥४५०१ ॥
परोपकारनिरतः पञ्चयज्ञपरायणः ।
आस्तिकः सर्वधर्मज्ञो वदान्यो दृढसौहृदः ॥४५०२ ॥

4501 - 4502. Now described are the qualities of the native belonging to Dhanada Nadiamsa, Virgo ascendant. He will be black in complexion, be highly intelligent, fond of helping others and performing 5 kinds of Yagnas. He will be a believer in the Almighty, will have knowledge of various kinds of moral codes, be eloquent in speech and be firm in friendship.

लग्नेशे भार्गवांशस्थे शुक्रे नीचांशसंस्थिते ।
अन्तक्रोधी प्रसन्नात्मा किंचिल्लोभस्वभाववान् ॥४५०३ ॥
वित्ते सौम्ये शुभांशस्थे तेजस्वी बुद्धिमान् शठः ।
सुमुखः कुशलो धीरो विद्याबुद्धियुतः सुखी ॥४५०४ ॥
तुलांशे तौलिगे सूर्ये वेदशास्त्रार्थतत्त्ववित् ।
यतिप्रीतिकरो नित्यं सुरांशे कर्म शुद्धिमान् ॥४५०५ ॥
ज्येष्ठस्य पुत्राश्चत्वारः कनिष्ठस्य सुतद्वयम् ।
भ्रातृद्वयं तथा विद्याद्भगिन्यौ द्वे सजीविते ॥४५०६ ॥

4503 - 4506. (a) Venus in debilitation Navamsa while the planet Mercury occupies a Navamsa ruled by Venus will give the following effects. The person will inwardly be irascible but be pleased. He will be somewhat miserly.

(b) Mercury placed in the 2nd house with a benefic Navamsa will make one radiant, intelligent, craft, good-looking, skilful, bold and learned.

(c) The Sun in the sign Libra with Libra Navamsa will cause expertise in the meanings of the Vedas and Philosophy. One will please the saints and will perform pure acts. His older brother will have four sons while his younger one will have two.

Two brothers and two sisters will be blessed with longevity.

सुरांशगे चित्रयोगे वित्ते सौम्ये च जायते ।
बहुग्रामाधिकारी स्यात् स्वपितामहभाग्यवान् ॥४५०७ ॥
वसुवर्षात् परं पित्रोर्विशेषश्रीप्रदः सुखी ।
कन्यालग्ने धने सौम्ये तुलांशे पापवर्जिते ॥४५०८ ॥
लग्नेशस्य दशाकाले स्वपिता भाग्यभोगवान् ।
क्रूरयुक्तदशाकाले व्याकुलं ज्वरपीडनम् ॥४५०९ ॥
षष्ठाब्दे सोदरोत्पत्तिः सप्तमाब्दे क्वचिद्वयथा ।
विप्लवेन विचारः स्याद्दशवर्षात्परं सुखम् ॥४५१० ॥
निधनाधिपसंदृष्टे वत्सरे स्वपिता सुखम् ।
ग्रामकार्यकलापेन व्याकुलानन्तरं सुखम् ।
लग्नराशिदशाकाले नवमाब्दात् परं सुखम् ॥४५११ ॥
विवाहोत्सवकार्याणिस्वपितु र्भाग्यकालगे ।
शुभाब्दगे शुभं नित्यं क्रुराबदे व्याकुलं महत् ॥४५१२ ॥

4507 - 4512. (a) Mercury in Sura Nadiamsa in the 2nd would confer lordship over many villages and fortunes to paternal grand-father. After the 8th year of the native, a great deal of wealth will accrue to father's family.

(b) The ascendant being in Virgo as Mercury is in the 2nd (Libra) with Libra Navamsa will produce prosperity to father in the dasa of Mercury. But Mercury should not be, in the process, related to malefics. If at all Mercury is with a malefic, the dasa of the said malefic will promote anguish and troubles from fever. The native will have a co-born in the 6th year. Some worries will come to pass in his 7th year of age. A change of place will occur due to some calamity. Perhaps, happiness will be experienced after the 10th year of age.

(c) Father will be happy in the period when natal Mercury is aspected by transit Mars but only after debacles in undertakings related to the village. Happiness will also exist after the 9th year of age, in the dasa of Virgo (KCD). Following marriage activities, father's prosperity will rise. With favourable transits of Jupiter, auspiciousness will prevail, while his evil transits will promote anguish.

लग्नराशिदशान्त्यादौ स्वपति कीर्तिमान् सुखा ।
धनराशिदशाकाले ह्यथवा वित्तपस्य च ॥४५१३ ॥
सुरांशगे महद्भाग्यं गृहे लक्ष्मीकटाक्षवान् ।
द्वादशाब्दात् परं चैव व्ययाधिपतिदायगे ॥४५१४ ॥
क्रूरमासे पितुः क्लेशं क्रूरभुक्तौ न संशयः ।
व्ययाधिपे लग्नकेन्द्रे लग्नेशे धनराशिगे ॥४५१५ ॥
लग्नराशिदशासौख्यं व्ययराशिदशाव्यथा ।
लाभराशिदशाकाले मनुवर्षात् परं सुखम् ॥४५१६ ॥
क्रूरसंवत्सरं त्यक्त्वा लाभराशिदशासुखम् ।
ज्येष्ठभ्रातृसुतप्राप्तिः कनिष्ठभ्रातृसौख्यकृत् ॥४५१७ ॥
विवाहोत्सवकार्याणि भ्रातृमूलात् सुसौख्यवान् ।
सूर्यांशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥४५१८ ॥
स्वपिता देहजाड्येन ह्यादायादधिकव्ययम् ।
कन्यान्ते तौलिगे मन्दे सुरांशे जनितस्य च ॥४५१९ ॥
लग्नराशिदशाकाले देशे राजान्तरं भवेत् ।
लोके धान्यक्षयादीनि विप्लवेन प्रजावधि ॥४५२० ॥
सिंहे शनिस्थिते काले त्वर्घवृद्धिः प्रजासुखम् ।
ग्रामकार्य कलापेन स्वपिता व्याकुलं महत् ॥४५२१ ॥

4513 - 4521. (a) In the concluding part of the Virgo dasa (KCD), his father will become famous. It could also be in the dasa of Libra (KCD) or that of Venus (Vimsottari). This phase will produce great prosperity, and wealth to the family.

(b) After the 12th year of age, father will be subjected to evils. This will coincide with a malefic sub period in the dasa of the 12th lord (Sun) when the transit Sun will be moving in adverse signs.

(c) The 12th lord Sun in an angle from the ascendant while the ascendant lord (Mercury) is in the 2nd (Libra) will cause happiness in Virgo dasa, and distress in Leo dasa. The dasa of Cancer will cause happiness after 14 years (of its commencement). Except with adverse Jupiterian movements, the dasa of Cancer will promote happiness. During this time, his elder brother will obtain a son and the younger brother will enjoy happy effects. The person will enjoy much happiness through his coborn due to marriage activities.

(d) Saturn transiting in the sign denoted by the natal Navamsa position of the Sun, or a trine thereof, will trouble father through physical ailments.

(e) Irrelevant: The country's ruler will change in the dasa of Virgo when Saturn is found in the end

of Virgo or in Libra in transit. The country will reel under loss of crops and the population will be in the grip of a calamity. Saturn moving in Leo will promote commercial activities and the people will be happy. The native's father will be anguished due to reversals in village undertakings.

रन्ध्रेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ।
क्रूरमासे जातकस्य पित्रादीनां मनोव्यथा ॥४५२२ ॥
जीवयोगे धनप्राप्ती राजद्वारे सुखाधिकम्।
राहुक्रान्तर्क्षगे जीवे स्फुटयोगं गते शनौ ॥४५२३ ॥
विप्लवेन विनिर्गत्य ग्रामान्तरनिवासवान्।
लाभराशिदशाकाले सुरांशे जनितस्य च ॥४५२४ ॥
विंशद्वर्षात् परं सौख्यं स्वप्राबल्यं धनागमम्।
क्रूराब्दं च परित्यज्य पितृसौख्यं महत् सुखम् ॥४५२५ ॥
कर्मराशिदशाकाले सुरांशे व्याकुलं महत्।
अपरार्धे पित्ररिष्टमापत्संन्यासवान् पिता ॥४५२६ ॥
सुरांशगे सप्तविंशे त्रिंशेऽब्दे जनकस्य च।
क्रूरवत्सरदोषेण पितृपीडां विनिर्दिशेत् ॥४५२७ ॥

4522 - 4527. (a) Transit of Saturn: Saturn's sojourn in the sign caused by the Navamsa position of the 8th lord (Mars) or a trine thereof will produce mental distress to father and others, with the Sun's transit in adverse places.

(b) If Jupiter joins Saturn in transit, one will gain wealth and be exceedingly happy in royal circles.

(c) Jupiter occupying the sign held by Rahu (at birth) and transited by Saturn will cause a displacement to the native due to calamity and he will migrate to another place.

(d) Cancer - Moon Dasa: The dasa of Cancer will give happiness, prosperity and wealth after the 20th year (of age, instead of its commencement). His father will also be greatly happy in such years except when Jupiter will be in adverse transits.

(e) Gemini - Mercury Dasa: The dasa of Gemini will throw up much distress. Its 2nd half will endanger one's father who will take to ascetic order as a result of some calamity.

(f) 30th or 27th year of age of the native will endanger his father if Mercury is found in Sura Nadiamsa (in Libra). This will be finally caused with Jupiter's adverse movements within the said age bracket.

कर्माधिपे शुभयुते भाग्येशेन निरीक्षिते।
लाभराशिदशान्त्यादौ विशेषकर्म सिद्धिमान् ॥४५२८ ॥
नित्यान्नदानसिद्धिः स्यात् स्वप्राबल्यं महत् सुखम्।
त्रिंशोपरि शरैर्वर्षैः सोदरेण विभागवान् ॥४५२९ ॥
अतीव श्रियमाप्नोति नरवाहनवान् भवेत्।
भाग्यराशिदशाकाले सुरांशे बहुभाग्यवान् ॥४५३० ॥
दशग्रामाधिकारत्वमन्नदाने सुकीर्तिमान्।
क्रूराब्दगे महाकष्टं विप्लवेन धनव्ययम् ॥४५३१ ॥
शुभाब्दगे धनप्राप्तिं प्रबलोद्योगभाग्यवान्।
रन्ध्रराशिदशाकाले चत्वारिंशात् परं व्यथाम् ॥४५३२ ॥
चतुश्चत्वारिंशकेऽब्दे विशेषक्लेशवान् भवेत्।
मदराशि दशाकाले मदेशे लग्नकेन्द्रगे ॥४५३३ ॥
स्वपुत्रोद्वाहसिद्धिः स्यात् पुत्रिणी च सपुत्रिका।
कुम्भराशिदशाकाले शुभाशुभफलं समम् ॥४५३४ ॥
ज्येष्ठभ्रातृवियोगेन पुत्रनाशात् परं व्यथाम्।
सुतराशिदशामृत्युः पञ्चषष्टिः सुजीवति ॥४५३५ ॥
ब्रह्मलोकफलं सत्यं व्ययेशे शुक्रसंयुते।
सुतराशिदशाकाले क्रूराब्दे क्रूरमासगे ॥४५३६ ॥
अपमृत्युभयप्राप्तिः शान्त्या शान्तिं प्रयस्यति।
धनदांशे पूर्वभागे सुरांशे शशिनन्दने ॥४५३७ ॥
लाभराशिदशान्त्यादौ योगवान् कीर्तिमान् सुखी।
धननाडीफलं सत्यं प्रत्यक्षं देवकेरलम् ॥४५३८ ॥

4528 - 4538. (a) Cancer - Moon Dasa: Mercury should join a benefic (i.e. only Jupiter) and be in aspect to the 9th lord (Venus). As a result, the end of 11th Rasi's dasa (i.e. Cancer dasa) will usher performance of specially notable deeds. He will feed the poor continually. His fame will increase and he will be abundantly happy. Within 5 years after the age of 30, he will have division with his brother and will procure much wealth and conveyances.

(b) Taurus - Venus Dasa: The dasa of Taurus will cause much prosperity. He will head over ten villages, will feed the poor and be widely famous. But the years denoted evil transits of Jupiter will bring forth intense troubles and he will lose money in some calamity. Good transits of Jupiter will give him wealth and a prosperous employment.

(c) Aries - Mars Dasa: The dasa of Aries will, after the 40th year, cause anguish. His 44th year will be marked by abundant anguish.

(d) Pisces - Jupiter Dasa: The dasa of Pisces will stand to get his son married and his daughter will give birth to a female baby. During this phase, transit Jupiter should be in an angle from the ascendant.

(e) Aquarius - Saturn Dasa: The dasa of Aquarius will balance the good and bad effects. But distress will come to pass due to loss of a child for older brother.

(f) Capricorn - Saturn Dasa: The dasa of Capricorn will cause death. His life span will be 56 years.

(g) The 12th lord joining the Sun will consign one to Brahma's world after death.

(h) The dasa of Capricorn (vide "f" above) will register a fear of untimely death with adverse Jupiterian and solar movements. Suitable remedies be sought in this context.

(i) Mercury in Sura Nadiamsa will produce prosperity and fame in the dasa of Cancer.

(k) Results culled from Dhana Nadi (meaning the Nadi dealing with 2nd house, as Lagna Nadi deals with ascendant) are reflected in Deva Keralam which will bear truth.

मीनलग्ने कमलांशः

कमलांशे मीनलग्ने मेषे बुधयुते शनौ ।
रक्तवर्णतनुः प्राज्ञः शत्रुतापी क्रिये शनौ ॥४५३९ ॥
सिंहांशगे मतद्वेषी स्वमतान्तर निष्ठकः ।
कमलांशकगे मन्दे मेषे बुधसमन्विते ॥४५४० ॥
विष्णुभक्तिरतो नित्यं सोदरभ्रातृहीनवान् ।
मेषे रवियुते मन्दे कमलांशे च संस्थिते ॥४५४१ ॥
युग्मे भौमे प्रजातश्च धीरः शूरः सुबुद्धिमान् ।
देशान्तरे भाग्ययोगं पञ्चमे बहुवाचकः ॥४५४२ ॥
अपांपत्यंशगे मन्दे धार्मिकश्च स्वकार्यकृत ।
सर्वज्ञः सात्त्विकः क्रोधी मर्मभेदी च तापसः ॥४५४३ ॥
क्रूरषष्ट्यंशगे मन्दे कमलांशे सुबुद्धिमान् ।
अन्तःकपटवान् कामी कमलायतलोचनः ॥४५४४ ॥
पराक्रमे स्वतन्त्रश्च परेषां व्यसनप्रदः ।
क्षिप्रकोपी प्रसन्नात्मा कृशदेहस्वरूपवान् ॥४५४५ ॥

4539 - 4545. Pisces Ascendant - Kamala Nadiamsa: (a) For one born in this space of the zodiac, Saturn joining Mercury in the sign Aries will give a blood-red physique. He will be learned and will cause distress to his enemies.

(b) If Saturn obtains Leo Navamsa (in the above Yoga), he will hate his religion and will show interest in other religions.

(c) He will be devoted to Lord Vishnu and will have no co-born. (This has no bearing with Leo Navamsa.)

(d) Saturn in the company of the Sun while Mars is in Gemini will make one bold, heroic and highly intelligent. His prosperity will pick up in another country. Mars in the 5th will make him garrulous.

(e) Saturn in Apampathi Nadiamsa will make one righteous. He will be able to perform his job well, will be a knower of everything, be gentle, irascible, will break secrets and perform penance.

(f) Saturn in a malefic Shashtiamsa will bless one with a high degree of intelligence. He will be inwardly cunning, be libidinous, will have eyes resembling a lotus petal, be valorous, independent and will have secretive vices. He will be instantly irascible but be pleased. His body will be thin.

Notes: For Kamala Nadiamsa, please see notes under sloka 778, page 74, Book 1.

कर्मे राहौ धने मन्दे सिंहांशे लक्ष्मयोगगे ।
कमलांशे प्रजातश्च किंचिन्मूर्खस्वभाववान् ॥४५४६ ॥
अन्तःक्रोधी प्रसन्नात्मा राजन्यजनमैत्रवान् ।
स्वपिता भाग्ययुक्तश्च पुत्रभाग्यविहीनवान् ॥४५४७ ।
स्वभुजार्जितसंपन्नो मध्ये वयसि शोकवान् ।
मेषे सिंहांशगे मन्दे नाड्यां तु कमलांशके ॥४५४८ ॥
बाल्ये दारिद्र्यमापन्नस्त्रिंशेऽब्दे बहुभाग्यवान् ।
वातप्रकृतिदेहश्च मूर्छावायुप्रपीडितः ॥४५४९ ॥
सोदरक्लेशवान् रागी त्वङ्नवैकल्यपुत्रवान् ।
तदभावे च यमलसन्तानोत्पत्तिमादिशेत् ॥४५५० ॥
भौमांशकगते मन्दे भौमक्षेत्रेशुभान्विते ।
भातृसौख्यविहीनश्च पश्चात् सोदरहीनवान् ॥४५५१ ॥
कोपप्रकृतिमान् रागी मातामहमताश्रितः ।
बाल्ये चक्राङ्कितश्चैव पश्चात् पितृमताश्रयः ॥४५५२ ॥
उद्वाहानन्तरं भाग्यं विंशद्वर्षात् परं सुखम् ।
मातुलारिष्टतः पश्चात् स्वपितुर्गृहवासवान् ॥४५५३ ॥
आयुष्मन्तस्त्रिपितृव्याः मातुलद्वययोगवान् ।
मातृष्वसा भाग्यवती पितृव्यश्च द्विभार्यकः ॥४५५४ ॥

4546 - 4554. (a) Rahu in the 10th (Sagittarius) as Saturn is in the 2nd (Aries) with Leo Navamsa causes Lakshmi Yoga, leading to acquisition of wealth. The subject will be somewhat foolish with this yoga, be inwardly short-tempered, but pleased. He will have friends in royal circles, will enjoy fortunes through father but be bereft of happiness concerning children. He will have self-earned wealth and be grieved in the middle part of his life.

(b) Saturn in Aries with Leo Navamsa will cause poverty in childhood. After the age of 30, he will acquire much prosperity. He will suffer from windy disorders and loss of consciousness. He will incur grief in respect of his brother, be passionate and will have a deformed son. Alternatively, he will have twin children.

(c) Saturn should be in a sign and Navamsa of Mars and should join a benefic. As a result, one will not be happy concerning co-born and will have no after-born. He will be short-tempered, passionate and will follow the religion of maternal grand-father. In his childhood he will be initiated into Vaishnavite order and will later on switch over to his father's religion. His prosperity will rise after marriage. He will be happy after his 20th year of age. Following the death of his maternal uncle, he will resume his father's home. He will have three long-lived paternal uncles and two maternal uncles. His mother's sister will be fortunate. One of the paternal uncles will have two wives.

Notes: (a) "Swa Pita Bhagya" in sloka 4547 should read as "Swapitru Bhagya".

कमलांशकगे मन्दे स्वपितृव्यचतुष्टयम् ।
तेषां द्वौ पुत्रहीनौ च ह्यपरौ पुत्रसंयुतौ ॥४५५५ ॥
मातृष्वसुर्भर्तृभाग्यं कमलांशे स्वमातुलः ।
जीवनत्वमिति प्राहुः कमलांशोद्भवस्य च ॥४५५६ ॥
कमलांशे जन्मदाये क्लिष्टा मातृष्वसा व्यथाम् ।
लभते भाग्यनाशं च ह्यन्यदेशे पितामहः ॥४५५७ ॥

4555 - 4557. Saturn in Kamala Nadiamsa will cause four paternal uncles. Out of them, (the first) two will be childless. The last two will be blessed with sons. His maternal aunt will be fortunate in respect of her husband. During the native's first dasa, she will undergo mental anguish. Paternal grand-father's prosperity will be destroyed in a foreign land.

लग्नाच्चतुर्थगे भौमे ह्युग्रग्रह समन्विते ।
जन्मदाये मातृबन्धुवंशोपद्रवमादिशेत् ॥४५५८ ॥
पितामही दीर्घजीवा पितृव्यैकश्चिरायुषः ।
पितृव्यस्य तु जन्मर्क्षं मन्दांशे तत्त्रिकोणगे ॥४५५९ ॥
स्वजन्मर्क्षं पितृव्यस्य द्विभार्यश्चैक पुत्रवान् ।
आयुष्मत्यौ पुत्रिके द्वे शेषं नाशमितीरयेत् ॥४५६० ॥
पितृव्यसुताभावेशे नीचांशे स्वोच्चराशिगे ।
पितृव्यपुत्रिका क्लेशं पुत्रनाश इति स्मृतः ॥४५६१ ॥
पितृव्याधिपतौ मन्दे सिंहांशे नीचराशिगे ।
पितृव्यश्च दुराचारी राजद्वारे प्रसिद्धिमान् ॥४५६२ ॥
तत्पुत्रो जाड्यान् कामी वन्ध्यास्त्रीसक्तिमान् सदा ।
पीडितः प्रतिबन्धेन दत्तपुत्रविनाशवान् ॥४५६३ ॥

4558 - 4563. (a) Mars in the 4th in the company of a malefic planet will cause difficulties in the mother's family during the native's first dasa. His maternal grand-mother and one of the paternal uncles will be endowed with long life.

(b) The natal ascendant of paternal uncle will correspond to the Navamsa occupied by Saturn or a trine thereof. The said relative will have two wives, one son and two long-living daughters. Rest (of the progeny) will be destroyed.

(c) The lord of the 3rd, denoting the issues of paternal uncle, being in exaltation sign and debilitation Navamsa will cause anguish about daughters and destruction of sons.

(d) Saturn holding charge of one's paternal uncle (being the 11th lord for Pisces ascendant) and placed in the sign Aries with Leo Navamsa will cause a paternal uncle with bad conduct (addicted to vices). But he will be famous in royal assembly. His (paternal uncle's) son will incur illness, be libidinous, associated with barren women, ever in trouble due to obstacles and will lose his adopted progeny.

द्विग्रहोच्चे शनौ नीचे कमलांशोद्भवस्य च ।
पितृव्यपुत्रिका काचिज्जारिणी त्वल्पपुत्रिणी ॥४५६४ ॥
दारिद्र्यवशमापन्ना मध्ये भर्तृविनाशिनी ।
कमलांशे पितृव्यस्य स्वभार्यावंश एव च ॥४५६५ ॥
स्त्रीप्रजायाः कलङ्क स्यात् स्वभ्रात्रा गूढकामिनी ।

कमलांशकगे मन्दे शशिजेन समन्विते ॥४५६६ ॥
मीनलग्ने प्रजातश्च सत्कलत्रोधनैर्युतः।
दारवंशे कलङ्कश्च स्वदारभ्रातृपापवान् ॥४५६७ ॥
शूद्रस्त्रीवशमापन्नः पतितःशत्रुकृत्यवान्।
कालान्तरे दरिद्रश्च पितृद्रोही त्वपुत्रकः ॥४५६८ ॥
मीने नीचांशगे शुक्रे कर्मे राहौ प्रजायते।
स्वदारभगिनी क्लिष्टा दुष्टा दुर्भगचारिणी ॥४५६९ ॥
मेषे सिहांशगे मन्दे मीने चापांशजस्य च।
चत्वारिंशात् परं भाग्यं लक्ष्मीयोगमिति स्मृतम् ॥४५७० ॥
लग्नारूढे निशानाथे लग्नराशिदशाव्यथा।
जननी क्लेशमाप्नोति मातुः सौख्यं न विद्यते ॥४५७१ ॥
अष्टमाधिपतौ लग्ने स्वर्भानुयुतवीक्षिते।
गुरुदृष्टिविहीने च दारारिष्टं विनिर्दिशेत् ॥४५७२ ॥
लग्नात्त्रिकोणगे जीवे रन्ध्रेशे लग्नकेन्द्रगे।
लग्नराशिदशाकाले मृतप्रायोपिजीवति ॥४५७३ ॥
स्वपित्रधिक दारिद्यं क्लेशं प्राप्नोति भूरिशः।
पितृव्योद्वाहसौख्याप्तिः क्लेशश्च ज्ञातिवर्गके ॥४५७४ ॥
धनाधिपे केन्द्रगते राहुसंयुतवीक्षिते।
धनराशिदशाकाले धनलाभं विनिर्दिशेत् ॥४५७५ ॥

4564 - 4575. (a) Two planets in exaltation while Saturn is in Aries will be the source of the following events. One's paternal uncle's daughter will be somewhat immoral. She will have limited number of daughters. She will be in the grip of poverty and will lose her husband in the middle of her life. Further there will be (such) blemish concerning the females of paternal uncle's wife.

(b) Saturn in Aries in the company of Mercury will give the native an excellent wife and wealth. But there will exist blemish (of immorality) in his wife's family. His brother-in-law will be sinful, be attached to a low class woman, morally fallen, will indulge in inimical deeds, incur penury after some time, betray his father and be bereft of a son.

(c) Venus in Pisces (in the ascendant) with Virgo Navamsa while Rahu is placed in Sagittarius (10th) will torment one's wife's sister. She will further be wicked and unfortunate.

(d) Lakshmi Yoga: The native will obtain fortunes after his 40th year through the formation of what is called Lakshmi Yoga. The said yoga is caused by Saturn in Aries (2nd) with Leo Navamsa, or in Pisces (in the ascendant) with Sagittarius Navamsa.

(e) Pisces - Jupiter Dasa: The Moon in the ascendant (or in the Arudha of the ascendant) will act in a different manner in the dasa of the ascendant. His mother will be anguished and will not enjoy happiness.

(f) The 8th lord (Venus) in the ascendant (Pisces) with an aspect or association from Rahu, but without Jupiter's aspect, will kill the wife (prematurely).

(g) Pisces - Jupiter Dasa: If the 8th lord is in an angle while Jupiter is in a trine - both with reference to the ascendant - one will nearly die in the dasa of the ascendant. Further, the person will incur more poverty than his father has, and will be in the grip of deep anguish. His relatives will also be in anguish. His paternal uncle will enjoy the happiness of getting married.

(h) Aries - Mars Dasa: The 2nd lord Mars in an angle in association with Rahu by company or aspect will give wealth in the dasa of Aries.

Notes: (e) The dasa referred to is Pisces - Jupiter in KCD.

(g) Reference is to Kala Chakra Dasa of Pisces - Jupiter.

(h) Reference is to Kala Chakra Dasa of Aries - Mars.

कमलांशे विप्रकाले धनेशे केतुसंयुते।
धनराशिदशाकाले मौञ्जीबन्धनमादिशेत् ॥४५७६ ॥
विद्यारम्भं च लभते जीवनं क्लेशजीवनम्।
स्वमातुलस्य सन्ताने विप्लवेन विनिर्गते ॥४५७७ ॥
जन्मदेशे कलापं स्याद्राजान्तरमिति स्मृतम्।
विक्रमाधिपतौ शुक्रे स्वोच्चे नीचांशसंस्थिते ॥४५७८ ॥
तद्राशीशदशाकाले मातृवंशे वधूमृतिः।
मातामही विनाशः स्यान्मातृवंशे महाविपत् ॥४५७९ ॥
पितृवंशे च दारिद्यं पितृव्यस्य क्वचित् सुखम्।
सुखाधिपे धनस्थाने मीनलग्नसमुद्भवः ॥४५८० ॥
सुखाराशिदशाकाले वदेदुद्वाहकर्मवान्।
चतुर्थभावे क्रूराः स्युर्भूगृहक्षेत्रनाशनम् ॥४५८१ ॥
तत्तद्राशिदशाकाले स्थानच्युतिंविनिर्दिशेत्।
उद्वाहानन्तरं सौख्यं ज्वरोपद्रववान् क्वचित् ॥४५८२ ॥
लग्नाच्चतुर्थगे भौमे गृहच्छिद्रकलापवान्।

पितृपीडा भयं किंचिज्जन्मदेशे महाविपत् ॥४५८३ ॥
विवाहनन्तरं चैव स्वभार्यामातृनाशनम् ।
सुतराशिदशाकाले श्वशुरस्तु विवाहवान् ॥४५८४ ॥
पितृव्यस्तु महत्सौख्यं भ्रातृशोकेन कर्शितः ।
सुतेशे सुतराशिस्थे कर्मेशेन निरीक्षिते ॥४५८५ ॥
सुखराशिदशान्त्यादौ राजद्वारे प्रवेशवान् ।
सुतराशिदशाभाग्यं योगं च द्वित्रिवत्सरम् ॥४५८६ ॥
पुत्रलाभं च लभते स्वपित्ररिष्टमादिशेत् ।
मीनांशगे सुखाधीशे गुरुणा च निरीक्षिते ॥४५८७ ॥
तद्दशायां महत्सौख्यं राजद्वारे शुभाधिकम् ।
चतुस्त्रिंशात् परं क्लेशं चतुर्थे कुज संस्थिते ॥४५८८ ॥
षष्ठराशिदशाकाले दारिद्येण च कर्शितः ।
मेषे सूर्ये मीनलग्ने दशमे राहु संस्थिते ॥४५८९ ॥
षष्ठराशि दशाक्लेशं राजद्वारेऽवमानवान् ।
षष्ठधिपे स्वोच्चगते भाग्यांशे बुधसंयुते ॥४५९० ॥
षष्ठराशिदशाकाले पुत्रिका च शुभैर्युता ।
क्लेशकाले शुभं चैव तूच्चराशिफलं समम् ॥४५९१ ॥
दशान्ते पुत्रिकोद्वाहं तृतीयांशे सुशोभनम् ।
स्वपुत्रोद्वाहसोख्याप्तिमित्रवर्गे महत्सुखम् ॥४५९२ ॥

4576 - 4592. (a) Mars - Ketu Conjunction: Birth in the first quarter of Kamala Nadiamsa, Pisces, will cause thread ceremony in the Dasa of Aries - Mars provided Mars at birth joins Ketu. In addition to this, his education will commence. His life will be marked by troubles. His maternal uncle's progeny will beget a bad end due to a calamity. The king of the country will change(?)

(b) Taurus - Venus Dasa: The 3rd lord (Venus) in exaltation (in the ascendant, Pisces) with debilitation Navamsa will cause the death of a bride in mother's family in the dasa of Taurus. His maternal grand-father will pass away. Perhaps a great calamity will hit mother's family. Father's family will pass through a phase of utter poverty. However, paternal uncle will be somewhat happy.

(c) Gemini - Mercury Dasa: The native will be busy in marriage rituals in this dasa if the 4th lord (Mercury) is in the 2nd (Aries)

(d) Gemini - Mercury Dasa: Malefics in the 4th will be a source of loss of landed and housing properties. In the said dasa, the native will lose his place of living (and migrate to another place). However, he will be happy after marriage. He will be somewhat troubled by fever.

(e) Mars in the 4th will destroy family peace, evils to father and great dangers to self in birth region. Following his marriage, his wife will lose her mother.

(f) Cancer - Moon Dasa: The dasa of the 5th Rasi will cause (second) marriage to one's father-in-law. One's paternal uncle will receive much happiness (on other counts) but be grieved due to loss of co-born.

(g) Cancer - Moon Dasa: The lord of the 5th (Moon) in the 5th in aspect to Jupiter will allow entry in royal service in the captioned dasa. This period will also help one to prosper for a period of two or three years. He will beget a son but lose his father.

(h) The 4th lord (Mercury) in aspect to Jupiter and begetting Pisces Navamsa will produce much happiness in the dasa of Gemini - Mercury. Further many auspicious events will accrue to the native in royal service.

(i) Mars in the 4th (Gemini) will produce anguish after the age of 34.

(j) Leo - Sun Dasa: This dasa will cause physical thinness due to penury.

(k) One will be humiliated in royal assembly in the dasa of Leo - Sun occurring under the following conditions. The ascendant is Pisces, the Sun is in Aries and Rahu is in the 10th (Sagittarius)

(l) Effects for One's Daughter: One's daughter will beget auspicious effects in the dasa of Leo - Sun, if the Sun is in Aries along with Mercury. Further the Sun should be in the 9th from the Navamsa ascendant. The phase of anguish will be compensated by auspicious effects and the exaltation effects (of the Sun) will remain even. The end of the dasa will give marriage to her. Further, the native's son will also get married and his friends will receive happiness.

उच्चक्षेत्रफलं चैव तृतीयांशे फलानि च ।
नीचयोगफलं चैव खण्डद्वयफलं वृथा ॥४५९३ ॥
मध्यखण्डान्तमारभ्य तृतीयेशऋनाशनम् ।
तृतीयांशे मध्यखण्डे योगवान् कीर्तिमान् भवेत् ॥४५९४ ॥

4593 - 4594. The present two slokas are not

amenable to a proper rendering as they consist of groups of meaningless words like: for the 3rd part of Nadiamsa .. results of exaltation sign ... results of debility ... effects of two Khandas ... from the beginning of Madhya Khanda .... in the 3rd ... destruction of enemies will ocur ... in the 3rd part of the middle Khanda ... one will attain prosperity and fame ...

राहौ वा गोचरे वापि स्वशुत्रजनपीडितः ॥४५९५ ॥
षष्ठामव्ययेशानां स्फुटयोगं गते शनौ ।
स्वप्रभोश्च मनस्तापं देहायासं धनक्षयम् ॥४५९६ ॥
कमलांशकगे मन्दे मीनलग्नोद्भवस्य च ।
सिंहराशिदशाकाले वैष्णवद्वेषमादिशेत् ॥४५९७ ॥
तृतीयांशे शुत्रनाशं स्वराजन्यजनावधि ।
देशे राजान्तरं चैव पश्चाद्भाग्यं विनिर्दिशेत् ॥४५९८ ॥
कन्याराशिदशाकाले मीनलग्नोद्भवस्य च ।
कमलांशे प्रजातस्य बहुभाग्यं विनिर्दिशेत् ॥४५९९ ॥

4595 - 4599. (a) Leo - Sun Dasa: Saturn or Rahu in transit in the sign denoted by the Navamsa position of the 6th lord (Sun) will torment one's adversaries. But the dasa of the Leo - Sun shall be in currency at that time.

(b) General: When Saturn transits the space caused by the sum of longitudes of the lords of the 6th, 8th and 12th, he will produce mental distress, physical ailment and financial decline.

(c) In the Dasa of Leo - Sun, one will earn enmity of Vaishnavites as Saturn at birth is in Kamala Nadiamsa (in Aries). The last one third part of the dasa will be congenial for destruction of enemies. One's fortunes will rise after a change of the ruler.

(d) Virgo - Mercury Dasa: This dasa will produce much prosperity.

सप्तमारूढगे जीवे स्वांशे पूर्णबलन्विते ।
कमलांशे प्रजातश्च नरवाहनवान् भवेत् ॥४६०० ॥

4600. Conveyances: Jupiter in the Arudha of the 7th house, with a Navamsa of his own and in full strength will contribute to acquisition of conveyances.

रन्ध्रराशिदशाकाले लक्ष्मीयोगोद्भवस्य च ।
पुत्रयोगाभिवृद्धिः स्यात्तृतीयांशे महाविपत् ॥४६०१ ॥
अष्टमाधिपतौ स्वोच्चे नीचांशे गुरुवीक्षिते ।
मीनलग्ने प्रजातस्य मध्यमायुरितीरितः ॥४६०२ ॥
ज्ञातिवर्गे मृतिश्चैव पुत्रपीडा भविष्यति ।
क्रूरमासे दारपीडा क्षिप्रेणारोग्यभाग्यवान् ॥४६०३ ॥
भाग्यराशिदशाकाले लक्ष्मी योगसमुद्भवः ।
पुत्रप्राबल्ययोगेन बहुभाग्ययुतः स्सुखी ॥४६०४ ॥
कर्मराशिदशाकाले कर्मे राहौ च संस्थिते ।
लक्ष्मीयोगे मीनलग्ने कर्मराशिदशाविपत् ॥४६०५ ॥
तत्त्रिकोणदशाकाले मृतप्रायोपजीवति ।
चन्द्रराशिदशासन्धौ स्वजनारिष्टशोकवान् ॥४६०६ ॥
कर्मराशिदशाकाले रन्ध्राधिपतिवत्सरे ।
कुळीरमासे निर्याणमथ वा तत्त्रिकोणगे ॥४६०७ ॥
भावाधिपफलाध्याये लक्ष्मीयोगोद्भवस्य च ।
शनिनाड्यांफलं स्वल्पं शुक्रनाड्यां तु विस्तृतम् ।
वर्षचर्याफलादीनि योजयेत् कालवित्तमः ॥४६०८ ॥

4601 - 4608. (a) Libra - Venus: For one born in Lakshmi yoga (vide 4546 - 54 and 4564 - 75), this dasa will cause prosperity of one's progeny. But the last one third part of the dasa will produce great calamity.

(b) The lord of the 8th (Venus) getting the aspect of Jupiter and being in his exaltation sign (Pisces) with Virgo Navamsa will cause medium life-span. There will be (untimely) death in relatives' circle and evils to one's own progeny. His wife will be subjected to evils with adverse transits of the Sun but will recover her health early.

(c) Scorpio - Mars Dasa: One born in Lakshmi Yoga will see his sons greatly prospering. He will also enjoy prosperity and happiness.

(d) Sagittarius - Jupiter Dasa: If Rahu is found in the 10th at birth, the said Rasi's Dasa will be a source of calamity.

(e) In the dasas that are trine to Sagittarius (i.e. in Leo - Sun and Aries - Mars dasas), one will be nearly involved in death.

(f) The junction of the Dasa of the Moon sign will cause evils to one's kinsfolk and consequent grief.

(g) Death of the native will occur in the Dasa of the 10th sign (i.e. Sagittarius - Jupiter) in the "year" ruled by the 8th lord (i.e. the phase held by Libra - Venus). The corresponding month will be re-

flected by the Sun journeying in Cancer, Scorpio or Pisces.

(h) Sani Nadi is brief on the effects of Bhavas in connection with Lakshmi Yoga while Sukra Nadi is quite elaborate. Astrologers should understand these effects through solar return horoscopes.

Thus end the effects for Kamala Nadiamsa in Pisces ascendant.

॥ तुलालग्ने निर्मलांशः ॥

निर्मलांशे तुलालग्ने पूर्वभाग समुद्भवः ॥४६०९ ॥
शूद्रजन्मा सुखी नित्यं नवमोऽयं प्रकीर्तितः।
मकरांशकगे चन्द्रे नीचे राहुसमन्विते ॥४६१० ॥
लग्नेशे शनिसंयुक्ते वनप्रान्ते प्रसूतिमान्।
तुलालग्नेऽर्किसंदृष्टे निर्मलांशोद्भवस्य च ॥४६११ ॥
वनप्रान्ते पुरे वासं जननं च विनिर्दिशेत्।
निर्मलांशे पूर्वभागे वीथ्योस्तु यमसोमयोः ॥४६१२ ॥
प्राग्भागे जननं चैव ह्युत्तरद्वारके गृहे।
उत्तरांशे प्रजातस्य वीथ्योस्तुचक्रपाशिनोः ॥४६१३ ॥
महानदीप्रान्तदेशे नगरे प्रसवो भवेत्।
निर्मले चोत्तरे भागे पञ्चमोऽयं प्रकीर्तितः ॥४६१४ ॥
अथवा च द्वितीयः स्यान्नदीप्रान्ते प्रसूतिमान्।
निर्मलांश सत्कुलीनः पूर्वभागे शुभाकृतिः ॥४६१५ ॥
उत्तरांशे श्यामतनुः कृशदेहस्वरूपवान्।
ग्रन्थान्तरे निर्मलांशे तुलालग्नसमुद्भवः ॥४६१६ ॥
गुरुदृष्टे सुदीर्घायुः स्थूलभूतशरीरवान्।
गुरुदृष्टिफलं पूर्णं पूर्वभागोद्भवस्य च ॥४६१७ ॥

4609 - 4617. Libra Ascendant - Nirmala Nadiamsa: (a) One belonging to the 1st half of the subject Nadiamsa will be born as a Soodra. He will be the 9th issue of the family.

(b) The Moon in conjunction with Rahu and being in debility (in the 2nd) with Capricorn Navamsa while the ascendant is held by Saturn by occupation will cause one's birth in a forest region.

(c) If the ascendant Libra is aspected by Saturn, birth and living will be in a town of a forest region.

(d) One of the former half of this Nadiamsa will be born in a street extending from south to north-east. The house will be located in the eastern direction with north-facing entry. In case of the latter half, birth will be in a city near a river region. He will be the 5th or 2nd issue of the family. ("*Veethyostu Chakrapaassinoh*" in the second line of sloka 4613 denotes nothing understandable. *Veethi* means street; *Chakra* means wheel and *Paasa* means noose.)

(e) The native of first half will belong to an excellent family and be handsome in appearance. One of the 2nd half will be black in complexion and thin-bodied.

(f) There is another authority to specify longevity and a fat physique in case of Jupiter's aspect on Libra ascendant. The native of 1st half will receive full effects of Jupiter's aspect.

प्रसूतिसमये विप्रकालज्ञौ च समीपगौ।
उत्तरांशे मन्दफलं भिषग् विप्रौ समीपगौ ॥४६१८ ॥
वसन्तः सूतिकागेहे सूतिकाले गृह धनम्।
निर्मले चोतरे भागे तुलालग्ने शनीक्षिते ॥४६१९ ॥
प्रसूतिकाले जननी वेदनाधिक संयुता।
पूर्वभागे क्वचिच्चेति क्षिप्रेण प्रसवः स्मृतः ॥४६२० ॥
गुरुदृष्टिवशात् सौख्यं बालरिष्टं न विद्यते।
सिंहे मन्दे क्रिये जीवे मेषांशे पापवर्जिते ॥४६२१ ॥
निर्मलांशे पूर्वभागे चन्द्रदोषः क्वचिद्भवेत्।
नीचे मन्दांशगे चन्द्रे निर्मलांशसमुद्भवः ॥४६२२ ॥
पित्ररिष्टोपशान्त्यर्थं स्वर्णदानं प्रदापयेत्।
गां दद्यादैन्द्रनक्षत्रे बालारिष्टोपशान्तये ॥४६२३ ॥
आयुष्मन्तौ च पितरौ तुलालग्नोद्भवस्य च।
वित्ते राहुयुते चन्द्रे तदीशे भाग्यराशिगे ॥४६२४ ॥
चन्द्रारिष्टोपशान्त्यंर्थ राजतं चन्द्रमर्चयेत्।
स्वर्णनागप्रदानेन बालारिष्टं न विद्यते ॥४६२५ ॥
निर्मलांशे पूर्वभागे चन्द्रदोषो न विद्यते।
उत्तरांशे बहुत्वं स्याद्दोषं मासत्रयं वदेत् ॥४६२६ ॥
पूर्वभागे क्वचिच्चेति शान्त्या शान्तिं प्रयास्यति।

4618 - 4626½. (a) At the time of birth of the native of Vipra Kala (*"Viprakalagnau"* should read as *"Viprakalajau"*) .... will be present. In case of birth in 2nd half, "results will be slow" and doctors and Brahmins will be present.

(b) Saturn aspecting Libra ascendant with 2nd half of the subject Nadiamsa will cause pains to mother at the time of delivery. In case of 1st half, pains will be less and delivery instant. Jupiter's aspect will usher happiness (to the child and mother) and remove the blemish of infantile mortality.

(c) Saturn in Leo while Jupiter is in Aries with Aries Navamsa, bereft of malefic relations, will produce blemish of the Moon (i.e. Balarishta) to some extent.

(d) The Moon in Scorpio with a Navamsa of Saturn will endanger the child's father. The remedy lies in donating gold. In case the birth star is Poorva or Uttara Phalguni (it is Jyeshta according to another version), remedies should be sought for a Libra ascendant native. Then the parents will be long-lived.

(e) Should Rahu be in the 2nd with the Moon while Mars is in Gemini, Balarishta is produced for a Libra native. To overcome this blemish, the Moon-God's image made of silver should be worshipped and a cobra's image made of gold should be donated.

(f) The blemish of the Moon (i.e. Balarishta) will not (fully) exist if birth is in the 1st half of the subject Nadiamsa. But in the other case, blemish will be aplenty for a period of three months. The partial blemish in case of the native of former half can be overcome by remedies.

Notes: The original's instructions available at "a" are not quite coherent.

तुलालग्ने क्रिये जीवे मेषांशे धार्मिकः सुधीः ॥४६२७ ॥
स्वपिता शिवभक्तश्च देवब्राह्मणभक्तिमान् ।
कालान्तरे भाग्यवृद्धिस्तत्पुत्रद्वेषमादिशेत् ॥४६२८ ॥
भाग्याभिवृद्धिमान् रागी धर्मपुण्यपुराणवित् ।
निर्मलांशे पिता बाल्ये भ्रातृद्वयप्रपीडितः ॥४६२९ ॥
स्वपितामहभाग्याप्तिःसोदरी भ्रातृसंयुतः ।
तटाकोद्यान निर्माता वैदिकाचारतत्त्ववित् ।४६३० ॥
लग्नाद्भाग्यं गते भौमे निर्मलांशोद्भवस्य च ।
क्रूरहा स्वपिता क्रोधी भ्रातृद्वेषकलापवान् ॥४६३१ ॥
अस्वतन्त्रोऽल्पकालं च पश्चात् स्वातन्त्र्यभाग्यवान् ।
बाल्ये दुष्टस्वभावश्च परस्त्रीसङ्गपापवान् ॥४६३२ ॥
चोरकृत्यं क्वचित् कालं यौवने ग्रन्थिरोगवान् ।
पश्चात्तापी सुधर्मात्मा शिवलिङ्गप्रपूजक ॥४६३३ ॥
निर्मलांशे पूर्वभागे वयोमध्ये पिता सुखी ।
धर्मकार्यरतो नित्यं ज्ञातिद्वेषकलापवान् ॥४६३४ ॥
वार्धके पुत्रमूलेन बहुभाग्ययुत सुखी ।
निर्मलांशे पूर्वभागे स्वपितुर्दश सोदराः ॥४६३५ ॥
अथवा द्वादशश्चैव दत्तपुत्रप्रदो भवेत् ।
पितृष्वसैका माङ्ल्या रोगिणी पुत्रसंयुता ॥४६३६ ॥

4627 - 4636. Father : (a) If birth is in Libra ascendant while Jupiter is in the sign Aries with Aries Navamsa, the native's father will be righteous and intelligent. He will be a devotee of Lord Siva and will honour gods and Brahmins. After some interval, his fortunes will increase but he will have enmity with his son. He will be passionate and be learned in moral law, meritorious acts and Puranas.

(b) Birth in Nirmala Nadiamsa, Libra ascendant, would cause troubles to father in his early days on account of his two brothers. He would earn a great deal of prosperity and be endowed with sisters as well. He would construct tanks and gardens, and would follow the code of conduct prescribed by the Vedas.

(c) For the subject native, if Mars is in the 9th from the ascendant (i.e. in Gemini), declare the following. The native's father would be a cruel and short-tempered person and would incur enmity with co-born. For some time he would not be independent, i.e. would be in servitude. Later on, he would seek fortunes with independence. In childhood, he would be wicked and would acquire the sin of having illegal ties with women. For some time, he would be a thief. In his youth, he would suffer from diseases of blood vessels. He would repent for his sins, turn righteous and would worship Lord Siva.

(d) If the birth is in the former of half of the subject Nadiamsa, father would be happy in the middle of his life. He would be ever attached to righteous deeds but would have enmity with his kinsfolk. In his old age, he would acquire a lot of prosperity through his offspring. He would have a total of ten or twelve brothers and would have an adopted son (as well). One of his sisters will have long-lived married life, be sickly and endowed with offspring.

Notes: The results mentioned in the above ten slokas apply to the native's father.

पितृष्वसृसुतः कश्चित् सपत्नीमातृयोगवान् ।
बहुभाग्यर्थसम्पन्नो भेदभ्रातृविरोधवान् ॥४६३७ ॥

निर्मलांशे पूर्वभागे स्वपितुर्भगिनीसुतः।
राजयोगं च लभते लोके ब्राह्मण्यमुत्तमम् ॥४६३८ ॥
पितुः कनिष्ठभगिनीतत्सुतस्य फलं स्मृतम्।
स्वपितुर्ज्येष्ठभगिनी वैधव्येन च कर्शिता ॥४६३९ ॥
तत्पुत्रस्त्वेति दारिद्र्यमेकः कश्चिद्द्विभार्यवान्।
निर्मलांशे पूर्वभागे लाभे मन्दे च संस्थिते ॥४६४० ॥
स्वपितृव्यसुतौ द्वौ च स्वगोत्रे दत्तपुत्रकौ।
दुर्मार्गवृत्तिमान् कश्चिन्मित्रप्रभुबहुत्ववान् ॥४६४१ ॥
स्वभेदमातृकार्येण पुत्रोत्पत्तिविनाशनम्।
अदृष्टयत्ले पुत्राप्तिर्मध्ये गण्डाद्विमोचितः ॥४६४२ ॥
भेतभ्रातृसुतद्वेषी तस्य पुत्रफलं स्मृतम्।
दारद्वयं च लभते भाग्यवान् पापचेतनः ॥४६४३ ॥

4637 - 4643. (a) Cousin: As a result of birth in the 1st half of the said Nadiamsa, following is to be predicted about the native's paternal aunt's son. He will have a step-mother, will enjoy much prosperity and wealth and be inimical to his step-brother. He will beget Raja Yoga effects and be devoted to acquire a high degree of sacred knowledge. These are the effects relating to the son of father's younger sister.

(b) Aunt: Further to the above, father's elder sister will be emaciated due to widowhood. Her son will be in the grip of utter poverty and will probably have two wives.

(c) Saturn in the 11th (Leo) will cause two sons the native's paternal aunt. There will be two adopted sons in the family. This applies to the 1st half of Nirmala Nadiamsa. The native's cousin will be of bad conduct and will possess many friends and employers. Due to undertakings related to step brother, he will lose his sons. After some efforts, he will obtain a son who will be endangered in between. He will have two wives and be sinful.

स्वपितुव्यसुतस्थाने मन्दे चापत्रिकोणगे।
स्वपितृव्यसुतः कश्चिद्ग्रहशङ्काप्रपीडितः ॥४६४४ ॥
चोरकृत्ययुतो नित्यं ज्ञातिवित्तापहारकः।
तस्य दोषवशाच्चैव सन्तानारिष्टमादिशेत् ॥४६४५ ॥
भानुव्रतादिपुण्येन देहारोग्यं क्वचित् सुखम्।
सन्तानोत्पत्तिमाप्नोति ह्येकपुत्रयुतः सुखी।
लाभे स्वोच्चांशगे मन्दे भार्गवेण समन्विते ॥४६४६ ॥
स्वपितुव्यसुतः कश्चिद्राजद्वारे प्रसिद्धिमान्।
कलत्रद्वयवान् रागी पुत्रशोकेन कर्शितः ॥४६४७ ॥
पितृव्यद्वेषपापेन पुत्रोत्पत्तिविनाशनम्।
कालन्तरे सुतप्राप्तिर्जन्मप्रभृति सौख्यवान् ॥४६४८ ॥
मध्ये वयसि सन्तापी वातरोगेण कर्शितः।
ज्ञातिद्वेषकलापेन क्लेशं प्राप्नोति भूरिशः ॥४६४९ ॥
निर्मलांशे पूर्वभागे स्वपितृव्यसुतस्य च।
लाभस्थशनिदोषाच्च जन्मदाये मृतिं वदेत्।
एका कनिष्ठभगिनी समाङ्गल्या मृतिं लभेत् ॥४६५० ॥
जन्मदाये फलं चैव पितृव्यस्य तुलाशनौ।
जीविते जन्मदायान्ते प्रबलज्ञातिनाशनम् ॥४६५१ ॥
सम्पद्दाये शुक्रभुक्तौ दशामध्येऽथ वा यदि ॥
निर्मलांशे पितृव्यस्य नाशं च मनुरब्रवीत् ॥४६५२ ॥
अपरेवयसिपिता विशेषज्ञानबुद्धिमान्।
धनधान्याभिवृद्धिः स्याद्योगप्राबल्यवान् सुखी ॥४६५३ ॥

4644 - 4653. Paternal Uncle's Son: (a) Saturn in the 3rd (or) "in a trine to Sagittarius" (that is, in the 7th in Aries or in the 11th in Leo) will cause the following effects concerning paternal uncle's son. He will incur planetary evils, be a thief and will steal the wealth of his kinsfolk. Due to these blemishes, he will face loss of progeny. By maintaining vows to the Sun-god, his health will be normal; he will be somewhat happy and will beget a son.

(b) Saturn in the 11th (Leo) in the company of Venus and begetting Libra Navamsa will cause some fame to a paternal uncle's son in the royal assembly. He will have two wives, be passionate and be grieved on account of loss of progeny due to the sin accruing out of enmity with a paternal uncle. After some delay, he will beget a son. He will be happy right from his birth. In the middle of his life, he will be somewhat distressed and emaciated due to windy diseases. He will face much grief due to misunderstandings with his kinsfolk.

(c) Due to the blemish caused by Saturn being in the 11th, the native will lose cousin in the very first dasa. One of the native's younger sister will also pre-decease her husband. If she survives (i.e. lives after husband's death), some important relatives will die in the end of the native's first dasa.

(d) In the sub period of Venus in the 2nd dasa,

or in the middle of the said dasa, one's paternal uncle will quit the world. In the later years, father will acquire special (or mentionable) wisdom. Wealth and grains will be on the increase in the native's family and he will acquire a prosperous employment.

नवमे कुजदोषेण जन्माब्दे व्याकुली पिता।
आ बाल्यं च मनस्तापं स्वपितुर्भाग्यमादिशेत् ॥४६५४॥
उत्तरांशे विशेषेण स्वपिता ह्यपमृत्युवान्।
स्वपितृव्यसुतारिष्टं प्रबलज्ञातिनाशनम् ॥४६५५॥
पूर्वभागे पिता जाड्यं क्षिप्रेणारोग्यभाग्यवान्।
तताम्बिके सौख्ययुक्ते ज्येष्ठभ्राता शुभान्वितः॥४६५६॥
पितामहाधिपे मन्दे स्वोच्चांशे बुधसंयुते।
पितामहः प्रसिद्धश्च बहुभ्रातृसमन्वितः॥४६५७॥
लग्नाद्द्वितीयगे राहौ कर्मे सूर्ये च संस्थिते।
बाल्ये पितामहः क्लेशी दारिद्येण च कर्शितः॥४६५८॥
दक्षिणोत्तरवीथीषु सञ्चारं स्वपितामहः।
विवाहानन्तरं भाग्यं सौख्यं पुत्रोत्सवात् परम् ॥४६५९॥
तुलालग्ने निर्मलांशे ज्ञानी स्यात् स्वपितामहः।
यौवनान्ते सुभाग्याप्तिर्वनस्थलगतः सुखी ॥४६६०॥

4654 - 4660 (a) Due to the blemish of Mars being in the 9th (Gemini), one's father will be distressed in the very first year of his (native's) birth. Right from the native's childhood, his father will be mentally tormented but will enjoy fortunes.

(b) If the birth be in the 2nd half of Nirmala Nadiamsa, Libra ascendant, one's father will face untimely death. His paternal uncle's children will incur evils. So also other kinsmen.

(c) In case of 1st half of the subject Nadiamsa, father will be subjected to diseases but will recover health early. Paternal grand-mother will enjoy happiness. Elder brother will beget auspicious effects.

(d) Grand-father: The 5th lord Saturn in the company of Mercury and betting Libra Navamsa will cause a famous paternal grand-father who would have a number of co-born.

(e) Grand-father: Rahu in the 2nd (Scorpio) while the Sun is in the 10th (Cancer) would cause anguish to paternal grand-father in childhood who would be emaciated due to penury. He would wander in a street spread from south to north. After his marriage, he would acquire happiness following birth of a son.

(f) Birth in the subject Nadiamsa will cause wisdom to paternal grand-father. In the end of his youth, he would acquire fortunes and live happily in a forest region.

गुरुद्वयं पूजयति वैदिकाचारधार्मिकः।
अनाचारी क्वचित् कालं पश्चात् सन्मार्गवृत्तिमान् ॥४६६१॥

4661. The native's paternal grand-father would worship two teachers (i.e. would have two teachers), would follow Vedic code of conduct, be righteous, would earn fortunes towards the end of his youth and would migrate to a forest region.

पितामहाधिपे मन्दे शुभद्वयसमन्विते।
निर्मलांश पूर्वभागे निर्मलः स्वपितामहः॥४६६२॥
भ्रातृश्रेष्ठः सुखी नित्यं सत्कलत्रैकवान् सुखी।
बन्धुवर्गे सुपूज्यश्च सोदरभ्रातृपोषकः॥४६६३॥
एकभ्रातृयुतो मानी सत्पुत्रधनधान्यवान्।
निर्मलांशे पूर्वभागे गुरुणा च निरीक्षिते ॥४६६४॥
प्रपितामहपुण्येन वंशे भाग्याभिवर्धनम्।
पितामहाधिकं भाग्यं ज्येष्ठ भ्रात्रधिकं धनम् ॥४६६५॥

4662 - 4665. Libra Ascendant - Nirmala Nadiamsa - 1st Half: (a) Should Saturn, as a ruler of the house of paternal grand-father (the 5th) be conjoined with two benefics, he (the said relative) would be a pure person, would be the best among his co-born, ever happy, would have one virtuous wife, would be highly revered among his kinsfolk and would honour his co-born.

(b) If Jupiter aspects the said Saturn, paternal grand-father would have only one co-born, be honourable and endowed with virtuous sons, wealth and grains. Due to the meritorious deeds of the native's paternal great grand-father, the paternal family would acquire waxing prosperity. Paternal grand-father would be highly prosperous and would acquire wealth in excess of his older brother's earnings.

जातकस्य फलं चैव निर्मलांशे धनी सुखी।
लाभे बुधयुते मन्दे भार्गवेण समन्विते ॥४६६६॥
निर्मलांशे पूर्वभागे ज्येष्ठभ्राता सुयोगवान्।
लिपित्रयप्रवीणश्च रक्तवर्णः शुभाकृतिः॥४६६७॥

कलत्रद्वयवान भोगी सहोदर्या बहुत्ववान्।
निर्मलांशे ज्येष्ठभ्राता बहुव्यापारचिन्तकः ॥४६६८ ॥
पितृवाक्यरतो नित्यं देवब्राह्मणपोषकः।
अल्पपुत्रार्थसन्तोषी पुत्रत्रययुतो भवेत् ॥४६६९ ॥
द्वीपान्तरेषु वस्तूनि स्वर्णव्यापारजीवकः।
सम्पद्दाये जातकश्च ज्येष्ठभ्रातृश्रियायुतः ॥४६७० ॥
विशेषप्रबलो भूत्वा गृहे लक्ष्मीकटाक्षवान्।
उत्तरांशे प्रजातस्य वयोमध्ये सहोदरः ॥४६७१ ॥
ज्येष्ठभ्रातृविनाशेन क्लेशं प्राप्नोति भूरिशः।
सिंहे मन्दे तुलालग्ने ज्येष्ठभ्रातृवियोगवान् ॥४६७२ ॥
पापदृष्टियुते चैव फलमेतद्विचिन्तयेत्।
निर्मलांशे पूर्वभागे ज्येष्ठभ्राता चिरायुषः ॥४६७३ ॥
सहोदरीविहीन स्यातज्ज्येष्ठभ्रातृविनाशवान्।
त्रिभगिन्यश्चिरायुष्यस्त्वथ वा वेदसङ्ख्यकाः ॥४६७४ ॥
उत्तरांशे प्रजातस्य पश्चाद्भ्राता चिरायुषः।
निर्मलांशे पूर्वभागे सन्ति द्वादश सोदराः ॥४६७५ ॥
दशसङ्ख्याथ वा चैव वेदसङ्ख्याः सहोदराः।
अपमृत्युभयप्राप्तिः स्वरनाडीफलं वदेत् ॥५०३६॥
साधनेशदशाकाले शुक्रभुक्तौ महत् सुखम्।
शोभनांशवशाद्भाग्यं राजप्रीतिं विनिर्दिशेत् ॥५०३७॥
षष्ठाधिपतिदोषेण दारपीडां क्वचित् क्वचित्।
क्रूरमासे जातकस्य पुत्रिका दुःखमेव च ॥५०३८॥
सूर्यान्तरे व्याकुलं स्याद्भुक्त्यन्ते देहजाड्यवान्।
राहुदाये चन्द्रभुक्तौ क्लेशं घातांशजातकः ॥५०३९॥
कुजान्तरे सौख्यमेति पुत्रप्राबल्यहेतुना।
दशावसानदोषेण राजा राष्ट्रविनाशनम् ॥५०४०॥
राजान्तरे स्वपुत्रस्य प्रबलोद्योगहेतुना।
क्रूरमासं विना भाग्यं नित्यश्रीसौख्यवान् सुखी ॥५०४१॥
देहावसानदोषार्थं शान्तिं कुर्याद्विचक्षणः।

5033 - 5041½. (a) Rahu Dasa: In case of birth in Sagittarius ascendant, Ghaata Nadiamsa, Ketu's sub period in Rahu's dasa will cause abundant financial gins which will be uninterrupted. The native will also be happy. When Saturn transits Scorpio, the said dasa will lead to evils. These should be remedied.

(b) Saturn's 3rd round of transit (i.e. from the beginning of 3rd round) will cause the following: happiness from progeny, wealth and increase of fortunes.

(c) Saturn journeying in the sign denoted by the Navamsa occupied by the 8th lord (Moon) or a trine thereof will cause fear of untimely death.

(d) The sub period of Venus in the 6th dasa will be a source of great happiness. Due to his position in Sobhana Nadiamsa, one will please the king. Because of rulership of the 6th, Venus will to some extent cause grief on account of daughter.

(e) The sub period of the Sun (in the 6th dasa) will produce distress and physical illness.

(f) Other Sub-periods: Rahu dasa's Moon bhukti will be a source of anguish. The sub period of Mars will cause happiness due to the progress achieved by his son. The end of the dasa will destroy the country. The native's son will obtain powerful employment under a new king. Fortunes and continual wealth will exist except in the periods ruled by adverse transits of the Sun. To ward off the blemish of (untimely) end of mortal journey, remedies should be sought (during the conclusion of Rahu dasa).

सुप्रभांशे निशानाथे व्यये घातांशगे शनौ ॥५०४२॥
मीने शनिस्थिते काले कालमृत्यु र्भविष्यति।
नैधनेशदशाकाले घातांशग्रहभुक्तिषु ॥५०४३॥
द्विसप्ततिसमादूर्ध्वं धनुर्मीने मृतिं वदेत्।
चापायनगते सूर्ये कुलीरयनगेऽथ वा ॥५०४४॥
शुक्लपक्षे मृतिं चैति नन्दारिक्तातिथीषु च।
कुम्भांशगे कर्मनाथे नवमे राहु संस्थिते ॥५०४५॥
व्यये घातांशगे मन्दे ह्यापत्संन्यासमादिशेत्।
वृश्चिकांशे चापशनावपमृत्युभयं क्वचित् ॥५०४६॥
शोभनांशकयोगेन ह्यायुयारोग्यभाग्यवान्।
सुप्रभांशे रन्ध्रनाथे घातांशे रविनन्दने ॥५०४७॥
धनुर्लग्ने प्रजातश्च त्वेकसप्तति जीवति।
अपमृत्युभये काले मारकं च न विद्यते ॥५०४८॥
सुप्रभांशकयोगेन दीर्घमार्युभविष्यति।
रन्ध्रेशारूढगे शुक्रे दशमे शोभनांशगे ॥५०४९॥
दीर्घायुर्योगमाप्नोति चापमृत्युः शनैरपि।
घातांशगे प्रजातश्च रन्ध्रेशारूढपांशगे ॥५०५०॥
स्फुटयोगं गते मन्दे मन्दे नैधनेशदशाविपत्।

व्यये मन्दे प्रजातश्च वार्धके पुत्रशोकवान् ॥५०५१ ॥
वार्धके पुत्रसन्तापं दशासन्धौ न संशयः।

5042 - 5051½. Death: (a) The Moon in Suprabha Nadiamsa and Saturn in Scorpio in Ghaata Nadiamsa will cause unavoidable death of the person when Saturn transits the sign Pisces.

(b) In the dasa of the 8th lord (Moon) and in the sub period of Saturn placed in Ghaata Nadiamsa, death will occur following the age of 72, in bright lunar half, with the transit Sun in Sagittarius or Pisces or in the Sun's southern course. The lunar day concerned will be one of Nanda or Rikta.

(c) Mercury in Aquarius Navamsa, Rahu in the 9th (Leo) and Saturn in Scorpio's Ghaata Nadiamsa will cause ascetism following a calamity.

(d) Saturn in Scorpio Navamsa at birth will usher death during his movements in Sagittarius.

(e) One will enjoy health and fortunes with (Venus) in Sobhana Nadiamsa.

(f) The person's life-span will be 71 if the Moon and Saturn are respectively in Suprabha and Ghaata Nadiamsas. He will not die in times of indication of untimely death. The Moon in Suprabha Nadiamsa will bless one with longevity. Saturn's transit in Sagittarius will be a source of his death..

(g) When Saturn transits the sign equal to the Navamsa position of the 8th lord (Moon), it will cause danger in he 8th lord's dasa.

(h) Saturn placed in the 12th will cause grief due to progeny in old age. This will be in the junction of dasa.

Notes: (b) Sloka 5044 contains confusion regarding Sun's transit using an incorrect term like "Chaapa + Ayana".

परमोच्चं गते जीवे शोभनांशकगे भृगौ ॥५०५२ ॥
मन्दे घातांशके जातस्त्वेकसप्तति जीवति।
ब्रह्मलोकफलं सत्यं रन्ध्रेशे त्वीश्वरांशगे ॥५०५३ ॥
सुप्रभांशकगे चन्द्रे हीन्द्रयातनवान् क्वचित्।
घातांशनाडीदोषेण देहान्ते त्विन्द्रयातनाम् ॥५०५४ ॥
ब्रह्मलोकं ततो गत्वाब्रह्मध्यानपरः सदा।
पुण्यक्षेत्रे नदीतीरे वृश्चिके शनिसंस्थिते ॥५०५५ ॥
सोमवारे मृतिश्चैव भवतीति न संशयः।
शोभनांशकगे शुक्रे ह्यन्ते पुत्रात् सुखी धनी।
मन्दनाडीफलं सत्यं प्रत्यक्षं देव केरलम् ॥५०५६ ॥

5052 - 5056. (a) One's life-span will be 71 whereas Jupiter is in his deep exaltation, Venus is in Sobhana Nadiamsa, and Saturn is in Ghaata Nadiamsa.

(b)The 8th lord Moon in Isvara (i.e. Paramesvara) Nadiamsa will take one to the reign of Lord Brahma, after death.

(c) The Moon in Suprabha Nadiamsa will caue attainment of heavens (Indra's abode). Because of the "blemish" of being in Ghaata Nadiamsa, afte death, he will go to heavens. (Indra yaatana sshould read as Indraayatana meaning heavens.)

(d) Saturn in Scorpio will cause death on a Monday in an auspicious fortnight.

(e) Venus in Sobhana Nadiamsa will cause happiness through one's son towards the end of life apart from acquisition of wealth.

Effects as stated in Sani Nadi will bear truth as reflected in Deva Keralam.

॥मेषलग्ने अचलांशनाडीफलम्॥
प्रभांशके स्थिरे सूर्ये त्वसितेन निरीक्षिते।
पितुर्जात्: परोक्षस्य राहुयोगे विदेशिनः ॥५०५७ ॥
मातामहगृहेवासं जननं च तथा भवेत्।
स्वपिता जन्मसमये देशान्तरनिवासवान् ॥५०५८ ॥

5057 - 5058. Aries ascendant - Achala Nadiamsa: (a) In case of birth in this segment of this zodiac, if the Sun in a fixed sign (Taurus & C) receives Saturn's aspect, birth will be in the absence of father being on the spot. If Rahu joins the said Sun, the child's father would be in a foreign land.

(b) One born in this Nadiamsa will live in his maternal grand-father's home apart from taking birth therein. At the time of birth, father would be dwelling in a foreign country.

Notes: "Prabha" and "Vikata" Nadiamsas are other names used to indicate "Achala Nadiamsa" by the text. Thus wherever this Nadiamsa occurs, it can be used for all movable (immovable as well as dual) ascendants (as the case may be). In some versions, "Achala" is referred to as "Abala" Nadiamsa. For Prabha (or Achala) Nadiamsa, please see notes under sloka 54, page 7, Book 1.

सिंहराशि स्थिते सूर्ये राहुयोगे शुभेक्षिते।
गिरिप्रान्त्येऽरण्यभागे नगरे जननं स्मृतम् ॥५०५९ ॥

चतुर्थगर्भे संजातो ह्यथवा पञ्चमोद्भवः।
भगिन्यो बहुलाश्च स्युज्येष्ठभ्रातृविहीनवान् ॥५०६० ॥
सिहांशगे क्रिये शुक्रे त्वचलांशे प्रजायते।
विप्रजन्मा सुखी नित्यं चतुर्थो गर्भजः स्मृतः ॥५०६१ ॥
सूर्ये यावत्फलानि स्युस्तावद्गर्भे प्रसूतिमान्।
कालधिपे राहुयुते स्वपिता सोदरैर्युतः ॥५०६२ ॥
प्रभांशगे दिवा सूर्ये कुम्भांशे शनिवीक्षिते।
गुरुदृष्टियुते चैव पितरौ दीर्घजीविनौ ॥५०६३ ॥
स्वपिता त्वसमर्थः स्यात् सोदरीसोदरैर्युतः।
तामसप्रकृतिश्चैव विद्यासौख्यविहीनवान् ॥५०६४ ॥

5059 - 5064. (a) The Sun in Leo along with Rahu and begetting the aspect of a benefic denotes birth in a town of a hilly region containing forests. He will be either the 4th or the 5th issue of the family, will have a number of sisters and be devoid of older co-born.

(b) Venus placed in Aries, with Leo Navamsa, denotes a Brahmin's birth as the 4th issue of the family.

(c) Note the number of net (post-rectified) Bindus obtained by the Sun in his own Ashtaka Varga. The native's birth will follow such number of children. (That is, he will have so many older co-born.)

(d) The conjunction of the Sun with Rahu denotes existence of brothers for the native's father.

(e) Birth in day time, with the Sun begetting the aspect of Saturn or Jupiter and being placed in Aquarius Navamsa, will be a source of longevity to parents. His father would not be a skilful person, would have brothers and sisters, be indolent and bereft of learning and happiness.

प्रजांशके स्थिते सूर्ये गुरुणा च निरीक्षिते।
सर्वसौभाग्यसंयुक्तः कामी दानरतः सुखी ॥५०६५ ॥
राहुयोगेऽर्किसंदृष्टे दुश्शीला स्वपितामही।
पितृवंशे कलङ्कः स्यान्निर्दोषो मातृवंशके ॥५०६६ ॥
अचलांशे पूर्वभागे लग्नेशे शनिसंयुते।
गुरुदृष्टिफलं सत्यं सद्गुणं मातृवंशके ॥५०६७ ॥
राहुयोगफलं पित्रोः पितामह्या गुणं तथा।
मीने नीचांशगे जीवे विकटांशे कुजेक्षिते ॥५०६८ ॥
वंशे कलङ्क इत्याहुर्जारिणी स्वपितामही।
स्वपितुः सोदरी चैव तथैव च भविष्यति ॥५०६९ ॥
पितामहभ्रातृभार्या जारिणी नात्र संशयः।
माता गुणवती पूता सुप्रभांशे पतिव्रता ॥५०७० ॥
पितृभाग्यवती चैव भ्रातृभाग्यसमन्विता।
भर्तृभाग्यविहीना च किंचिद्भर्तृसुखान्विता ॥५०७१ ॥
एकभ्रातृसामायुक्ता सोदर्या ह्येकया युता।
मातृसौख्यविहीना स्यात्पितृसौख्यसमन्विता ॥५०७२ ॥
एवंभूता सतीशेन बहुकालं समुङ्गली।
पितृस्थानाधिपे जीवे शन्यङ्गारकवीक्षिते ॥५०७३ ॥
विकटांशे प्रजातस्य पितुः दीर्घायुरुच्यते।
भाग्येशे विकटांशस्थे शन्यङ्गारकवीक्षिते ॥५०७४ ॥
मेषलग्ने प्रजातस्य पिता दारिद्र्ययोगवान्।
स्त्रीमूलाज्जीवनं चैति मातुलस्यवशात् सुखम् ॥५०७५ ॥
पितामहीकुले भाग्यं तन्मूलाज्जीवनं स्मृतम्।
पितामहीभ्रातृभार्या ह्यथवा स्वपितामही ॥५०७६ ॥
विकटांशकगे जीवे जारिणी पतिदूषणी।
पितामहीफलं सत्यं कामी विषयलोलुपः ॥५०७७ ॥
कलत्रद्वयवान् रागी बहुपुत्रार्थभाग्यवान्।
बाल्ये दारिद्र्यमाप्नोति राजन्यद्वेषशोकवान् ॥५०७८ ॥
मध्ये भाग्यभिवृद्धि च ह्यन्ते पुत्रात् सुखं भवेत्।

5065 - 5078½. (a) The Sun placed in the subject Nadiamsa with the aspect of Jupiter will bless one with all kinds of fortunes. Further he will be lustful, munificent and happy.

(b) Should the Sun join Rahu and earn Saturn's aspect, paternal grand-mother would be devoid of good qualities (i.e. of a questionable nature). There would be some blemish (i.e. women of disrepute would exist) in the father's family. The mother's family would be devoid of any such blemish.

(c) Birth in the 1st half of the subject Nadiamsa, while the lord of the ascendant (which is a movable sign) is conjunct Saturn, with Jupiter's aspect, denotes virtues (for the women) of mother's family.

(d) The said ascendant lord with Rahu causes virtues to paternal grand-mother.

(e) Jupiter in Pisces in aspect to Mars and with Capricorn Navamsa indicates blemish in paternal family. Paternal grand-mother would reflect a questionable character. So also sisters of the person's father. Without doubt, the spouse of

father's brother will be a questionable woman. The native's mother will be virtuous, pure in character and be a chaste wife. She will be fortunate in respect of her father and brothers, be somewhat deprived of luck through husband but endowed with some happiness thereof. She will have one brother and one sister, be devoid of maternal happiness, endowed with paternal happiness and will have a long-lived husband.

(f) Long-lived Father: It is stated that the father of the native of Vikata (or Achala) Nadiamsa will live long if Jupiter, ruling the house of father (i.e. the 9th from Aries, a movable ascendant), is in (joint) aspect to Saturn and Mars.

(g) Father: The 9th lord (Jupiter) in Vikata Nadiamsa in aspect to Saturn (lord of 10th and 11th) and Mars (lord of the ascendant and 8th) will cause poverty to the person's father. Further, he would live through women and be happy on account of maternal uncle. Paternal grand-mother's family would be endowed with prosperity which will be a source of livelihood to father.

(h) Jupiter's position in the subject Nadiamsa indicates that the wife of paternal grand-mother's brother, or paternal grand-mother herself, would be corrupt and would abuse her husband. Effects concerning paternal grand-mother will bear truth.

(i) Further, as a result of the said position of Jupiter, the native will be libidinous and attached to material pleasures. He will have two wives, be passionate, endowed with many sons and much fortunes. He will be indigent in childhood days and be grieved on account of royal enmity. In between, his fortunes will register an increase. Towards the end of his life, he will enjoy happiness from his sons.

कीटे प्रभांशके सूर्ये मेषलग्नोद्भवस्य च ॥५०७९ ॥
स्वपिता सौख्यहीनः स्यात्स्वार्जितं न विद्यते ।
पितृभाग्यार्थसन्तोषी दानभाग्यसमन्वितः ॥५०८० ॥
किंचिद्रोग शरीरी च ग्रहशङ्काप्रपीडितः ।
दुःस्वप्नवशतोदुःखमग्रहारे निवासवान् ॥५०८१ ॥
भ्रातृप्राबल्ययोगेन मध्ये भाग्यभिवृद्धिमान् ।
ग्रन्थान्तरे भ्रातृनाशं भगिनीक्लेशवान् क्वचित् ॥५०८२ ॥
पाराशरमते चोक्तं स्वमते भ्रातृनाशनम् ।

5079 - 5082½. (a) For an Aries-born, the Sun in Scorpio with Prabha Nadiamsa will deprive one's father of who will have no self-made wealth. The native will be happy with his father's fortunes and wealth (whatever that be) and be endowed with fortunes of giving charities. He will be somewhat sickly, troubled by planetary evils, be grieved on account of evil dreams and will live in a colony of Brahmins. He will in the middle part of his life prosper due to the strength of his co-born.

(b) Another authority mentions loss of brother and anguish to sister to some extent.

(c) These (as per "a") are as per sage Parasara. According to me, (the author), destruction of brother will come to pass (as at "b").

षष्ठे मन्दे धनाढयश्च वातप्रकृतिदेहवान् ॥५०८३ ॥
दायादिवशमाप्नोति वार्धके भ्रातृशोकवान् ।
मातुलैकश्चिरायुष्मानेका मातृष्वसायुषी ॥५०८४ ॥
तद्भर्ता राजयोगी स्याद्बहुपुत्रः सुभाग्यवान् ।
कनिष्ठभ्रातृमान् रागी पितृव्येन सुखान्वितः ॥५०८५ ॥

5083 - 5085. Saturn in 6th: One will be wealthy with Saturn in the 6th (in Virgo) and will possess a body with windy temperament in predominance. He will be in the custody (i.e. at the mercy) of his kinsfolk and will incur grief on account of co-born. He will have a long-lived maternal uncle and a maternal aunt (i.e. mother's co-born). The said maternal aunt's husband will enjoy Raja Yoga effects, will have many sons and be very prosperous. The native will have younger brothers, be passionate and be happy on account of father's younger brother.

षष्ठे भूमिसुते मन्दे मातुलश्चाप्यपुत्रकः ।
मृतप्रजोऽथ वा चैव प्रतिबन्धयुतो भवेत् ॥५०८६ ॥
सम्पद्दाये मातुलस्तु पितृमूलात् सुभाग्यवान् ।
स्वभुक्तौ वाहनप्राप्तिर्मध्यखण्डे शुभान्वितः ॥५०८७ ॥
मातामहस्तु सन्तोषी राजद्वारे शुभाधिकः ।
प्रबलोद्योगभाग्याप्तिः सम्पद्भुक्तौ न संशय ॥५०८८ ॥
पितामहस्तु सन्तापं ज्ञातिवर्गे ह्युपद्रवम् ।
बन्धुक्लेशमवाप्नोति स्वपितुर्व्याकुलं क्वचित् ।५०८९ ॥

5086 - 5089. Saturn and Mars in the 6th (in Virgo) will deprive one's maternal uncle of prog-

eny. Else, the said uncle will obtain dead children or will incur obstacles in begetting progeny. In the native's second dasa, the native's father will be a source of good fortunes to the native's maternal uncle. In the 1st sub period of 2nd dasa, the subject will acquire conveyances. The middle part of the dasa will prove auspicious. Happiness, auspicious effects in royal circles and a prosperous employment will occur to maternal grand-father in the 1st sub period of 2nd dasa of the native. Grief to paternal grand-father and troubles and anguish to kinsfolk will also come to pass. His father will be somewhat distressed.

चापे कुन्दांशगे चन्द्रे स्वसुतेन समन्विते।
भूम्यात्मजेन संदृष्टे भेदमातुलयोगवान् ॥५०९० ॥
स्वमातुलश्च दीर्घायुर्बाल्ये जठररोगवान्।
विवाहानन्तरं भाग्यमल्पकालं क्वचित् सुखम् ॥५०९१ ॥
मित्र पुत्रयुतश्चैव मातुलस्य फलं स्मृतम्।
चापे कुन्दांशगे चन्द्रे भृसुतेन निरीक्षिते ॥५०९२ ॥
पूर्वभागे भ्रातृयुक्तः स्वपिता च तथा भवेत्।
उत्तरांशे च जनकः सोदराभ्रातृहीनवान् ॥५०९३ ॥
जातकस्य तथा विन्द्याद्भगिन्यो बहुलाः स्मृताः।
चन्द्रनाडीफलाध्याये विस्तृतं भ्रातृलक्षणन् ॥५०९४ ॥

5090 - 5094. (a) The Moon in Sagittarius in Kunda Nadiamsa along with Mercury and being in aspect to Mars will cause a step-mother.

(b) Maternal Uncle: As a result of the above Yoga, long life to maternal uncle and disorders of spleen in childhood will come to pass. He will prosper after marriage, be happy for some time and be endowed with sons and friends. These effects are for the maternal uncle.

(b) The Moon in Sagittarius in Kunda Nadiamsa in aspect to Mars will cause brothers to the native of former half of Prabha Nadiamsa, Aries ascendant. So also to his father. In case of birth in second half of the subject Nadiamsa, the said Yoga of the Moon would deny co-born to father. Chandra Nadi narrates in detail the effects concerning co-born.

बुधे यावत्फलानि स्युस्तावत्सङ्ख्याः सहोदराः।
दीर्घायुषाः भविष्यन्ति सुप्रभांशे दिवाकरे ॥५०९५ ॥
सूर्ये यावत्फलानि स्युस्तथा भुक्तांशसङ्ख्यकाः।
सुप्रभांशे प्रजातस्य स्वपितुः सोदराः स्मृताः ॥५०९६ ॥
ग्रहांशरश्मिसङ्ख्याश्च चिरायुष्याः भवन्तिहि।
पितृमातृभ्रातृफलं योजयेत् कालवित्तमः ॥५०९७ ॥

5095 - 5097. (a) The number of long-living co-born will equal the number of net Ashtaka Varga bindus obtained by Mercury.

(b) The number of Ashtaka varga bindus obtained by the Sun or the Navamsa passed by the Sun would denote the number of father's co-born. Long-living co-born of father will equal the Navamsas and rays obtained by the planet, Sun. These are the effects of paternal uncles.

Notes: (a) The Sun's position in Suprabha Nadiamsa is mentioned in the 2nd line of sloka 5095 which cannot be properly connected either with Mercury at "a" or to the Sun at "b".

लाभेशे कुजसंयुक्ते षष्ठे गुरुनिरीक्षिते।
स्वज्येष्ठभगिनीपीडां व्रणोपद्रवमादिशेत् ॥५०९८ ॥
षष्ठेशांशे तत्त्रिकोणे रन्ध्रेशांशात्त्रिकोणगे।
स्फुटयोगं गते मन्दे सोदराणामुपद्रवम् ॥५०९९ ॥
स्वज्येष्ठभगिनीयोगे षष्ठे मन्दे च संस्थिते।
शुभदृष्टि विहीने च क्लेशिता ज्येष्ठसोदरी ॥५१०० ॥
जीवे दृष्टे सुमाङ्गल्यमल्पसन्तानमादिशेत्।
शनिनाडी फलाध्याये विस्तृतं सोदरीफलम् ॥५१०१ ॥

5098 - 5101. (a) The 11th lord Saturn in the 6th (in Virgo) along with Mars and receiving Jupiter's aspect will be a source of troubles from ulcers for one's older sister.

(b) Saturn in transit in the sign denoted by the Navamsa occupied by 6th lord (Mercury) or 8th lord (Saturn) or a trine thereof, will produce troubles to one's co-born.

(c) Saturn in the 6th will cause yoga for obtainment of older sister. But if he be bereft of a benefic's aspect, the said sister will be subjected to anguish. Should Jupiter aspect the said Saturn, sister will have a long-living husband but limited number of issues. Sani Nadi mentions in detail the effects relating to one's sister.

व्ययेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ।
व्ययेशदृष्टिराशौ तु ह्यरिष्टं स्वपितामहः ॥५१०२ ॥
स्वपुत्रारिष्टयोगश्च क्षेमदाये भविष्यति।

सम्पद्दाये सुप्रभांशे पूर्वोक्तशनिकालगे ॥५१०३ ॥
पितामहोऽरिष्टमेति पितुर्माता तथा भवेत् ।
लग्नेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥५१०४ ॥
मातुलेन मनस्तापं क्रूरमासे महद्भयम् ।
प्रभांशे वृश्चिके सूर्ये मेषलग्नोद्भवस्य च ॥५१०५ ॥
कन्याशनौ भ्रातृपीडा चापे भ्रातृविनाशवान् ।
एकोनविंशगे वर्षे विंशे जीवे प्रभांशगे ॥५१०६ ॥
प्राप्नुतोपितरौऽरिष्टं नवमाब्दे क्वचिद्विपत् ।
सुखेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥५१०७ ॥
स्वपिता क्लेशबाहुल्यं सम्पद्दाये न संशयः ।
विपद्दशान्त्यमारभ्य क्षेमदाये स्वभुक्तिषु ॥५१०८ ॥
प्रभांशके प्रजातस्य पित्ररिष्टं विनिर्दिशेत् ।
कीटे शनिस्थिते काले सम्पद्दाये पितामहः ॥५१०९ ॥
अरिष्टफलमाप्नोति जीविते चापगे शनौ ।
सूर्यलग्ने सूर्यकाले स्फुटयोगं गते शनौ ॥५११० ॥
तत्त्रिकोणेऽथ वा चेति पितृपीडां विनिर्दिशेत् ।

5102 - 5110½. (a) Paternal grand-father will be endangered when Saturn transits the sign identical with the Navamsa occupied by the 12th lord (Jupiter), a trine thereof, or the sign that is aspected by the 12th lord.

(b) In the 4th dasa, the native will find his son in the grip of evils. In the 2nd dasa, evils to paternal grand-father or paternal grand-mother will come to pass with Saturn's movements mentioned at "a" above.

(c) Mental anguish will occur to maternal uncle with Saturn's transit in the sign identical with the navamsa occupied by the 11th lord (i.e. Saturn himself) or a trine thereof. During this transit, the Sun's journey in an evil sign will cause great fear.

(d) With the Sun at birth in Prabha Nadiamsa in Scorpio (the 8th), Saturn's journey in Virgo will cause evils to co-born; in Sagittarius, Saturn will kill the co-born.

(e) Jupiter in Prabha Nadiamsa will, in the 19th or 20th year, endanger one's parents. Some danger will however come to pass in the 9th year.

(f) In the 2nd dasa, when Saturn journeys in the sign identical with the Navamsa occupied by the 4th lord (Moon) or a trine, one's father will be much anguished. Father will be endangered in the end of the 3rd dasa, or in the 1st sub period of 4th dasa.

(g) Saturn's transit in Scorpio coinciding with the 2nd dasa will endanger paternal grand-father and will cause evils. If he survives, Saturn's journey in Sagittarius will be decisively evil.

(h) Saturn's movement in the Sun sign will be an evil in respect of one's father.

भेदमातुलयोगेन विपद्दाये महत् सुखम् ॥५१११ ॥
प्राबल्यं चैव लभते ह्युद्योगं क्षेमदायगे ।
रन्ध्रेशदृष्टराशीषु रन्ध्रेशांशत्रिकोणगे ॥५११२ ॥
स्फुटयोगं गते मन्दे स्वजनाप्तजनावधि ।
कन्याशनिस्थिते काले जन्मदेशे नृपावधि ॥५११३ ॥
शनिचारवशाद्रोगी पीडितोऽत्यन्तदुःखवान् ।
भाग्येशे विकटांशस्थे शन्यङ्गारकवीक्षिते ॥५११४ ॥
अल्पभोगं च लभते राजद्वारे कुयुक्तिमान् ।
कुत्सितप्रभुराज्येषु तद्द्वारि विकटोक्तिमान् ॥५११५ ॥

5111 - 5115. (a) The 3rd dasa will bring forth much happiness and prosperity due to association with step-brothers. The 4th dasa will cause employment.

(b) Saturn's moving in the sign reflected by the Navamsa of the 8th lord (Mars), or a trine thereof, or the sign aspected by the 8th lord, will trouble one's close relatives.

(c) In Virgo, Saturn's transit will be a source of trouble to the ruler. The native will be subjected to illness, evils and abundant grief.

(d) The lord of the 9th (Jupiter) in Vikata Nadiamsa in aspect to Saturn and Mars will cause limited pleasures. The person will resort to evil designs while in royal service. He will serve a mean king with praises of unusual nature.

कन्यागुरुस्थिते काले ह्यथवा गुरुवक्रगे ।
मौञ्जीबन्धनमाप्नोति तत्काले पितृसौख्यवान् ॥५११६ ॥
बालारिष्टभयं किंचिच्छान्त्या शान्तिं प्रयास्यति ।
षोडशाब्दे विवाहः स्यादथवा मनुवत्सरे ॥५११७ ॥
स्वमातुलकुलोद्वाही पुत्रपुत्रीसमृद्धिमान् ।
सिंहांशके पूर्वभागे मीने जीवे प्रजायते ॥५११८ ॥
बालारिष्टभयं नास्ति चतुरब्दे महाविपत् ।
जन्मादिसप्तमे मासे ह्यष्टमैकादशेऽथ वा ॥५११९ ॥
मासे त्रयोदशे क्लेशं मान्द्यज्वरभयं क्वचित् ।

सम्पद्दाये द्वितीयाब्दे ज्येष्ठभ्राता शुभान्वितः ॥५१२० ॥
सुताधिपदशान्त्यादौ सुखाधिपतिदायगे ।
अबलांशे प्रजातस्य मात्ररिष्टं विनिर्दिशेत् ॥५१२१ ॥

5116 - 5121. (a) With Jupiter's transit in Virgo, or during his retrogression movement, the person will have his thread ceremony and see his father in happiness. He will be subjected to infantile mortality to some extent, for which remedies will have to be resorted to. His marriage will take place in his 16th year or in the 14th year with a bride hailing from his maternal uncle's family. He will have a number of male and female children.

(b) Jupiter in Pisces with Leo Navamsa will cause no fear of infantile mortality to the native of first half of the subject Nadiamsa, in Aries ascendant. However, there will strike a great danger in the 4th year of birth. The 7th, 8th or 11th month from birth will to some extent cause troubles, on a Trayodasi day (13th day of either fortnight), due to indigestion. In the 2nd dasa, during the 2nd year, his older brother will enjoy auspiciousness.

(c) The (beginning of the) dasa of the 4th lord (Moon) or the end of the 5th lord (Sun) will endanger the mother of the native.

भूसुतस्य दशान्त्यादौ राहुदाये स्वभुक्तिषु ।
पञ्चचत्वारिंशकेऽब्दे ह्यपमृत्युभयं स्मृतम् ॥५१२२ ॥
सन्निपातभयप्राप्तिर्धनुर्मासे मृतिं वदेत् ।
प्रभांशे वृश्चिके सूर्ये चापे कुन्दांशकेऽमृते ॥५१२३ ॥
मेषलग्ने प्रजातस्य राहुदाये मृतिं वदेत् ।
लग्नाष्टमगते राहौ केतौ वा शनिवीक्षिते ॥५१२४ ॥
महारोगभयार्तश्च ह्यन्ते दुर्गतिमादिशेत् ।
भूसुतस्य दाशान्त्यादौ राहुदाये स्वभुक्तिषु ॥५१२५ ।
अल्पपूर्णे मध्यकाले ह्यपमृत्युर्भविष्यति ।
जीविते पञ्चशत्वारिपरमायुश्च बिन्दति ॥५१२६ ॥

5122 - 5126. (a) The end of the dasa of Mars, or the 1st sub period of Rahu dasa, will cause fear of untimely death of the native, during his 45th year. He will be threatened by delirium or dangerous vitiation of the three bodily humours and will die with the Sun journeying in Sagittarius.

(b) The Sun in Prabha Nadiamsa in Scorpio and the Moon in Kunda Nadiamsa in Sagittarius will cause the death of an Aries-born in the dasa ruled by Rahu.

(c) Rahu or Ketu in the 8th in aspect to Saturn will cause a great disease and a bad end. The end of the dasa of Mars or the first sub period of Rahu will kill him in the middle (i.e. untimely). If at all he survives, 45 will be his maximum life-span.

।कुम्भलग्ने मालांशः ॥

मालंशके तुलासूर्ये कुम्भलग्ने प्रजायते ।
श्यामवर्णशरीरी च मेधावी विक्रमान्वितः ॥५१२७ ॥
कुम्भलग्ने तुलासूर्ये मीनांशे बुधसंयुते ।
स्वयं सीमन्तपुत्रश्च नीलवर्णः शुभाकृतिः ॥५१२८ ॥
सूर्यांशाधिपतौ जीवे त्वसितेन निरीक्षिते ।
लग्नाद्धनगते भोगी विद्याबुद्धियुतः सुखी ॥५१२९ ॥
मालांशे मालिकायोगे द्वितीये शुभखेचरे ।
राजद्वारे प्रसिद्धश्च राजामात्यप्रसादवान् ॥५१३० ॥

5127 - 5130. Aquarius Ascendant - Mala Nadiamsa: (a) One born in this part of the heavens with the Sun in Libra will have a dark physique, be highly intelligent and be valorous.

(b) The Sun in Libra along with Mercury and obtaining Pisces Navamsa will make the subject as the 1st issue of the family. He will have a bluish body with handsome appearance.

(c) The Sun in the 2nd (the sign Pisces), aspected by Saturn, and acquiring a Navamsa of Jupiter will bless one with pleasures, learning and intelligence.

(d) With Malika Yoga present, a benefic in the 2nd house, will help one to beget fame in royal circles and bring forth the mercy of the ruler and his minister.

कुम्भलग्ने तुलासूर्ये मीनांशे कुम्भकालगे ।
घातांशगे प्रजातश्च सोदरीसोदरैर्युतः ॥५१३१ ॥
बुद्धिमान् कुशलो वाग्मी ह्यन्तःक्रोपी प्रगल्भवाक् ।
कुम्भलग्ने पापकर्मा तुलासूर्ये धनाढ्यवान् ॥५१३२ ॥
मालांशगे कुम्भलग्ने कुग्रामे जननं स्मृतम् ।
अग्रहारेऽथ वा चैव जीर्णगेहे प्रसूतिमान् ॥५१३३ ॥
इन्द्रपश्चिमवीथ्योश्च दक्षिणोत्तरभागगे ।
द्वारयुक्ते गृहे चैव मालांशे प्रसवः स्मृतः ॥५१३४ ॥
पूर्वभागे कुम्भलग्ने भूसुतेन निरीक्षिते ।
प्रसूतिकाले जनन्या बहुवेदनमादिशेत् ॥५१३५ ॥

5131 - 5135. (a) The Sun in Libra with Pisces

Navamsa will cause brothers and sisters to the native of Ghaata (or Maala) Nadiamsa, Aquarius ascendant. he will further be intelligent, skilful, eloquent, inwardly irascible and be proud in speech.

(b) The Sun in Libra will contribute to one's sinful deeds. He will be wealthy.

(c) One with Maala Nadiamsa, Aquarius ascendant, will have his birth in a remote village, in a colony of Brahmins and in a dilapidated house. The house concerned will be located in a street spread from east to the west with an entry from the south or north.

(d) Birth in the former half of the subject Nadiamsa while the ascendant is aspected Mars will be a source of much pains to the mother.

सुधांशगे निशानाथे मालिकायोगजस्य च।
आयुष्मन्तौ च पितरौ स्वपिता भ्रातृशोकवान् ॥५१३६ ॥
पितृष्वस्रा भाग्यवती भूषिता कनकप्रभा।
पुत्रिणी भर्तृयुक्ता च बहुकालं सुजीवति ॥५१३७ ॥
चन्द्रादिमालिकायोगे चन्द्रे गुरुनिरीक्षिते।
राजलक्षणसन्पन्नो बाल्ये स्वल्प प्रपीडितः ॥५१३८ ॥
जन्मदाये क्रूरमासे लग्नाधिपतिभुक्तिषु।
मान्द्यज्वरभयार्तश्च मारीज्वरसुपीडितः ॥५१३९ ॥
स्वर्क्षे मीनांशगे चन्द्रे गुरुभुक्तौ प्रजायते।
बालारिष्टभयं किंचिच्छनिभुक्तौ प्रजायते ॥५१४० ॥
जन्माब्दगे तृतीयाब्दे मालांशे क्रूरमासगे।
बालारिष्टभयप्राप्तिः शान्त्या शान्तिं प्रयास्यति ॥५१४१ ॥

5136 - 5141. (a) The Moon in Sudha Nadiamsa will cause long-living-parents to one born in Malika Yoga. His father will be grieved due to loss of a co-born. His paternal aunt will be fortunate, bedecked with ornaments, will shine like gold, be endowed with daughters and husband and will live well for a long time.

(b) In case of Malika Yoga commencing from the Moon, if Jupiter aspects the Moon, the subject will be blessed with kingly appearance. During his childhood, he will be subjected to some evils. In the sub period of the ascendant lord (Saturn) during the currency of the first dasa, with the Sun's adverse transits, indigestion and small-pox will trouble the native.

(c) The Moon in Cancer with Pisces Navamsa will in the sub period of Jupiter or Saturn in the first dasa produce danger of infantile mortality.

(d) For a native of the subject Nadiamsa, the 3rd year in the first dasa will cause the same result as above when the Sun is in adverse an adverse sign. For this, suitable remedy be adopted.

लग्नाधिपेऽष्टमे स्थाने मालिकायोगजस्य च।
रन्ध्राधिप दशान्त्यादावपमृत्युभयं क्वचित् ॥५१४२ ॥
तद्दोषपरिहारार्थं शनिप्रार्थनमादिशेत्।
षष्ठाष्टमव्यये चन्द्रे गुरुदृष्टिविवर्जिते ॥५१४३ ॥
बालरिष्टभयं सत्यं जन्मदाये न संशयः।
षष्ठे सुधांशगे चन्द्रे गुरुणा च निरीक्षिते ॥५१४४ ॥
बालारिष्टभयं नास्ति चन्द्रप्रार्थनमादिशेत्।
राजतं चन्द्रमभ्यर्च्य दैवज्ञाय प्रदापयेत् ॥५१४५ ॥
बालारिष्टं निहत्याशु गिरिर्वज्रहतो यथा।
लग्नाष्टमगते मन्दे स्वांशे गुरुनिरीक्षिते ॥५१४६ ॥
शनिप्रतिमादानेन देहारोग्यार्थसौख्यवान्।
स्वर्क्षे नवांशगे चन्द्रे मालिकायोगजस्तथा ॥५१४७ ॥
गुरुदृष्टे चिरायुष्मान् भवतः पितरौ तथा।
लाभेशे शनिसंदृष्टे ऋक्षसंधौ प्रजायते ॥५१४८ ॥
पित्ररिष्टो पशान्त्यर्थं दानं कुर्याद्विचिक्षणः।
सुवर्णहयदानेन पितृव्यारिष्टनाशनम् ॥५१४९ ॥
तदभावे क्लेशमेति पितृव्यस्तु न संशयः।
ऋक्षशान्तिं प्रकुर्वीत पश्चाद्दानं समाचरेत् ॥५१५० ॥
स्वर्णनिष्कप्रमाणेन ह्यश्वदानादि वृद्धिदम्।

5142 - 5150½. (a) Saturn placed in the 8th when Malika Yoga is formed will be a source of untimely death in the beginning or end of the dasa of the 8th lord (Mercury). To eliminate such a danger, prayer to the Saturn God should be offered.

(b) It will be true that one will be in the grip of fear of infantile mortality in the very first dasa if the Moon is placed in the 6th, 8th or 12th sans Jupiter's aspect.

(c) The Moon in the 6th (Cancer) in Sudha Nadiamsa with an aspect from Jupiter will not be a source of infantile mortality. Yet prayer to the Moon God, and worship of a silver image of the Moon and donation of the same to an astrologer is directed. As a result, the blemish will be crushed.

(d) Saturn in the 8th in aspect to Jupiter and

begetting his own Navamsa will promote physical felicity and happiness by prayer to Saturn God (and will not be a blemish for the life of the person).

(e) The Moon in his own Navamsa, when Malika Yoga is formed, will give longevity to one's parents.

(f) One born in the junctions of Cancer (with Leo), Scorpio (with Sagittarius) or Pisces (with Aries) will invite (untimely) danger to his father (read paternal uncle), if the 11th lord (Jupiter) is subjected to Saturn's aspect. The discerning should donate an image of golden horse. This act will ward off the impending danger to the said paternal uncle. If resorting to donation is shunned, paternal uncle without doubt will pass through an evilsome phase. Donation should be given after pacification ceremony of Nakshatra (concerned). Donation of a horse made of gold worth a golden coin will cause prosperity (of the uncle).

Notes: (f) Nakshatra Santhi means remedial measures recommended for birth in last portions of Cancer & C. That is for the Nakshatra Devatas of Aslesha, Jyeshta or Revati as the case may be.

पितृव्यभवने शुक्रे तदीशे शनिवीक्षिते ॥५१५१ ॥
सुवर्णाश्वप्रदानेन पितृव्यारोग्यसौख्यवान् ।
तदभावे जातकस्य पिता पितृसमोऽपि वा ॥५१५२ ॥
पाके जन्मदशान्त्यादौ सम्पद्दाये विनाशनम् ।
मालांशगे तुलासूर्ये निधनाधिपसंयुते ॥५१५३ ॥
पितृव्यस्य महारोगः शान्त्या शान्तिं प्रयास्यति ।
अरोगदृढगात्रश्च स्वपिता सात्त्विकः सुखी ॥५१५४ ॥
व्यवसायपरो नित्यं ग्रामद्रव्यापहारकः ।
कालान्तरे भ्रातृशोकं स्वपिता नात्र संशयः ॥५१५५ ॥
विपद्दाये फलं चैति भ्रातृशोकयुतः पिता ।
जन्मदाये द्वितीयाब्दे जातकस्य महाविपत् ॥५१५६ ॥
तृतीयाब्दे क्वचिच्चैति क्रूरमासे न संशयः ।
स्वपिता भगिनी भर्तृयोगेन श्रीयुतोभवेत् ॥५१५७ ॥

5151 - 5157. (a) If Venus is placed in the 11th (Sagittarius) while his dispositor (Jupiter) begets Saturn's aspect, gifting of the image of a golden horse will bring forth health and happiness to paternal uncle. In the absence of this, the native's father, or someone equal to father will be destroyed in the very first dasa.

(b) Birth in the subject Nadiamsa while the Sun in Libra is conjunct the 8th lord (Mercury) will be a source of a great disease to paternal uncle. Suitable remedy should be tried in this regard. The native's father will possess sound and sturdy body, be virtuous, happy, devoted to agriculture (or profession) and will always indulge in swindling the village's funds. After some interval, he will be grieved on account of loss of a co-born in the native's 3rd dasa. The 2nd year of the 1st dasa will involve the subject in a great danger. To some extent, this can occur in an evil month in the 3rd year. His father's sister will be endowed with wealth on account of her husband.

मालांशगे सौख्यमेति द्वितीयाब्दे न संशयः ।
जन्माब्दगे जन्मदेशे मालांशे जन्मगेहगे ॥५१५८ ॥
महारोगातुरश्चैति भूपतिर्नात्र संशयः ।
रन्ध्राधिपे भाग्यगते रन्ध्राधिपदशान्त्यगे ॥५१५९ ॥
स्वजन्मदेशे नृपतिर्महारोगातुरो भवेत् ।
तदभावे पितृव्यश्च व्याप्यरोगप्रपीडितः ॥५१६० ॥
स्वपितामातुलक्लेशं तत्सुतो रोगसंयुतः ।
नीचे मालांशगे सूर्ये जन्मनक्षत्रदायके ॥५१६१ ॥
स्वजन्मदेशे नृपतिः क्लेशं प्राप्नोति भूरिशः ।

5158 - 5161½. (a) The 2nd year will doubtless cause happiness ... in the 1st year, there will be a great diseases in the native's family ... for the king ... (?) The 8th lord in the 9th will in his dasa trouble the king with a disease (?). In the absence of this, the native's paternal uncle will be troubled by a pervading illness. His father will be grieved on account of his mother. Diseases will strike his son.

(b) The Sun in debility will in the first dasa cause abundant anguish to the ruler of the country.

मीने मन्दे पूर्वभागे कुम्भलग्न समुद्भवः ॥५१६२ ॥
नीचे मालांशगे सूर्ये जन्मदाये नृपावधि ।
पितृव्यश्च तथा विन्द्यात् स्वपिता सौख्यभाग्भवेत् ॥५१६३ ॥
मालांशके जन्मदाये चामात्यप्राणनाशनम् ।
पितृष्व सुर्भर्तृभाग्यं योगप्राबल्यभादिशेत् ॥५१६४ ॥

5162 - 5164. In case of birth in former half of Mala Nadiamsa, Aquarius ascendant, Saturn in Pisces and the Sun in Libra will cause troubles to the ruler (?) and to paternal uncle in the first dasa.

This dasa will cause happiness to one's father, kill the minister (?) and cause prosperity to the spouse of paternal aunt.

Notes: From the above slokas, after removing unconcerned portions, we can deduce the following. For Aquarius ascendant, Saturn in the 2nd and the Sun in the 8th will cause happiness to father and paternal uncle during the 1st dasa.

मालांशगे तुलासूर्ये मीनांशे जनितस्य च।
सोदराः सप्त संख्याश्च भगिन्यौ द्वे सजीविते ॥५१६५॥
आयुष्मन्तौ भ्रातरौ द्वौ शेषं नाशमितीरयेत्।
कर्मे राहुयुते दृष्टे सोदरभ्रातृवत्सलः ॥५१६६॥
बुद्धिमान्नीतिमांश्चेति मकरांशे सुकोपवान्।
गुरुदृष्टया सुदीर्घायुः देंवब्राह्मणपोषकः ॥५१६७॥
वयोमध्ये भाग्यवृद्धिर्हरिशङ्करभक्तिमान्।
षष्ठादिमालिकायोगे द्वितीये शुभखेचरे ॥५१६८॥
विपद्दाये महद्भाग्यमपरार्धे श्रियायुतम्।

5165 - 5168½. (a) For one born in Mala Nadiamsa, the Sun in Libra and in Pisces Navamsa denotes 7 brothers out of whom 2 will live long. The rest will die early. 2 sisters with longevity will also come to pass.

(b) The Sun in the 10th in association with Rahu by aspect or conjunction will give fondness for one's brother. The subject will be intelligent and justly disposed.

(c) If the Sun in the 10th occupies Capricorn Navamsa, one will be highly irritable.

(d) The Sun in the 10th with Jupiter's aspect will be a source of longevity. The subject will patronize (honour) gods and Brahmins. His prosperity will pick up in the middle part of his life. He will be devoted to Lords Vishnu and Siva.

(e) The 3rd dasa will cause great prosperity and its second half wealth if the 2nd is occupied by a benefic planet as Malika Yoga commences from the 6th house.

Notes: (e) Malika yoga is required to commence from the 6th house ("Shasta + Adi") while the 2nd is to be occupied by a benefic. Since only 7 planets can participate beginning the 6th house, the Yoga will end with the 12th (Capricorn). In that case there cannot be a benefic in the 2nd house. Hence the text should read as "Sahsta + Adhipa" denoting the 6th lord Moon instead of the 6th house, Cancer. Then there can be a benefic in the 2nd house, simultaneously completing Malika Yoga.

दुर्दरांशगते जीवे स्वक्षेत्रेशनिवीक्षिते ॥५१६९॥
कुम्भलग्ने प्रजातश्च बन्धुमूलात् सुकीर्तिमान्।
स्वपितुर्भगिनीपुत्रीयोगेन श्रियमश्नुते ॥५१७०॥
विंशद्वर्षात् परं भाग्यं त्रिंशोपरि विशेषतः।
दुर्दरांशकगे जीवे चतुर्थे केतु संस्थिते ॥५१७१॥
लिपित्रयज्ञानमेति लेख्यविद्याविशारदः।
राजद्वारे कीर्तियुक्तः प्राधान्यप्रियान् गुणी ॥५१७२॥
विपद्दाये सुवाहाप्तिस्तृतीयांशे सुभाग्यवान्।
बहुग्रामाधिकारी च ग्रामणी र्व्यवसायकः ॥५१७३॥
मौञ्जीबन्धनकर्माणि सम्पद्दाये न संशयः।
द्वादशाब्दे विवाहः स्यादथवा वसुवत्सरे ॥५१७४॥
विपद्दाये फलं सत्यं योगवान् कीर्तिमान् सुखी।
नीचे मृगांशगे सूर्ये दुर्दरांशकगे गुरौ ॥५१७५॥
कुम्भलग्ने प्रजातस्तु कलत्रद्वययोगवान्।
क्षेमाधिपदशाकले स्वभुक्तौ दारनाशनम् ॥५१७६॥
क्षिप्रेणोद्वाहमाप्नोति कन्यान्ते तौलिगे शनौ।
ज्येष्ठभार्याद्विसन्ताननाशं चैव भविष्यति ॥५१७७॥
दारान्तरे सुतप्राप्तिरल्पसन्तानयोगवान्।
भाग्याधिपदशाकाले लग्नेशांशत्रिकोणगे ॥५१७८॥
स्फुटयोगं गते मन्दे पितृव्यस्य विनाशनम्।
पितृष्वसा दशामध्ये मीनान्ते मेषगे शनौ ॥५१७९॥
अतीव क्लेशकार्यं च तत्त्रिकोण क्वचित् क्वचित्।
जन्मदाये पितृव्यस्य विवाहो यत्नविञ्चितः ॥५१८०॥
पश्चाद्विवाहमाप्नोति विपद्दाये मरिष्यति।

5169 - 5180½. (a) Jupiter in Durdhara Nadiamsa and receiving the aspect of Saturn who is in his own sign will cause much fame through one's relatives. He will make wealth through a son of his father's sister. His prosperity will rise after 20, more so after 30.

(b) Jupiter in Durdhara Nadiamsa in the 4th (Taurus) along with Ketu denotes knowledge in three languages. He will be a skilful writer, will achieve fame in royal circles, be fond of importance and be virtuous. In the 3rd dasa, he will beget a conveyance. In its last one third part, he will earn much prosperity, will lord over many villages and

have agricultural gains. His 2nd dasa will cause his thread ceremony. 12th or 14th year will give him marriage. Effects for 3rd dasa will bear truth, in which one will prosper, become famous and will enjoy happiness.

(c) The Sun in Libra with Capricorn Navamsa, as Jupiter is in Durdhara Nadiamsa, will give two wives an Aquarius-born. The subject will lose his spouse in the first sub period of the 4th dasa. His re-marriage will immediately take place, with Saturn moving in the end of Virgo or in Libra. Two children obtained through the first wife will be destroyed. Progeny will occur through the 2nd wife, but this will be limited.

(d) During the operation of the dasa of the 9th lord, Saturn journeying in the sign equal to his own natal Navamsa position or a trine thereof will kill one's paternal uncle. Father's sister will be highly anguished in the middle of the dasa, with Saturn moving in the end of Pisces or in Aries. Anguish will be less with Saturn's transits in the trines thereof. During the 1st dasa of the subject, there will be hurdles to the marriage of father's brother. Later in his marriage will however take place. The said paternal uncle will die in the 3rd dasa of the native.

भाग्याधिपदशासन्धौ मालांशे स्वपितुर्विपत् ॥५१८१ ॥
जीविते दीर्घमायुष्यं प्रत्यग्दाये मरिष्यति।
सूर्यांशगे तत्त्रिकोणे स्फुटयोगं गते शनौ ॥५१८२ ॥
मालांशगे पित्ररिष्टं विपत्तारदशान्त्यगे।
प्रत्यग्दाये मातृहानिश्चापे मन्दे च संस्थिते ॥५१८३ ॥
दुर्दरांशकगे जीवे त्वसितेन निरीक्षिते।
द्विचत्वारिंशगे माता परलोकं प्रयास्यति ॥५१८४ ॥
सुधांशगे निशानाथे विप्रकालोद्भवस्य च।
परं ब्रह्मोपदेशाच्च विनश्येच्च पितामही ॥५१८५ ॥

5181 - 5185. (a) In the junction of the 9th lord's dasa (with the next one), one's father will be in danger. If he survives this phase, he will be endowed with long life to die in the native's 5th dasa.

(b) Saturn transiting in the sign identical with the natal Sun's Navamsa, or a trine thereof, will cause evils to father if simultaneously the 3rd dasa comes to an end. The 5th dasa will endanger his mother with Saturn's position (read "transit") in Sagittarius.

(c) Saturn aspecting Jupiter in Durdhara Nadiamsa at the time of one's birth will cause mother's end in the 42nd year.

(d) Should the Moon be in Sudha Nadiamsa, one born in the first quarter of Mala Nadiamsa, Aquarius ascendant, will lose his paternal grandmother soon after his "Brahmopadesa" (or Spiritual Initiation).

कर्मेशांशे तत्त्रिकोणे स्फुटयोगं गते शनौ।
स्वदेहायासरोगादि क्रूरमासे भविष्यति ॥५१८६ ॥

5186. Saturn's transit in the sign identical with the Navamsa occupied by the 10th lord (Mars), or a trine thereof, will cause physical illness etc. to the native coinciding with the Sun's adverse movements.

नैधनेशदशाकाले कर्माधिपतिभुक्तिषु।
मालांशगे प्रजातस्य दक्षिणायनगे मृतिः ॥५१८७ ॥

5187. One born in Mala Nadiamsa in Aquarius ascendant will die in the sub period of the 10th lord (Mars) during the currency of the dasa of the 8th lord (Mercury) with the Sun's southerly course.

मालांशकगते जीवे स्वक्षेत्रे शनिवीक्षिते।
एकसप्ततिवर्षाणि परमायुश्च विन्दति ॥५१८८ ॥
तदर्धे ह्यपमृत्युश्च शान्त्या शान्तिं प्रयास्यति।
अपमृत्युभयं नास्ति दीर्घायुर्नात्र संशयः ॥५१८९ ॥

5188 - 5189. Jupiter in his own sign in Mala Nadiamsa with Saturn's aspect will contribute to 71 years of total life. In the 36th year, however, the person will face a threat to his life. Once remedies are resorted, there will be no such fear and he will doubtless enjoy the prescribed life-span (i.e. 71 years).

लग्नात् कर्मगते राहौ द्वितीये शुभखेचरे।
स्थापको ह्यग्रहारस्योद्यानानां सरसां तथा ॥५१९० ॥

5190. Rahu in the 10th (Scorpio) while the 2nd (Pisces) is occupied by a benefic will help one construct a colony for Brahmins, apart from gardens and lakes.

लाभे शुक्रे प्रजातश्च योगवान् कीर्तिमान् गुणी।

क्षेमदाये महद्भाग्यं विपद्दाये क्वचित् क्वचित् ॥५१९१ ॥
धनाधिपतिनाडीषु लग्नाधिपतिनाडिगे ।
मालांशे मालिकायोगे फलं विस्तरमादिशेत् ॥५१९२ ॥
ब्रह्मलोकफलप्राप्तिरापत्संन्यासयोगवान् ।
सूर्यनाडीफलं सत्यं प्रत्यक्षं देवकेरलम् ॥५१९३ ॥

5191 - 5193. (a) Venus in the 11th (Sagittarius) will cause prosperity and fame. The 4th dasa will yield much fortunes. The 3rd dasa will contribute to limited fortunes.

(b) In Guru Nadi and Sani Nadi, effects for Malika Yoga relating to birth in Mala Nadiamsa, Aquarius ascendant have been stated in detail.

(c) One with Venus in the 11th will attain the world of Brahma after death. He will take to ascetic order due to a family calamity. These effects as stated in Surya Nadi, and reflected in Deva Keralam, will be unfailing.

कन्याबुधसोमलतांशनाडी फलम् ।

बुधे सोमलतांशस्थे स्वोच्चे चन्द्रनिरीक्षिते ।
शूद्रकाले प्रजातश्च शूद्रजन्मा सुखी भवेत् ॥५१९४ ॥
विप्रकाले प्रजातश्च वैश्यो वा ब्राह्मणोऽपि वा ।
वैश्यकाले वैश्यवृत्तिः क्षत्रियश्च तथा भवेत् ॥५१९५ ॥
शूद्रसङ्करजातीषु जीवनं वैश्यवृत्तिना ।
विप्रादिपञ्चजातीषु योजयेत् कालवित्तमः ॥५१९६ ॥
हरिणांशसोमवल्ल्योः फलैक्यं मनुरब्रवीत् ।
नाडीद्वयफलं चैकं ब्रह्मणा निर्मितं पुरा ॥५१९७ ॥
भाग्येशे हरिणांशस्थे त्वसितेन निरीक्षिते ।
चत्वारिंशात् परं शोकं बाल्येऽल्पसुखवान् भवेत् ॥५१९८ ॥

5194 - 5198. (a) Mercury in his exaltation sign with Somalata Nadiamsa and begetting the aspect of the moon will cause the birth of a Soodra, in the last one fourth part of the Nadiamsa concerned. In the first quarter of a Nadiamsa, the birth will be that of a trader or a Brahmin. One born in the 3rd quarter will have a trading profession while the one belonging to 2nd quarter will be a ruler. A Soodra or one of mixed caste will also live by trading profession.

(b) Similarity in effects for Harina as well as Somavalli Nadiamsa have been stated by Manu. Once Lord Brahma ordained identical effects for these two Nadiamsas.

Notes: Slokas from 5194 to 5270 deal without mention of any specific ascendant. However it occurs to me that these slokas refer to Capricorn ascendant whereof Mercury is the 6th and 9th lord while some extremely rare but useful aphorisms are also included independent of the caption. The 6th lord is the significator of maternal uncles ("Matula" appears in sloka 5199) and the lord of the 9th in the captioned Nadiamsa is referred to in sloka 5198.

In sloka 5221, Libra ascendant is applied. Hence as is common Nadi literature, these slokas should apply to these two movable ascendants.

Importance is mostly given to the position of exalted Mercury in Soma Lata Nadiamsa which is also called Harina Nadiamsa. Somalata is also called Somavalli and Somavathi. Thus these four names denote one and the same Nadiamsa. (Somalata or Somavalli is a certain kind of creeper while Harina means a deer.)

मध्ये भाग्यसमृद्धश्च विंशोपरि सुसौख्यवान् ।
बुधे सोमलतांशस्थे बाल्ये मातुलनाशनम् ॥५१९९ ॥
स्वपिता भ्रातृहीनः स्यात् सोदरी सुसमन्वितः ।
पितृष्वसुः सुतः कश्चिद्देवद्रव्यापहारकः ॥५२०० ॥
धर्मध्वजी बुद्धिजीवी बालशिक्षाप्रदो भवेत् ।
हरिणांशगते सूर्ये बुधे सोमलतांशगे ॥५२०१ ॥
स्वपिता रोगदेही च सम्पद्दाये मृतिं लभेत् ।
सूर्यांशके तत्त्रिकोणे स्फुटयोगं गते शनौ ॥५२०२ ॥
सम्पद्दाये पित्ररिष्टं पश्चादुद्वाहमादिशेत् ।
सितांशगे सुखाधीशे बुधे सोमलतांशगे ॥५२०३ ॥
जननी दीर्घमायुष्यं सोदरीसोदरैर्युतः ।
विक्रमेशस्य नाडीषु विस्तृतं भ्रातृलक्षणम् ॥५२०४ ॥
पुत्रयोगफलं चैव वदेदुद्वाहलक्षणम् ।
हरौ सोमलतांशस्थे सौम्ये रन्ध्रे च संस्थिते ॥५२०५ ॥
बहवः सोदराश्चैव सन्तानानि तथैव च ।
श्रीमन्तौ भ्रातरौ ज्येष्ठावेकः पुत्रविहीनवान् ॥५२०६ ॥
कलत्रद्वयवांश्चैव पुत्रीभिश्च समन्वितः ।
सर्वज्येष्ठानुजभ्राता पुत्रवान् पुत्रिमान् भवेत् ॥५२०७ ॥
भ्रातृप्रियः सुसन्तोषी गूढकामरतः सुखी ।

5199 - 5207½. (a) The lord of the 9th in Harina Nadiamsa in aspect to Saturn will cause grief to the

native after the age of 40. He will enjoy limited happiness in his boyhood days. In the middle of his life, prosperity will increase. After 20, he will be happy.

(b) Mercury in Somalata Nadiamsa will cause loss of maternal uncle in one's boyhood. Further, his father will be bereft of brothers; perhaps he will have sisters. Paternal aunt's son will be somewhat disposed to steal god's (temple's) wealth. The native will be a synonym of virtues and be an intellectual. He will impart education to kids.

(c) The Sun in Harina Nadiamsa while Mercury is in Somalata Nadiamsa (i.e. both the planets with similar Nadiamsas) will cause a diseased body to one's father who will die in the native's 2nd dasa. When Saturn moves in the sign identical with the Navamsa occupied by the Sun in the 2nd dasa, father will be endangered. After father's death, the subject's marriage will take place.

(d) Mercury in the subject Nadiamsa while the 4th lord is in a Navamsa of Venus will ensure longevity of mother. The person will additionally be endowed with co-born. In Guru Nadi, co-born have been dealt with in detail.

(e) Venus in Somalata Nadiamsa while Mercury is in the 8th will cause a number of brothers and children. One's brothers will be wealthy. One of his older brothers will have no male progeny but daughters and two wives. Another brother immediately following the eldest will have both sons and daughters, be fond of his co-born, be quite happy and be secretively libidinous.

Notes: (e) "Hari" is indicative of Leo in Varaha Mihira's Brihat Samhita which does not however suit our purpose as a planet is denoted by the term in our text. "Hari" means "Venus" according to Wm. Moniers as attributed to native lexicons though such a view is yet unpublished.

स्वोच्चे कुम्भांशगे सौम्ये त्वसितेन निरीक्षिते ॥५२०८ ॥
सर्वज्येष्ठानुजभ्रातृत्रयवान् धर्मवत्सलः।
शूद्रेण स्नेहवान् रागी बहुमित्रयुतः सुखी ॥५२०९ ॥
बन्धुवर्गे सुपूज्यश्च देवब्राह्मणपोषकः।
हरिणांशकगे सूर्ये हरिशङ्कर भक्तिमान् ॥५२१० ॥
गुरुभक्तिरतो नित्यं सदा दीनजनप्रियः।
वैदिको धर्मवान् साधु वैदिकाचारबुद्धिमान् ॥५२११ ॥

5208 - 5211. (a) Mercury in exaltation with Saturn's aspect and with Aquarius Navamsa denotes existence of brothers following the oldest. The person will fondly pursue moral merits. He will befriend soodras, be passionate and will have numerous friends. He will be highly honoured by his kinsmen, and will patronize gods and Brahmins.

(b) The Sun in Harina Nadiamsa will make one a devotee of Lords Vishnu and Siva. He will honour his preceptors and be ever fond of the indigent. He will be virtuous and will follow the path specified by the Vedas.

नीचांशकगते सौम्ये शुभे केतौ च संस्थिते।
कुग्रामे वासमाप्नोति ह्यथ वा जननं स्मृतम् ॥५२१२ ॥
कालान्तरे पुण्यदेशे वासं च वार्धके श्रियम्।
ज्येष्ठभ्रातृविनाशेन क्लेशं प्राप्नोति भूरिशः ॥५२१३ ॥

5212 - 5213. Ketu in the 9th house while Mercury is in his debilitation Navamsa denotes that the person will live or is born in a remote village. After some interval, he will shift to a shrine. He will acquire wealth in his old age. Grief will come to pass due to loss of older brother.

बुधे सोमलतांशस्थे बहुसन्तानयोगवान्।
एकपुत्रश्चिरायुष्मान् पुत्रिकाः पञ्चसंख्यकाः ॥५२१४ ॥
ग्रन्थान्तरे गर्गमते बुधे सोमलतांशगे।
द्वौ पुत्रौ कन्यकाः पञ्च दीर्घायुष्यो भवन्तिते ॥५२१५ ॥
मनुसंख्याकसंख्याश्च सन्तानोत्पत्तय स्तथा।
नश्यन्ति बहवश्चैव ह्येकः पुत्रश्चिरायुषः ॥५२१६ ॥
वृद्धपाराशरे ग्रन्थे बुधे सोमलतांशगे।
पुरापातकदोषेण मृतपुत्रबहुत्ववान् ॥५२१७ ॥
एकः पुत्रश्चिरायुष्मान् गर्गग्रन्थे द्विपुत्रवान्।
स्वमते ह्येकपुत्रश्च पुत्रिका पञ्च जीवति ॥५२८१ ॥
त्रिपुत्रिकाः सुमङ्गल्यःशेषं क्लेशयुतेऽपि च।
स्वजन्मर्क्षे सुतोत्पत्तिर्दीर्घमायुश्च विन्दति ॥५२१९ ॥

5214 - 5219. Mercury in Somalata Nadiamsa (in Virgo) will give a lot of children. Only one son will be long-lived. Daughters will be five in number. According to sage Garga, two sons and five daughters will be blessed with longevity; a total of 14 children will be born to the subject. Many will die and one son will be long-lived.

(b) Sage Parasara's work prescribes a number of dead children due to sins of the previous births if Mercury is found in the subject Nadiamsa. Only one long-living son is denoted by Parasara, while sage Garga refers to two such male issues. According to me (the author), one son and five daughters will be long-lived. Three of the daughters will be blessed with long-living husbands while the rest will be anguished (due to untimely widowhood). Children born in the native's birth Nakshatra will live long.

Notes: (a) The first line of sloka 5216 has an alternative reading, thus: " Manu samkhyaani santaanetaataattimaadiseth"

धर्माधिपदशाकाले पुत्रप्राप्तिं विनिर्दिशेत् ।
धनाधिपदशाकाले पुत्रप्राबल्यमश्नुते ॥५२२० ॥
अतीव सौख्यमाप्नोति पुत्रयोगं शुभावहम् ।
व्यये सोमलतांशस्थे स्वोच्चे सौम्ये सुपुण्यवान् ॥५२२१ ॥
स्वदशायां तु सौख्याप्तिर्विपद्दाये धनैर्युतः ।
क्षेमदाये दलं सौख्यं तृतीयांशे धनक्षयम् ॥५२२२ ॥
प्रत्यग्दाये दले चैव दारिद्र्येण च कर्शितः ।
